श्रीगोपालभट्ट प्रणीता

दानखण्डनाटिका

सुधाख्यया व्याख्यया समलङ्कृता

सम्पादकः व्याख्याकारश्च

डॉ॰विश्वनाथस्वाईं

DĀNAKHAṆDA NĀTIKĀ

OF

ŚRĪ GOPĀLA BHAṬṬA

Edited with Sanskrit Commentary and Introduction
by
Dr. Biswanath Swain
Deptt. of Dharmashastra
Sri Jagannath Veda Karmakanda Mahavidyalaya
Puri, Odisha, India

DANAKHANDA NATIKA

of SRI GOPALA BHATTA

With the Commentary SUDHA and Introduction

by

Dr. Biswanath Swain
Head,
Department of Dharmashastra,
Sri Jagannatha Veda Karmakanda Mahavidyalaya,
Puri, Odisha, India

Published with financial assistance from
Rashtriya Sanskrit Sansthan (D.U.), New Delhi

First Edition - 2010

मार्गशीर्षशुक्लाष्टम (ता. 13/12/1010)

500 Copies

Available at :-
Sadgrantha Niketan, Sri Jagannath Temple,
Puri - 752001, Odisha

PRICE : **Rs. 82/-**

ISBN 978-81-920645-0-5

Printed at : -
Sri Narayana Press
Bali Sahi, Puri - 752001
Odisha

OM BHAGABATE NIMBARKACHARYAYA NAMAH

WORLD NIMBARKA PARISHAD

(Founder President : Dr.Brindaban Behari Das Kathia Baba)

Dhananjayadas Charitable Trust Complex

10 Jail Road, Math Chaumuhani, Agratala - 77, Tripura (India)

Ref. No. ------- Date - 19/10/10

PREFACE

We find the name of Gopala Bhatta in the book 'Acharya Parampara Stotra'. He was a disciple of Shyama Bhatta and the 28th Acharya of that parampara. In the writings of that period too we find mention of his name. It has been said -

'गोप्ता श्रुतीनां परतत्त्ववक्ता त्राताऽऽश्रितानां च भवार्णवाद् यः ।
गोपालभट्टं तमहं प्रपद्ये विज्ञानवैराग्यदयादिपूर्णम् ॥'

Gopala Bhatta was the repository of that Vedic Religion. He was the propagator of Brahma Vidya. He was full of milk of human kindness and mercy. His heart overflowed with affection for his disciples. He has composed the drama *'Danakhanda'*. This play has four acts. In this play there is an abundant usage of metaphors and similies. This proves his superb mastery over literature. Such a beautiful composition remained engraved on palm-leaves in the Odisha State Museum in Bhubaneswar for such a long time. It has now reached out hands through the deligent efforts of Prof. Biswanath Swain, Puri, Odisha. Thus he has broughtout an invaluable book which have so long been hidden from public view. He has gone

through it very minutely and written a philosophical commentary in Sanskrit named ***'Sudha'***. It is based on Nimbarka philosophy. We feel that the publication of this book is urgently needed so that it can reach all readers of philosophy and the general public. I hope that this book will receive wide publicity. The Vaisnavas too feel that wide circulation of this book is essential in this age. Prof. Swain's efforts have received wide appreciation from the World Nimbarka Parishad. Bhagaban Nimbarkacharya Himself will shower blessings on the editor and commentator of this drama for his sincere efforts. I also bless him for his work.

Dr.Brindaban Bihari Das
Kathia Baba Ashram
Sukchar, 24 PGS (North),
Kolkata - 700115

****

SHRI JAGANNATH SANSKRIT VISHVAVIDYALAYA

Professor Dr. Nilakantha Pati
Ph.D., D.Litt.
VICE - CHANCELLOR
Shri Jagannath Sanskrit Vishvavidyalaya
Shrivihar, Puri - 752003 (Orissa)

✆ (06752) 251663 (Off.)
230033 (Res.)
9437308189 (M)
Fax:(06752) 251073 (Off.)

Date : 22.10.2010

FOREWORD

I have gone through the Sanskrit Drama ***'DANAKHANDAM'*** of **Gopal Bhatta**, a scholar of Odisha, alongwith its Sanskrit Commentary ***'SUDHA'***, prepared by Dr.Biswanath Swain, a profound scholar of Dharmashastra . This kind of Drama, invigorated with the philosophical thoughts, is unique in its standpoint and so it needs an authentic commentary to follow the underlying truth of the author . The central idea of this Drama, what I understand, is to establish the celestial and perpetual love between **Sri Radha and Sri Krshna** in accordance with the thought of Dvaitadvaita Vedanta system of Nimbarka stream and for a follower of Nimbarka Philosophy, it is the only means to achieve the liberation. The Sanskrit commentary ***'SUDHA'*** a scholartic outcome of Prof. Swain's brilliance will definitely help the researchers to follow the exact idea of the episode .

I wish all success in his endeavour.

Prof. Nilakantha Pati

विषयसूची

****

* श्रीराधासर्वेश्वरो जयति *
॥ श्रीभगवन्निम्बार्काचार्याय नमः ॥

भूमिका

वेदान्तदर्शनस्य पूर्वपीठिका :–

दृश्यते विचार्यते अनुभूयते ज्ञायते येन इति तद्दर्शनम् । दर्शनञ्चात्र तत्त्वत्रयस्यैव । तद्धि तत्त्वत्रयं चित्, अचित्, ब्रह्म च 'भोक्ता भोग्यं प्रेरितारञ्चे'ति श्वेताश्वतरश्रुतेः । चित् जीवः । अचित् जडवर्गः अर्थात् जगत् । ब्रह्म सच्चिदानन्दरूपम् । अत एव चिदचिद्ब्रह्मविषयतत्त्वज्ञानमूलकप्रधानशास्त्रं दर्शनशास्त्रमित्यभिधीयते । दर्शनशास्त्रञ्च आस्तिकं नास्तिकञ्चेति भेदाद्-द्विविधम् । यद्दर्शनशास्त्रं वेदान् प्रमाणरूपेण स्वीकरोति तत् आस्तिकदर्शनम् । यच्च वेदानां प्रामाण्यं नाङ्गीकरोति तत् नास्तिकदर्शनम् । तत्र न्याय-वैशेषिक-साङ्ख्य-योग-पूर्वमीमांसोत्तरमीमांसान्तानि षट् आस्तिकदर्शनानि भवन्ति । एतेषु न्याय-वैशेषिक-साङ्ख्यदर्शनानि ज्ञानप्रतिपादकानि । योगदर्शनं योगप्रतिपादकम् । पूर्वमीमांसादर्शनं कर्मप्रतिपादकं 'कर्मेति मीमांसका' इति आप्तोक्तेः । उत्तरमीमांसादर्शनं भक्तिप्रतिपादकं वेदान्तदर्शनं चाहुः 'ब्रह्मेति वेदान्तिन' इति वचनात् । दर्शनेषु एतत् वेदान्तदर्शनं वैशिष्ट्यपूर्णम् ।

वेदो ज्ञानम् । वेदज्ञानस्य यत्र अन्तः सामीप्यं नैरन्तर्य्यं स वेदान्त इति वदन्ति । वेदज्ञानस्य शिरोभागश्चरमसीमा वा वेदान्त इति गीयते । वेदान्तः अध्यात्मविद्येत्यप्युच्यते 'अध्यात्मविद्या विद्यानामि'ति श्रीमुखोक्तेः । 'विद्याकैरवकौमुदी श्रुतिशिरःसीमन्तमुक्तामणिरि'तीदमेव च भण्यते । वेदस्यान्तिमभागोऽर्थादुपनिषद्वाङ्मयोऽपि वेदान्तपदेनाभिधीयते । उपनिषदां शिक्षा हि वेदान्तदर्शनस्य मूलभित्तिः । उप समीपे निषीदति परमात्मानं प्रापयति या ब्रह्मविद्या सा उपनिषत् । वेदानां वाक्येषु निगूढभावेन यत्तत्त्वं निहितमस्ति तदेव तत्त्वमुपनिषदंशः । तदेव तत्त्वं ज्ञानकाण्डमिति प्रसिद्धम् । वेदानामपरोंऽशो

यागादिकर्मविषयः । स कर्मकाण्ड इत्यभिधीयते । कर्मकाण्डे काम्यकर्मणामपि विधिविधानं सविस्तरं वर्णितम् । तत्फलं सुखोपभोगमात्रम् । तत् कर्मफलमस्थायि विनाशशीलं च 'क्षीणे पुण्ये मर्त्यलोकं विशन्ती'ति श्रीमुखोक्तेः। अतः कर्मकाण्डं नाद्रियते । किन्तु वेदान्तदर्शनप्रतिपादितब्रह्मविद्यायाः फलमविनाशि, निःश्रेयसकरं, मोक्षप्रदायकञ्च । वेदान्तदर्शने अर्थादुपनिषद्वाङ्मये ब्रह्मतत्त्वस्य मायाजीवतत्त्वसमूहानाञ्च विचारो वर्त्तते। प्रोक्ततत्त्वसमूहानां सुखबोधाय महर्षिणा कृष्णद्वैपायनवेदव्यासेन शारीरकमीमांसाख्यो ब्रह्मसूत्रग्रन्थो विरचितः । अतो वेदान्तदर्शने उपनिषदः अथ च ब्रह्मसूत्रम् आकरग्रन्थरूपेण स्वीकृतम् । ब्रह्मसूत्रं हि वेदान्तदर्शनस्य मूलग्रन्थः ।

ब्रह्मसूत्रस्य मर्मार्थज्ञानाय कालक्रमेण परवर्त्तिभिराचार्यप्रवरैः भाष्याणि विरचितानि । विभिन्नैरेतैराचार्यैर्ब्रह्मतत्त्वस्य यथानुभवं स्वस्वमतं स्थापितं – यथा कैश्चित् अद्वैतरूपे, अन्यैः द्वैतरूपे, अपरैः द्वैताद्वैतरूपे, विशिष्टाद्वैतरूपे, शुद्धाद्वैतरूपे च ब्रह्मतत्त्वमनुभूतम् । एतस्मात् कारणात् विभिन्नशास्त्रीय-मतवादानुरूपमनेके सम्प्रदायाः प्रवर्त्तन्ते ।

श्रीनिम्बार्कदर्शनस्य परिचयः :–

दार्शनिकसम्प्रदायेषु वैष्णवसम्प्रदायेषु च श्रीनिम्बार्कसम्प्रदायः अन्यतमः प्राचीनतमश्च । अस्य अपरं नाम श्रीसनकादिसम्प्रदायः । एतत्सम्प्रदायवैष्णवाः स्वस्वललाटे गोपीचन्दनेन ऊर्ध्वरेखाद्वयं रचयन्ति, तन्मध्ये कृष्णवर्णवर्त्तुलाकारं तिलकं स्थापयन्ति, तुलसीकाष्ठमालां गलायां धारयन्ति, जपनिमित्तं च तुलसीकाष्ठमालां व्यवहरन्ति । श्रीमद्भागवतम् अस्मिन् सम्प्रदाये प्रधानं शास्त्रम् । ब्रह्मसूत्रस्य श्रीनिम्बार्काचार्यभगवत्प्रणीतवेदान्तपारिजात-सौरभाख्यं भाष्यं, तदुपरि तच्छिष्यप्रवरश्रीश्रीनिवासाचार्यकृतं वेदान्तकौस्तुभाख्यं भाष्यं श्रीनिम्बार्काचार्यप्रणीतवेदान्तकामधेनुदशश्लोकी च श्रीनिम्बार्कसम्प्रदाये प्रधानदर्शनग्रन्थाः भवन्ति । श्रीराधाकृष्णयुगलोपासना हि एतत्सम्प्रदायस्य वैशिष्ट्यम् । अयं श्रीनिम्बार्कसम्प्रदायो वैदिकसम्प्रदायो माधुर्योपासनाप्रवर्त्तकः।

श्रीसुदर्शनचक्रावतारेण महामुनीन्द्रेण भगवता श्रीनिम्बार्काचार्येण श्रुतिस्मृतिब्रह्मसूत्रप्रमाणैः द्वैताद्वैतनामको वेदान्तः स्थापितः । द्वैताद्वैतवेदान्तो हि भेदाभेदवेदान्त इत्यपरसंज्ञाविशिष्टः । अयमपि स्वाभाविकभेदाभेदसिद्धान्त

इति प्रसिद्धम् । सर्वथा लोकप्रियोऽयं सिद्धान्तः । भेदाभेदसिद्धान्तमिमं प्रतिपादयितुं श्रीनिम्बार्काचार्येण ब्रह्मसूत्रग्रन्थोपरि वेदान्तपारिजातसौरभाख्यं भाष्यं विरचितम् । एतस्य भाष्यस्य सुस्पष्टं व्याख्यानं तच्छिष्यप्रवरेण श्रीशङ्खावतारेण श्रीनिवासाचार्येण तत्र वेदान्तकौस्तुभाख्ये भाष्ये विहितम् । श्रीनिम्बार्कदर्शनपरिज्ञानाय वेदान्तकौस्तुभाख्योऽयं भाष्यग्रन्थो नितरामध्येतव्यः। अस्मिन् निम्बार्कसिद्धान्ते अन्यसमस्त-दार्शनिकमतवादानां सम्यक् समन्वयो भवति । अत एवेदं श्रीनिम्बार्कदर्शनं सर्वाङ्गीणं परिपूर्णं दर्शनम् ।

श्रीनिम्बार्कदर्शने आचार्यपरम्परा :–

सम्प्रदायविशेषे आचार्यपरम्परा समुपलभ्यते । श्रीनिम्बार्कदर्शनेऽपि तथा भवति । तदत्र आलोच्यते । राजस्थानप्रदेशे सलेमावादस्थाने श्रीनिम्बार्कतीर्थे आचार्यपीठे श्रीसर्वेश्वरराधामाधवमन्दिरगात्रे शङ्खमर्मरशिलायां खोदिता लिपिबद्धा च आचार्यपरम्परा –

१. श्रीहंसभगवान्
२. श्रीसनकादिकभगवान्
३. श्रीनारदभगवान्
४. श्रीनिम्बार्कभगवान्
५. श्रीश्रीनिवासाचार्यः
६. श्रीविश्वाचार्यः
७. श्रीपुरुषोत्तमाचार्यः
८. श्रीविलासाचार्यः
९. श्रीस्वरूपाचार्यः
१०. श्रीमाधवाचार्यः
११. श्रीबलभद्राचार्यः
१२. श्रीपद्माचार्यः
१३. श्रीश्यामाचार्यः
१४. श्रीगोपालाचार्यः
१५. श्रीकृपाचार्यः
१६. श्रीदेवाचार्यः
१७. श्रीसुन्दरभट्टाचार्यः
१८. श्रीपद्मनाभभट्टाचार्यः
१९. श्री उपेन्द्रभट्टाचार्यः
२०. श्रीरामचन्द्रभट्टाचार्यः
२१. श्रीवामनभट्टाचार्यः
२२. श्रीकृष्णभट्टाचार्यः
२३. श्रीपद्माकरभट्टाचार्यः
२४. श्रीश्रवणभट्टाचार्यः
२५. श्रीभूरिभट्टाचार्यः
२६. श्रीमाधवभट्टाचार्यः
२७. श्रीश्यामभट्टाचार्यः
२८. श्रीगोपालभट्टाचार्यः

२९. श्रीबलभद्रभट्टाचार्य:
३०. श्रीगोपीनाथभट्टाचार्य:
३१. श्रीकेशवभट्टाचार्य:
३२. श्रीगाङ्गलभट्टाचार्य:
३३. श्रीकेशवकाश्मीरिभट्टाचार्य:
३४. श्रीश्रीभट्टदेवाचार्य
३५. रसिकराजराजेश्वरप्रवरमहावाणीकार: श्रीहरिव्यासदेवाचार्य: (शाखाप्रवर्त्तक:)
३६. श्रीपरशुरामदेवाचार्य:
३७. श्रीहरिवंशदेवाचार्य:
३८. श्रीनारायणदेवाचार्य:
३९. श्रीवृन्दावनदेवाचार्य:
४०. श्रीगोविन्ददेवाचार्य:
४१. श्रीगोविन्दशरणदेवाचार्य:
४२. श्रीसर्वेश्वरशरणदेवाचार्य:
४३. श्रीनिम्बार्कशरणदेवाचार्य:
४४. श्रीव्रजराजशरणदेवाचार्य:
४५. श्रीगोपीश्वरशरणदेवाचार्य:
४६. श्रीघनश्यामशरणदेवाचार्य:
४७. श्रीबालकृष्णशरणदेवाचार्य:
४८. श्रीराधासर्वेश्वरशरणदेवाचार्य: श्री 'श्रीजी' महाराज: (विराजमान:)

श्रीहरिव्यासदेवाचार्यपादस्य प्रसिद्धशिष्येषु च श्रीस्वभूरामदेवाचार्य: अन्यतम: । श्रीनिम्बार्कीयवैष्णवपरम्परायां महात्मा श्रीस्वभूरामदेवाचार्य: विरक्तसम्प्रदायस्य प्रवर्त्तक: । ततश्च निम्बार्कीयकाठियाबाबासम्प्रदाय: अन्ये सम्प्रदायाश्च प्रादुर्भूता: । काठियाबाबासम्प्रदायस्य आचार्यपरम्परा यथा –

३५. श्रीहरिव्यासदेवाचार्य:
३६. श्रीस्वभूरामदेवाचार्य:
३७. श्रीकर्णहरदेवाचार्य:
३८. श्रीपरमानन्ददेवाचार्य:
३९. श्रीचतुरचिन्तामणि-देवाचार्य:
४०. श्रीगोवर्द्धनदेवाचार्य:
४१. श्रीकृष्णदेवाचार्य:
४२. श्रीमोहनदेवाचार्य:
४३. श्रीजगन्नाथदेवाचार्य:
४४. श्रीमाखनदेवाचार्य:
४५. श्रीहरिदेवाचार्य:
४६. श्रीमथुरादेवाचार्य:
४७. श्रीश्यामलदासमहाराज:
४८. श्रीहंसदासमहाराज:
४९. श्रीहरिदासमहाराज:
५०. श्रीमोहनदासमहाराज:
५१. श्रीनेनादासमहाराज:
५२. काष्ठकौपिनप्रवर्त्तक: श्री इन्द्रदासकाठियाबाबामहाराज:
५३. श्रीवजरङ्गदासकाठियाबाबामहाराज: (श्रीनागाजी महाराज:)

५४. श्रीगोपालदासकाठियाबाबामहाराज:

५५. श्रीदेवदासकाठियाबाबामहाराज:

५६. व्रजविदेही चतु:सम्प्रदायश्रीमहान्त: श्रीरामदासकाठियाबाबामहाराज:

५७. व्रजविदेही चतु:सम्प्रदायश्रीमहान्त: श्रीसन्तदासकाठियाबाबामहाराज:

५८. व्रजविदेही चतु:सम्प्रदायश्रीमहान्त: श्रीधनञ्जयदासकाठियाबाबामहाराज:

वृन्दावनक्षेत्रीय-मोतिझील-सन्निकट-श्रीनिम्बार्ककुञ्जस्य गुरुपरम्परायां ५०. श्रीगोवर्द्धनदेवाचार्य ५१. श्रीकृष्णदेवाचार्ययो: नामोल्लेख: प्राप्यते । किन्तु कलकत्तानगरी-सुखचरस्थ-काठियाबाबा-आश्रम-मन्दिरगात्रे शङ्खमर्मरप्रस्तरे खोदित-लिपिबद्धगुरुपरम्पराविवरणे एतयोर्द्वयोराचार्ययो-र्नामोल्लेखो नास्ति । तत्रत्यलेखानुसारम् आचार्यपरम्परायां श्रीधनञ्जयदासकाठियाबाबामहाराज: षट्पञ्चाशत्तमं स्थानमधिरोहति । श्रीधनञ्जयदासकाठियाबाबामहाराजस्य तिरोभावानन्तरं तच्छिष्यप्रवर: प्रेक्षावच्छिरोमणि: श्रीमहान्त: डा०वृन्दवनविहारिदासकाठियाबाबा-महाराज: अधुना अस्यां विरक्तपरम्परायामाचार्यो विराजते ।

भगवान् श्रीनिम्बार्काचार्य: उत्कलदेशं विशेषत: सर्वधर्मसमन्वयक्षेत्रम् अस्माकं नीलाचलं श्रीक्षेत्रं पुरीमागत्य अत्र स्वदर्शनसम्प्रदायस्य विन्यासं कृतवान् । अतोऽत्र श्रीनिम्बार्कसम्प्रदायो राराजते । कालक्रमेण अत्र अधुना विशेषत: तदनुयायिश्रीस्वभूरामदेवाचार्यपरम्परा प्रवर्त्तते । पुर्यां श्रीजगन्नाथदेवायतनसम्मुखस्थो विराजित: श्रीराधावल्लभमठ: अस्य श्रीनिम्बार्कसम्प्रदायस्य प्रसारे प्रचारे च निरन्तरं प्रवर्त्तमानोऽस्ति । अत्र मदीयशिष्य: चतु:सम्प्रदायश्रीमहान्त: श्रीरामकृष्णदास: अधुना महान्तो भवति। अस्मिन् श्रीराधावल्लभमठाश्रमे बहुकालमुषित्वा अस्माकमुत्कलजननीवरपुत्रो वैष्णवप्रवर: भक्तकवि: श्रीजयदेव: करुणावरुणालयसर्वेश्वरश्रीराधामाधव-स्वरूपश्रीजगन्नाथदेवोपासनार्थं गीतगोविन्दमितिनामकं भेदाभेदसिद्धान्तानुकूलं माधुर्यरसपरिपूरितं महाकाव्यं विरचितवान् । एतस्य प्रभावात् प्रतिदिनमत्र श्रीजगन्नाथमन्दिरे प्रात:काले मङ्गलारतिवेलायां रात्रौ शयनपरिचारकाले बृहच्छृङ्गारवेशरचनानन्तरञ्च उपासकैर्भक्तजनै: सामूहिकभावेन गीतगोविन्दस्य गानं क्रियते । गीतगोविन्दपद्यावल्युतपट्टखण्डनिर्मितं वस्त्रं श्रीजगन्नाथमहाप्रभो:

अत्यन्तं प्रियमिति मत्वा सादरं समर्प्यते । श्रीराधावल्लभमठमतिरिच्य श्रीरामजीमठः, दुःखिश्यामछतामठः, कटकीमठश्च अत्र पुर्यामस्य सम्प्रदायस्य मठाः वर्त्तन्ते । श्रीरामजीमठे अधुना श्रीवंशीधरदासः, कटकीमठे श्रीविजयरामानुजदासश्च महान्तरूपेण विराजेते । एतदतिरिच्य सुवर्णपुरस्थ श्रीगोपालजीमठः, ब्रह्मपुरनगरनिकटस्थ कञ्चुरुग्रामे श्रीजगन्नाथमठः, खोर्द्धानगरनिकटस्थमलिपडाग्रामस्थश्रीबलदेवजीउमठश्च श्रीनिम्बार्क-सम्प्रदायस्य वार्तां प्रसारयन्ति । श्रीराधावल्लभमठस्य शाखामठः अधुना भुवनेश्वरनगरे राजते । भुवनेश्वरे च श्रीलिङ्गराजमन्दिरनिकटे काठियाबाबामठः अपि विद्यते । एवं उत्कलेषु निम्बार्कसम्प्रदायस्य अनेके मठाः श्रीनिम्बार्कदर्शनप्रचारप्रसारतत्पराः सन्तः शोभन्ते ।

श्रीनिम्बार्कसम्प्रदायस्य दार्शनिकसिद्धान्तः –

स्वतन्त्रमतवादमाधारीकृत्य प्रत्येकं सम्प्रदायः प्रवर्त्तते । श्रीनिम्बार्कसम्प्रदायेऽपि तथा परिलक्ष्यते । श्रीनिम्बार्कसम्प्रदायस्य वेदान्तभाष्यं सुस्पष्टं वर्त्तते ।

वेदान्तपारिजातसौरभं वदान्तकौस्तुभञ्चेति ग्रन्थद्वयमतिरिच्य श्रीनिम्बार्काचार्यप्रणीताः मन्त्ररहस्यषोडशी, प्रपन्नकल्पवल्ली, सदाचारप्रकाशः, भगवद्गीतावाक्यार्थः, वेदान्तकामधेनुदशश्लोकी, प्रातस्तवराजश्चेत्यादयः, श्रीश्रीनिवासाचार्यप्रणीताः ख्यातिनिर्णयः, लघुस्तवराजः, कठोपनिषद्भाष्यं चेत्यादयः, औदुम्बराचार्यप्रणीताः औदुम्बरसंहिता, व्रतपञ्चकं, श्रीनिम्बार्क-स्तोत्रञ्चेत्यादयः, श्रीगौरमुखाचार्यप्रणीतं श्रीनिम्बार्कसहस्रनामस्तोत्रं, श्रीविश्वाचार्यप्रणीताः प्रपत्तिचिन्तामणिप्रभृतयोऽनेके ग्रन्थाः श्रीनिम्बार्कदर्शन-प्रसारप्रचारानुकूलाः शोभन्ते । अत्र श्रीकेशवकाश्मीरिभट्टाचार्यप्रणीतो वेदान्तकौस्तुभप्रभानामको ग्रन्थः अन्यतमः अनुत्तमश्च । श्रीपुरुषोत्तमाचार्यस्य वेदान्तरत्नमञ्जूषा, सिद्धान्तक्षीरार्णवं, रहस्यविवरणञ्च, श्रीदेवाचार्यस्य वेदान्तजान्हवी, भक्तिरत्नाञ्जलिश्च, श्रीसुन्दरभट्टाचार्यस्य सेतुवेदान्तजाह्नवी, प्रपन्नसुरतरुमञ्जरी, मन्त्ररहस्यषोडशीटीका च, कविकुलकुमुदकलाधरस्य रसिकराजराजेश्वरस्य श्रीगोपालभट्टाचार्यस्य दानखण्ड-नाटिका, श्रीसन्तदास-

काठियाबाबामहाराजस्य वेदान्तपारिजात-सौरभवेदान्तसुबोधिनी, दार्शनिकब्रह्मविद्या च, जगद्गुरुश्रीनिम्बार्काचार्यपीठाधीश्वरश्री 'श्रीजी' महाराज-श्रीराधासर्वेश्वरशरणदेवाचार्यस्य प्रातःस्तवराज-युग्मतत्त्वप्रकाशिका, श्रीयुगलगीतिशतकं, स्तवरत्नाञ्जलिः, श्रीराधामाधवशतकं, निकुञ्जसौरभं, श्रीसर्वेश्वरशतकं, श्रीराधाशतकं, मन्त्रराजभावार्थदीपिका, श्रीनिम्बार्कचरितं, श्रीराधासर्वेश्वरालोकः, जानकीवल्लभस्तवः, श्रीयुगलस्तवविंशतिः, श्रीपरशुरामस्तवावलीः, श्रीमाधवशरणागतिस्तोत्रं, श्रीनिम्बार्कस्तवार्च्चनं, वेदान्तकामधेनुदशश्लोकीनवनीतसुधा चेत्यादयः, श्रीधनञ्जयदासकाठियाबाबा-महाराजस्य वेदान्तकामधेनुदशश्लोकितत्त्वदीपिका, निम्बार्कदार्शनिकमतवाद-साधनप्रणाली, सद्धर्मतत्त्वदीपश्च, श्रीवृन्दावनविहारिदासकाठियाबाबा-महाराजस्य श्रीनिम्बार्कदर्शनस्य समीक्षात्मकमध्ययनं, भेदाभेदप्रकाशश्च, श्रीसूर्यनारायणदाशस्य श्रीनिम्बार्क, श्रीमदनन्तरामविरचितः तत्त्वसिद्धान्तबिन्दुः, श्री अमोलकरविरचिता वेदान्तकुञ्चिका, भक्तप्रवरविरचिता वेदान्तकारिकावली चेत्यादयो ग्रन्थाः श्रीनिम्बार्कदर्शनसम्प्रदायस्य सम्पत्तिरेव । श्रीमाधवमुकुन्ददेवाचार्यविरचितम् अध्यासपरपक्षगिरिवज्रम् अपि अस्मिन् सम्प्रदाये अन्यतमः प्रसिद्धः ग्रन्थः । एतद्ग्रन्थप्रारम्भे श्रीनिम्बार्कदर्शनसम्प्रदायस्य वेदान्तभाष्यसम्बन्धे उक्तमस्ति – भगवान् वासुदेवः पुरुषोत्तमः श्रीकृष्णः ×× ×× ×× भ्रान्तान् स्वभक्तिहीनान् सङ्कीर्णमतीन् वीक्ष्य तेषु स्वज्ञानभक्तिं द्रढयितुं कृष्णद्वैपायनरूपेण परतत्त्वप्रकाशकं समन्वयाविरोधसाधनफलाख्याध्यायचतुष्टयात्मकं शारीरकमीमांसाख्य-वेदान्तशास्त्रं सूत्रयामास । तस्य व्याख्यानं सुदर्शनावतारः श्रीनिम्बार्काचार्यो वाक्यार्थरूपेण वेदान्तपारिजातसौरभाख्यं संगृहीतवान् । तदपि शङ्करावतारः श्रीश्रीनिवासाचार्यो वेदान्तकौस्तुभाख्यभाष्यरूपेण विशदयामास । इति ।

श्रीनिम्बार्कसम्प्रदायदार्शनिकमतवादस्य सारांशः –

(क) ब्रह्म सगुणं निर्गुणश्च – अनेनार्थेन द्वैताद्वैतम् ।

(ख) ब्रह्म जीवश्च परस्परं भिन्नौ अभिन्नौ च – अनेनार्थेन भेदाभेदवादः ।

(ग) जगत् ब्रह्म च परस्परं भिन्नमभिन्नञ्च ।

(घ) जीवश्चेतनः, जगत् जडम् ।

(ङ) जगत् ब्रह्मात्मकम् । जगच्च ब्रह्मणः परिणामभूतम् ।

(च) ब्रह्मणः शक्तिः स्वाभाविकी, ब्रह्मशक्तेः विक्षेपाद्धि जगत्परिणामः ।

इममेव सारांशं विस्तीर्य श्रीनिम्बार्कसम्प्रदायाचार्यैः अत्युत्कृष्टानि अनेकानि ग्रन्थरत्नानि विरचितानि । इमं संक्षिप्तविषयं बोधयितमन्ये ये खलु विषया आधारीकृतास्तेषां संक्षिप्तपरिचयोऽत्र यथामति उपस्थाप्यते –

त्रिविधतत्त्वम् – श्रीनिम्बार्कप्रवर्त्तित-द्वैताद्वैतदर्शनेऽस्मिन् त्रिविधं तत्त्वं स्वीक्रियते । तद्यथा – चित्, अचित्, ब्रह्म चेति । तत्प्रमाणं श्रूयते यथा कृष्णयजुर्वेदीयश्वेताश्वतरोपनिषदि (१/१२) –

भोक्ता भोग्यं प्रेरितारं च मत्वा सर्वं प्रोक्तं त्रिविधं ब्रह्ममेतत् ॥इति।

स्मर्यते च भगवद्गीतायाम् –

क्षरः सर्वाणि भूतानि कूटस्थोऽक्षर उच्यते ।
उत्तमः पुरुषस्त्वन्यः परमात्मेत्युदाहृतः । इति ।

चित्पदार्थः – चित्पदार्थो जीवो ज्ञायते । अयम् 'अन्तरात्मा' इत्यनेन शब्देनाप्यभिधीयते । अयं भोक्ता प्रारब्धकर्मानुसारं प्रतिजन्म सुखं दुःखं चानुभवति । स्मर्य्यत एतत् भगवता मनुना (१२/१३) –

जीवसंज्ञोऽन्तरात्माऽन्यः सहजः सर्वदेहिनाम् ।
येन वेदयते सर्वं सुखं दुःखं च जन्मसु ॥ इति ।

जीवस्य ज्ञातृत्वं सूच्यते – 'ज्ञोऽत एव ॥' इति ब्रह्मसूत्रे (२/३/१८) ।
वेदान्तपारिजातसौरभभाष्ये तु – अहमर्थभूत आत्मा ज्ञाता भवति ॥ इति ।
वेदान्तकौस्तुभभाष्ये तु –

एवं वियदादिवज्जीवो नोत्पद्यते श्रुतिभ्यो नित्यत्वादियुक्तमिदानीं प्रसङ्गात्तत्स्वरूपादि निर्णीयते । पूर्वसूत्रादात्मेत्यनुवर्त्तते । अत इत्यनेन ताभ्य इति हेतुः परामृश्यते । किमात्मा ज्ञानगुणको जडस्वरूपः, किं वा चिन्मात्रमथवा ज्ञानस्वरूपो ज्ञातृत्ववानिति संशये, वैशेषिकादयश्चाहुः – ज्ञानगुणको जड इति । साङ्ख्यादयश्चिन्मात्रमात्मेति वदन्तीति । अत्रोच्यते 'ज्ञ' इति । जीवात्मा ज्ञ एव ज्ञानस्वरूपत्वे सति ज्ञातृत्ववानेव । कुतः ? 'अत्रायं पुरुषः स्वयंज्योतिर्भवति, योऽयं विज्ञानमयः प्राणेषु हृद्यन्तर्ज्योतिःपुरुषः, नहि विज्ञातुर्विज्ञाते विपरिलोपो विद्यतेऽविनाशित्वात्, विज्ञातारमरे केन विजानीयात्, जानात्येवायं पुरुषः, एष

हि द्रष्टा श्रोता घ्राता मन्ता बोद्धा कर्त्ता विज्ञानात्मे'त्यादिश्रुतिभ्यः । जडात्मवादस्तु गुणभूतस्य ज्ञानस्यैव सर्वव्यवहारनिर्वाहकत्वेन प्राधान्यप्रसङ्गाज्जडस्य गुणिनो मोक्षबन्धगुणदोषानर्हत्वेनाजागलस्तनवदप्राधान्यप्रसङ्गात्, श्रुतिविरुद्धत्वात् चोपेक्षणीयः । चैतन्यमात्रवादोऽपि चैतन्यमात्रस्य सर्वगत्वे सर्वशरीरगत-सुखाद्यनुभवानुपलम्भात् । अणुपरिमाणत्वे च करचरणादिगतसुखाद्यनुभवाभाव-प्रसङ्गाच्चोपेक्षणीयः । तस्मादहम्प्रत्ययगोचरोऽयमात्मा ज्ञानस्वरूपो ज्ञातेति सिद्धम्॥ इति ।

जीवस्य अणुपरिमाणत्वं सूच्यते – 'उत्क्रान्तिगत्यागतीनाम् ॥' इति ब्रह्मसूत्रे (२/३/१९) । वेदान्तपारिजातसौरभभाष्ये तु –

जीवोऽणुः अनेन प्रद्योतनेनैष आत्मा निष्क्रामति चक्षुष्टो वा मूर्ध्नो वा अन्येभ्यो वा शरीरदेशेभ्यः, ये वै केचनास्माल्लोकात्प्रयन्ति चन्द्रमसमेव ते सर्वे गच्छन्ति, तस्माल्लोकात् पुनरेत्यस्मै लोकाय कर्मण' इत्युत्क्रान्ति-गत्यागतीनां श्रवणात् ॥ इति ।

वेदान्तकौस्तुभभाष्ये तु –

एवञ्जीवात्मनो नित्यत्वं ज्ञातृत्वञ्च निरूपितमिदानीं तत्परिमाणं निरूप्यते । अयमात्मा मध्यमपरिमाणकः, उत विभुपरिमाणकः, आहोस्विदणुपरिमाणकः ? इति संशये, मध्यमपरिमाणको भवतु, शरीरे सर्वत्र सुखाद्युपलब्धेः, अथवा विभुपरिमाणकः, इति प्राप्तेऽभिधीयते – 'जीवात्मोत्क्रान्तिगत्यागतीनां योग्योऽस्ति, एतत्त्रयं तस्य विभुत्वे नोपपद्यते । किञ्च विभुत्वे सर्वत्र सुखाद्युपलब्धिः प्रसज्येत । मध्यमपरिमाणकत्वे त्वनित्यता स्यात्तस्मादात्मनोऽणुत्वं परिशिष्यते । 'स यदाऽस्माच्छरीरादुत्क्रामति सहैवैतैः सर्वैरुत्क्रामती'त्युत्क्रान्तिः श्रूयते । 'ये वै के चास्माल्लोकात्प्रयन्ति चन्द्रमसमेव ते गच्छन्ती'त्यागतिः श्रूयते ॥ इति ।

बालाग्रशतभागस्य शतधा कल्पनेन यो भागः स एव सूक्ष्मातिसूक्ष्मो जडजगत्यस्मिन् सर्वत्र व्याप्तः असीमः जीवो भवति । श्रूयत एतत् श्वेताश्वतरोपनिषदि (५/९) –

बालाग्रशतभागस्य शतधा कल्पितस्य च ।
भागो जीवः स विज्ञेयः स चानन्त्याय कल्पते ॥ इति ।

बालाग्रशतभागस्य सहस्रधा कल्पनेन यो भागस्तस्य शततमो भागो जीवो भवतीति धर्मशास्त्रकारेण शङ्खेन उपदिश्यते । तद्यथा (७/३२) –

बालाग्रशतशो भागः कल्पितस्तु सहस्रधा ।
तस्य शततमाद्भागाज्जीवः सूक्ष्म उदाहृतः ॥ इति ।

जीवो ब्रह्मणः अंशविशेषः । श्रूयत एतद्यथा सामवेदीयतलवकारशाखीयच्छान्दोग्योपनिषदि (३/१२/६) – पादोऽस्य सर्वा भूतानि ॥ इति ।
तथा चोपदिष्टं भगवता श्रीकृष्णेन गीतायाम् (१५/७) –

ममैवांशो जीवलोके जीवभूतः सनातनः ॥ इति ।

अत एव अचिद्वर्गातिरिक्तो ज्ञानस्वरूपो ज्ञातृत्वभोक्तृत्वकर्तृत्वादिधर्मविशिष्टो भगवदायत्तस्वरूपस्थितिप्रवृत्तिशीलः अणुपरिमाणविशिष्टः प्रतिशरीरं भिन्नो मोक्षार्हश्चित्पदार्थः । चित्पदार्थस्य एतत्सरूपमुपदिश्यते आद्याचार्यश्रीनिम्बार्कभगवत्पादैः वेदान्तकामधेनुदशश्लोक्याम् (१) –

ज्ञानस्वरूपञ्च हरेरधीनं शरीरसंयोगवियोगयोग्यम् ।
अणुं हि जीवं प्रतिदेहभिन्नं ज्ञातृत्ववन्तं यदनन्तमाहुः ॥ इति ।

वचनमिदं व्याख्यातम् अखिलभारतीयश्रीनिम्बाकाचार्यपीठाधीश्वरेण जगद्गुरुचरणेन विपश्चिद्वरेण श्रीराधासर्वेश्वरशरणदेवाचार्येण वेदान्तकामधेनुनवनीतसुधाख्यग्रन्थे – 'अथात्र सर्वेश्वरश्रीकृष्णकरकञ्जाङ्गुलिनिनित्यदिव्यविराजितचक्रराजसुदर्शनावतारो जयन्तीनन्दनोऽरुणकुमारो देवर्षिवर्य्यश्रीमन्नारदलब्धदीक्षः परमकारुणिकः परमाराध्यो भगवान् श्रीमन्निम्बार्काचार्यजगद्गुरुवर्य्यः परमाद्याचार्यपादः स्वीयविनिर्मितवेदान्तपारिजातसौरभाख्यं वेदान्तसूत्रवाक्यार्थमतिगम्भीराशयं सम्यग्विविच्य मुमुक्षूणां शाश्वतसुखबोधाय निखिलनिगमागमपरमसारसम्भूतां वेदान्तकामधेनुरूपां दशश्लोकीं विरचयामस । तत्र दशश्लोकेषु प्राकृताप्राकृतकालात्मकाचेतनपदार्थस्य जीवात्मपरमात्मरूपचेतनपदार्थस्य साधनसाध्यादिसकलपदार्थस्य चातिसङ्क्षेपेण स्वरूपगुणलक्षणादीनां साधुतया महीयान्निर्देशो विहितः । तत्राभ्यर्हितत्वात्प्राक् चेतनपदार्थवर्णनावसरे प्रत्यगात्मनः स्वरूपं दर्शयति वेदान्तकामधेनुदशश्लोकीप्रथमश्लोकेन – श्लोकेऽस्मिन् प्रत्यगात्मनो जीवस्य सन्ति सप्त विशेषणानि । तत्र तेषां क्रमेणायमाशयः –

ज्ञानस्वरूपश्चेत्यनेन जीवात्मनः स्वयंज्योतिष्ट्वात्मकं प्रयुक्तम् । तच्च करणव्यापारायत्तप्रकाशशून्यत्वमवबोध्यम् । हरेरधीनमितिपदेन बद्धावस्थायामिव मुक्तावपि जीवस्य परमात्मायत्तस्वरूपस्थितिप्रवृत्तिकत्वं प्रतिपादितम् । ज्ञानस्वरूपात्मकलक्षणस्य ब्रह्मण्यतिप्रसङ्गश्च वारितः ।

ननु परायत्तत्वे सति किन्नाम मुक्तित्वमिति चेच्छृणु जीवस्य तथाविधं स्वरूपमेव ज्ञानसङ्कोचेन बद्धावस्थायाञ्च तस्य विस्मृतित्वात् । स्वं स्वतन्त्रं मत्वा दुःखभाग् भवति जीवः, पुनश्च स्वरूपप्राप्तितो या निरावरण-सुखोपलब्धिस्तदेव मुक्तित्वं नाम बोध्यं भगवतो दिव्यगुणविग्रहा-द्यनुभावात्मिका । अणुमितिपदेन जीवपरिमाणमतिसूक्ष्मतममभिव्यञ्जितम्, विभुमध्यमपरिमाणयोश्च प्रत्याख्यानं विहितम् । तथात्वे तु विभिन्नानुभूति-दुर्व्यवस्थापत्तिविनाशित्वापत्तिश्च प्रसज्ज्येत । शरीरसंयोगवियोगयोग्यमित्यनेन प्रतिदेहभिन्नमित्यनेन च जीवानामनेकत्वमनन्तत्वं द्योतितमेकजीववादश्च निराकृतः । 'नित्यो नित्यानामि'त्यादिश्रुतिभिः 'उत्क्रान्तिगत्यागतीनाम्' इत्यादिसूत्रैश्च जन्ममरणादिव्यवस्था विशदीकृता । यत् यस्मात् । अनन्तमितिपदेन जीवानां सङ्ख्याविप्रतिपत्तिर्निराकृता । लोके क्रमशो मुक्तिप्राप्तौ परिगणितानां कदाचित्सर्वेषां जीवानां मुक्तिर्भवेत्तर्हि बद्धजीवाभावात् संसारोच्छेदशङ्का चापि निराकृता जीवानामनन्तत्वात् ।

ज्ञातृत्ववन्तमितिपदेन ज्ञानाश्रयत्वं दर्शितम् । चकाराच्च कर्तृत्वभोक्तृत्वाश्रयत्वादिकसमुच्चयोऽपि दर्शितः । आहुरत्र श्रुतयो महर्षिजना वेति वक्तृपदं योजनीयम् । एवञ्च परमात्मायत्तस्थितिप्रवृत्तिकत्वे सति ज्ञानाश्रयत्वे सति कर्तृत्वभोक्तृत्वाश्रयत्वे सति ज्ञानस्वरूपमणुपरिमाणक-मनन्तसङ्ख्यावच्छिन्नत्वं जीवलक्षणमुपात्तम् । अध्यस्तत्वं प्रतिबिम्बाभासावच्छेदात्मकत्वं च जीवस्य निराकृतम् । तार्किकाभिमतकेवल-ज्ञानाश्रयत्वं, मायावादिप्रकल्पितकेवलज्ञानस्वरूपत्वं च समालोचितमिति सङ्क्षिप्तसारः ॥ इति । विस्तृतविवेचनन्तु श्रीधनञ्जयदासकाठियाबाबा-प्रणीतवेदान्तकामधेनुतत्त्वदीपिकाग्रन्थे विद्वद्भिः समवलोकनीयमिति ।

चित्पदार्थस्य भेदमुपदिशन्नाह श्रीनिम्बार्काचार्यचरणः –

अनादिमायापरियुक्तरूपं त्वेनं विदुर्वै भगवत्प्रसादात् ।

नित्यमुक्ता मुक्ताश्चेति । इत्यादिकमुह्यम् । सविस्तरं वर्णनं तु श्रीपुरुषोत्तमाचार्यचरणाम्बुजविरचितवेदान्तरत्नमञ्जूषायां समवलोकनीयं विपश्चिद्भिरिति शम् । इति ।

अचित्पदार्थाः – श्रीनिम्बार्कदर्शने अचित्पदार्थास्त्रिविधाः भवन्ति । ते पदार्था यथा – प्राकृतः, अप्राकृतः कालश्चेति । एते अचेतनपदार्थाः मायाप्रधानादिनामभिरपि अभिहिताः भवन्ति ।

प्राकृतपदार्थः – 'सत्त्वं रजस्तम इति प्रकृतेर्गुणाः' इति श्रीमद्भागवत (१/२/२३) वचनानुसारेण गुणत्रयाश्रयभूतः प्राकृतपदार्थो भवति । अयं नित्यः परिणामादिविकारी च 'गौरनाद्यन्तवती जनित्री भूतभाविनी सितासिता च रक्ता च सर्वकामदुघा विभोः', 'अजामेकां लोहितशुक्लकृष्णां बह्वीः प्रजाः सृजमानां सरूपाम्' इत्यादि मान्त्रिक - श्वेताश्वतरश्रुतिभ्यः, 'त्रिगुणं तज्जगद्योनिरनादिप्रभवाप्ययम् । अचेतना परार्था च नित्या सततविक्रिया । त्रिगुणं कर्मणां क्षेत्रं प्रकृते रूपमुच्यते ॥' इत्यादि स्मृतिभ्यः । 'तदधीनत्वादर्थवत् ॥ चमसवदविशेषात् ॥ ज्योतिरुपक्रमात्तु तथा ह्यधीयत एके ॥' इत्यादि ब्रह्मसूत्रेभ्यश्च । एते सर्वे प्राकृतपदार्था भवन्ति ।

अप्राकृतपदार्थः – अयं त्रिगुणप्रकृतिकालेभ्योऽत्यन्तं भिन्न । प्रकृतिमण्डलभिन्नदेशवृत्तिनित्यविभूतिविशिष्टपरमव्योमपरमपदब्रह्मलोकादि - पदाभिधेयः, 'आदित्यवर्णं तमसः परस्तात्, योऽस्याध्यक्षः परमे व्योमन्, तद्विष्णोः परमं पदं सदा पश्यन्ति सूरयः, विज्ञानसारथिर्यस्तु मनःप्रग्रहवान्नरः, सोऽध्वनः पारमाप्नोति तद्विष्णोः परमं पदं, न स पुनरावर्त्तते, अनावृत्तिः शब्दात्' इत्यादि श्रुतिसूत्रेभ्यः ।

कालः – प्राकृताप्राकृतोभयभिन्नाचेतनपदार्थविशेषः कालः । अयं नित्यो विभुश्च । तद्यथा श्रूयते –

'अथ नित्यानि ह वै पुरुषः प्रकृतिः कालः ।' इति ।

प्राकृतपदार्थसकलं कालतन्त्रम् । कालस्य सर्वनियामकत्वेऽपि परमेश्वर-नियम्यत्वमेव, 'ज्ञः कालकालो गुणी सर्वविद्य' इति श्रुतेः ।

अचित्पदार्थसकलं निरूप्यते श्रीमदाद्याचार्यवर्येण श्रीनिम्बाकाचार्य-भगवत्पादेन वेदान्तकामधेनुदशश्लोकीग्रन्थे (३) यथा –

मुक्तं च बद्धं किल बद्धमुक्तं प्रभेदबाहुल्यमथापि बोध्यम् ॥ इति । वचनमिदं व्याख्यातं श्रीराधासर्वेश्वरशरणदेवाचार्येण यथा – जीवात्मनः स्वरूपमितः प्राक् प्रथमश्लोकेन प्रतिपाद्य तद्भेदमाह – अनादिमायेति । श्रीहरेरनाद्यविद्याकर्मात्मिकया त्रिगुणात्मिकयाऽघटनाघटनापटीयस्याऽनन्त-ब्रह्माण्डविमोहिन्याऽनिर्वचनीययाऽतिविलक्षणतमया मायया परियुक्तरूपं बद्धावस्थापन्नस्वरूपमेव जीवं भगवत्प्रसादात् भगवतो निर्हैतुककृपाप्रसादादेव एनं जीवं विदुः वेत्तुं पार्य्यते । वै इति परमदार्ढ्यर्थं प्रयुक्तम् । तु-शब्दः शङ्कापरिहारपरः । तत्रेदमवधेयं तद्यथा निखिलविश्वोत्पत्तिस्थितिसंहारादिहेतुना परात्परपरब्रह्मणा पुराणपुरुषोत्तमेन भगवता श्रकृष्णेन श्रीमद्भगवद्गीतायां समुपदिष्टं स्वयमेव यथा –

दैवी ह्येषा गुणमयी मम माया दुरत्यया ।
मामेव ये प्रपद्यन्ते मायामेतां तरन्ति ते ॥ इति ।

यद्यपि त्रिगुणात्मिका भगवदीयमाया परमदुरत्ययाऽस्ति तथापि 'मामेव ये प्रपद्यन्ते' अर्थाद्ये जनाः श्रीभगवच्छरणापन्नाः समवतिष्ठन्ते तान् प्रति सुदुस्तरेयं मायाऽपि किमप्यनिष्टं नैव विदधाति 'मायामेतां तरन्ति ते' इति श्रीभगवद्वचनात्सौकर्य्येणानन्तभवाम्भोधिं समुत्तीर्य भगवत्प्रपन्नो जीवः श्रीहरिदिव्यधामस्थलं समवाप्यासीमानन्दसुधारसं सर्वदाऽनुभवतीति परमाशयः । तथा चात्रान्योपायास्तु तद्व्यक्तीकरणे विविधोपायभूतास्तत्र मुक्त-बद्ध-बद्धमुक्तेतिभेदेन त्रिविधा जीवाः परिज्ञेयाः । अथ चान्यदपि प्रभेदबाहुल्यम् इति शास्त्रोक्तं प्रबोध्यम् । क्वचित्तु मुक्तश्च भक्तमित्यादिपाठान्तरमुपलभ्यते।

तस्यापि सङ्गतित्वमेव, यथा हि बद्धा जीवास्तथैव सर्वेश्वरपराभक्तिनिरता भक्ता अपि जीवाः सन्तीह सकल-विश्वब्रह्माण्डे । इतिकृत्वैव मुक्तश्च भक्तमित्यादिपाठान्तरमपि साधीयः। प्रभेदबाहुल्यं त्वेवमवधेयं यच्चेतनस्य बद्ध-मुक्तभेदः प्रथमस्तत्र बुभुक्षु-मुमुक्षु-भेदाद्द्विविधा बद्धाः । बुभुक्षवश्च भाविश्रेयस्क-नित्यसंसारिभेदाद्द्विविधाः । स्वस्वरूपप्राप्तिकामाः परस्वरूपप्राप्तिकामास्तथेत्थं मुमुक्षवोऽपि द्विविधाः । मुक्ता अपि नित्यमुक्त-बद्धमुक्तभेदाद्द्विविधाः । पार्षदान्तरङ्गभेदान्नित्यमुक्ता अपि द्विविधाः स्वस्वरूपप्राप्तिवन्त, परस्वरूपप्राप्ताश्चेति । बद्धमुक्ता अपि द्विविधाः,

अप्राकृतं प्राकृतरूपकं च कालस्वरूपं तदचेतनं मतम् ।
मायाप्रधानादिपदप्रवाच्यं शुक्लादिभेदाश्च समेऽपि तत्र ॥ इति ।

महामुनीन्द्रवचनमिदं स्फुटीक्रियते जगद्गुरुश्रीनिम्बार्काचार्येण श्रीराधासर्वेश्वरशरणदेवाचार्येण वेदान्तकामधेनुनवनीतसुधाख्ये ग्रन्थे यथा – प्रत्यगात्मस्वरूपप्रभेदादिकञ्च सम्यङ् निरूप्यात्र तृतीयश्लोकेनाचेतनतत्त्वं निरूपयति श्रीमदाद्याचार्यवर्यः श्रीभगवन्निम्बार्काचार्यपादः –

प्रकृतिस्त्रिगुणात्मिका तत्कार्यजातञ्च जागतिकं सर्वं प्राकृतं तत्त्वं परिगण्यते । तद्भिन्नं निरतिशयसौन्दर्यमाधुर्यलावण्याद्यनन्तकल्याणगुणगण-महार्णवसर्वेश्वरराधाकृष्णदिव्यमङ्गलविग्रहस्वरूपं तथा च तत्परमदिव्याति-दिव्यसच्चिन्मयभगवद्धामादिकञ्चाप्राकृततत्त्वं प्रोच्यते । 'आदित्यवर्णं तमसः परस्तादि'त्यादि श्रुतेः । तमःशब्दाभिधेयाभ्यां प्रधानकालाभ्यां परं विलक्षणम् । तत्रेदं श्रीहरेर्धामादिकं तु प्रकाशस्वरूपमपि धर्मभूतज्ञानाश्रयत्वाभावादचेतनतत्त्वे परिगण्यते । प्राकृताप्राकृताभ्यां भिन्नं क्षणमुहूर्त्तादिव्यवहारासाधारणहेतुः काल इत्युच्यते । सर्वमपीदं प्राकृततत्त्वं कालायत्तं, कालश्च तस्य नियामकः । अप्राकृते तु न तस्य नियामकत्वम् । कालस्य सर्वनियामकत्वेऽपि सर्वेश्वरनियम्यत्वमेव, 'ज्ञः कालकालो गुणी सर्वविद्य' इति श्रुतेः । यद्यपि लीलाविभूतौ छद्मना कालनियामकत्वं प्रतिभाति तथापि नित्यदिव्यविभूतौ तु कालस्य गतिरपि नास्ति । अयञ्च कालः कालरूपेणानित्यः । अखण्डकालस्तु नित्य एव । 'सदेव सौम्येदमग्र आसीदि'त्यादिश्रुतिषु प्रलयेऽपि तस्य सत्त्वश्रवणात् । शुक्लरक्तादिसमस्त-प्रभेदास्तु मायाप्रधानादिपदप्रवाच्ये प्राकृततत्त्वे एव । प्रकृतिमहदहङ्कारपञ्च-तन्मात्रैकादशेन्द्रियपञ्चमहाभूतात्मकचतुर्विंशतितत्त्वैः सर्वाणि भूर्भुवोतलसुतल-वितलादिचतुर्दशभुवनानि समुत्पद्यन्त इत्येवं विज्ञैरवधेयम् । सूक्ष्माशयो विस्तृतविवेचनं तु वेदान्तरत्नमञ्जूषाग्रन्थे विलोकनीयम् ॥ इति ।

जगद्ब्रह्मणोर्मध्ये भेदाभेदसम्बन्धसत्वात् अनयोर्मध्ये अंशांशिसम्बन्धः अपि विद्यते । जगत् ब्रह्मणः अंश इति हेतोः एतदपि नित्यं सत्यञ्च । तथापि एतत् परिवर्त्तनशीलम् । ब्रह्म सर्वज्ञम् । भूतभविष्यद् वर्त्तमानरूपेण प्रकाशितं जगत् एतस्य ज्ञाने नित्यभावेन प्रतिष्ठितम् । जीवज्ञाने जगत् क्रमभावेन प्रकाशितं भवति । एतस्मात् कारणात् जीवः एतत्परिवर्तनशीलमिति मनुते । किन्तु ब्रह्मज्ञाने एतन्नित्यम् ।

ब्रह्मपदार्थः – वेदान्तदर्शनस्य प्रथमसूत्रे ब्रह्म किमिति जिज्ञासितम् । जगत उत्पत्तिस्थितिलयानामेकमात्रं कारणं ब्रह्म इति उत्तरं प्रददता भगवता वेदव्यासेन ब्रह्मसूत्रे सूत्रितम् यथा – जन्माद्यस्य यतः ।। इत । बृहि बृंहि वृद्धावित्यस्माद्धातोरौणादिके मनिन्-प्रत्यये कृते ब्रह्मशब्दो निष्पद्यते । योगवृत्त्या ब्रह्मपदस्य निरतिशयबृहत्परत्वे सिद्धे तस्यासङ्कोचेन देशकालवस्तुपरिच्छेदशून्ये वस्तुनि पर्यवसानं भवति । ब्रह्मपदार्थो हि 'अणोरणीयान् महतो महीयान्' 'नित्यो नित्यानां चेतनश्चेतनानाम्' 'अपाणिपादो जवनो ग्रहीता पश्यत्यचक्षुः स शृणोत्यकर्णः । वेत्तासि वेद्यं न च तस्यास्ति वेत्ता तमाहुरग्र्यं पुरुषं महान्तम् ।।' 'एष सर्वेश्वर एष सर्वज्ञ एषोऽन्तर्याम्येष योनिः सर्वस्य प्रभवाप्ययौ हि भूतानाम् ।।' इत्यादिश्रुतिवचनेभ्यः सर्वेश्वरः । स्वरूपेण बृहद्गुणयोगेन च यद्धि बृहत्तमं तद्ब्रह्मशब्दवाच्यम् । 'बृहति बृंहयति तस्मादुच्यते परं ब्रह्मे'ति श्रुतेः । 'एष प्रकृतिरव्यक्तः कर्त्ता चैव सनातनः । परश्च सर्वभूतेभ्यस्तस्माद्वृद्धतमोऽच्युतः ।। बृहत्वाद्बृंहणत्वाच्च ब्रह्मे'त्यादिस्मृतेश्च । एष एव परमात्मा अनादिर्नारायणः संसारपरमकारणम् । अखिलचराचरात्मकं जगत् सर्वाधारेण सर्वनियन्त्रा सर्वाधिपतिना सर्वशक्तिमता सर्वविदा सर्वकल्याणगुणस्वरूपेणानेनैव परमेश्वरेण व्याप्तम् । अयं सर्वान्तर्यामी एकोऽपि बहुधा विभाति । अयमचलोऽपि बुद्धीन्द्रियमनोवाय्वादिक्षिप्रगतिविशिष्टान् अतिक्रामति । एष आदिदेवो ज्ञानस्वरूपः सर्वेषां वेत्ता वर्त्तते । देवतामहर्षिभिश्चापि पूर्णरूपेणैष वेदितुं न शक्यत इति ईशोपनिषद् (४) भगवद्गीता (१०/२) प्रभृतिश्रुतिस्मृतयः प्रमाणम् । एतस्य सर्वशक्तेरंशविशेषो भूत्वा वाय्वादिदेवताः स्वस्वकार्यजातं सम्पादयन्ति । एतत्परं ब्रह्म प्राकृतशब्दस्पर्शरूपरसगन्धरहितमविनाशि नित्यमसीमम् । एतच्च सत्यतत्त्वम् । सांसारिकविषयाणां ग्रहीतॄणि इन्द्रियाण्यपि एतदधिगन्तुं कथञ्चिदपि समर्थानि न भवन्तीति कठोपनिषच्छ्रुतिः (१/३/१५) एव प्रमाणम् । देहेन्द्रियासुहृदयानि येन संजीवितानि चरन्ति च तदेव परं ब्रह्मेति श्रीमद्भागवते (११/३/३५) निमिराज्ञे पिप्पलायनमुनिना च समुपदिश्यते । जगदुत्पत्तिस्थितिविलयानामेकमात्रं कारणं भवति ब्रह्म 'जन्माद्यस्य यतः' इति भगवता वादरायणेन ब्रह्ममीमासायां (१/१/२) सूत्रितत्वात् । द्वैताद्वैतदर्शने ब्रह्म अचिन्त्यम् अनन्तं निरतिशयं स्वाभाविकं बृहत्तमं स्वरूपगुणादीनामाश्रयभूतं

सर्वज्ञं सर्वशक्ति सर्वेश्वरः सर्वकारणरूपं समानातिशयशून्यं सर्वव्यापकं सर्ववेदैकवेद्यमिति स्वीक्रियते। श्रूयते यथा श्वेताश्वतरोपनिषदि (६/७-८) –

'तमीश्वराणां परमं महेश्वरं तं देवतानां परमञ्च दैवतम् ।'

'न तस्य कार्य्यं करणं च विद्यते न ततुसमश्चाभ्यधिकश्च दृश्यते ।

पराऽस्य शक्तिर्विविधैव श्रूयते स्वाभाविकी ज्ञानबलक्रिया च ॥' इति।

भगवान् वासुदेवः श्रीकृष्णो हि ब्रह्म। अपरे तस्य अंशविशेषा भवन्ति । तदुपदिष्टं श्रीमद्भागवते (१/३/२७-२८) –

'ऋषयो मनवो देवा मनुपुत्रा महौजसः ।

कलाः सर्वे हरेरेव सप्रजापतयस्तथा ॥

एते चांशकलाः पुंसः कृष्णस्तु भगवान् स्वयम् ।

इन्द्रारिव्याकुलं लोकं मृडयन्ति युगे युगे ॥' इति ।

श्रीकृष्णप्राप्तिनिमित्तमुपायो भवति ज्ञानम् । एतत् ज्ञानं चापि त्रिविधम् – ध्यानं, ध्रुवा स्मृतिः, परा भक्तिश्च । ज्ञानप्राप्तिनिमित्तमुपाया भवन्ति श्रवणं, मननं, निदिध्यासनं श्चेति ।

ब्रह्मसर्वेश्वरतत्त्वं निरूपयता महामुनीद्रेणाद्याचार्यवर्येण श्रीनिम्बार्कभगवता ब्रह्मसूत्रवेदान्तपारिजातसौरभे (१/१/१) भणितम् – अनन्तचिन्त्यस्वाभाविकस्वरूपगुणशक्त्यादिभिर्बृहत्तमो यो रमाकान्तः पुरुषोत्तमो ब्रह्मशब्दाभिधेयः ... । इति । रमाकान्तः राधावल्लभः श्रीकृष्णः । परब्रह्मतत्त्वं तेनैव वेदान्तकामधेनुदशश्लोक्याम् (४) समुपदिश्यते –

स्वभावतोऽपास्तसमस्तदोषमशेषकल्याणगुणैकराशिम् ।

व्यूहाङ्गिनं ब्रह्म परं वरेण्यं ध्यायेम कृष्णं कमलेक्षणं हरिम् ॥' इति ।

परमेश्वरतत्त्वं स्फुटीकुर्वता श्रीश्रीनिवासाचार्येण वेदान्तकौस्तुभे (१/१/१) उक्तम् – ब्रह्म चाचिन्त्यानन्तनिरतिशयस्वाभाविकबृहत्तमस्वरूप-गुणाद्याश्रयभूतः सर्वज्ञः सर्वशक्तिः सर्वेश्वरः सर्वकारणरूपः समानातिशयशून्यः सर्वव्यापकः सर्ववेदैकवेद्यः श्रीकृष्ण एव 'बृहति बृंहयति तस्मादुच्यते परं ब्रह्म', 'यः सर्वज्ञः सर्ववित्, पराऽस्य शक्तिर्विविधैव श्रूयते स्वाभाविकी ज्ञानबलक्रिया च, एष सर्वेश्वरः, तमीश्वराणां परमं महेश्वरं तं देवतानां परमञ्च दैवतम्, न तस्य कार्यं करणञ्च विद्यते न तत्समश्चाभ्यधिकश्च दृश्यते, प्रधानक्षेत्रज्ञपतिर्गुणेशः, एको

देवः सर्वभूतेषु गूढः सर्वव्यापी सर्वभूतान्तरात्मा, कृष्ण एव परो देवस्तं ध्यायेत्, अहं सर्वस्य प्रभवो मत्तः सर्वं प्रवर्त्तते, मत्तः परतरं नान्यत् किञ्चिदस्ति धनञ्जय !, वेदैश्च सर्वैरहमेव वेद्य इत्यादि-श्रुतिस्मृतिभ्यः । इति । परमात्मतत्त्वं निरूप्यते वेदान्तकामधेनुदशश्लोकी-भाष्यस्वरूपायां श्रीपुरुषोत्तमाचार्यप्रणीतायां वेदान्तरत्नमञ्जूषायाम् – स्वभावत इत्यादिनात्र 'अथातो ब्रह्मजिज्ञासा' इत्युपक्रमसूत्रार्थमाह – वयं ब्रह्म ध्यायेमेति योजना । ब्रह्मशब्दस्य चतुर्मुखवेदादावपि वृत्तित्वात् तत्रातिप्रसङ्गं वारयन्नाह – परमिति । ब्रह्मपदार्थमाह – कृष्णमिति । परत्वञ्च क्षराक्षराभ्यामुत्कृष्टत्वम् । तस्याश्रयो भगवान् श्रीकृष्ण एव । तथा च स्वयमेव गीतः – 'यस्मात् क्षरमतीतोऽहमक्षरादपि चोत्तमः । अतोऽस्मि लोके वेदे च प्रथितः पुरुषोत्तमः ॥ यो मामेवमसंमूढो जानाति पुरुषोत्तमम् । स सर्वविद्भजति मां सर्वभावेन भारत ॥' इति श्रीकृष्णं पुरुषोत्तमत्वेन जानतः सर्ववित्त्वं प्रतिपादितम् । तस्मात् स एवात्र परब्रह्मशब्दाभिधेय इति सिद्धम् । ध्यायेमेत्यत्र विध्यर्थकप्रथमपुरुषे प्रयोक्तव्येऽपि स्वेषां स्वाभाविकदास्यत्वेन तद्ध्यानाश्रयत्वनिश्चया-दुत्तमपुरुषप्रयोगः 'प्रधानक्षेत्रज्ञपतिः, पतिं पतीनामि'त्यादिश्रुतेस्तस्य तत्स्वामित्वे प्रमाणम् । × × × किं विषयकं ध्यानमत्र विधेयमित्यपेक्षायामाह – कृष्णमि'ति । स च सर्वेश्वरभगवत्पदार्थः स्वभावतोऽपास्तसमस्तदोषो भवति । दोषाश्चाविद्यास्मितारागद्वेषाभिनिवेशाः क्लेशाः पञ्च । त एव तमोमोहमहामोहतामिस्रान्धतामिस्रसंज्ञकाः । स्वरूपावरकं तमः, देहादावात्मबुद्धिर्मोहः, भोगेच्छा महामोहः, तमिस्रः क्रोधः, अतन्नाशे स्वनाश-बुद्धिरन्धतामिस्रश्चेतिविष्णुपुराणे स्पष्टीकृतम् । जन्मास्तित्ववृद्धि-परिणामापक्षयमरणात्मकाः षड् विधा विकाराः प्राकृतगुणकार्यभूताः सुखदुःखादयश्चानन्ता बद्धक्षेत्रज्ञधर्माः । पतितपावने पवित्राणां पवित्रे परब्रह्मणि श्रीकृष्ण एतेषां सर्वेषां दोषाणामत्यन्ताभावः । पूर्णकामो भगवान् श्रीकृष्णो धर्मपालको भूत्वाऽपि परदाराभिमर्शनरूपं प्रतीपं केनाभिप्रायेण ह्याचरदिति परीक्षित्कृतायां जिज्ञासायां श्रीशुकमुनिना श्रीमद्भागवते (१०/३३/३०) महारासक्रीडावर्णने समुपदिश्यते – 'धर्मव्यतिक्रमो दृष्ट ईश्वराणां च साहसम् । तेजीयसां न दोषाय वह्ने सर्वभुजो यथा ॥' इति ।

अशेषदोषात्यन्ताभावश्च सार्वज्ञ्यादिवदसाधारणभावरूपो ब्रह्मणो धर्मविशेषः। तथा च श्रुतिः – 'य आत्मा अपहतपाप्मा विजरो विमृत्युर्विशोको विजिघत्सोऽपिपासः सत्यकामः सत्यसङ्कल्पः', कर्मक्लेशविपाकाद्यै-रस्पृष्टस्याखिलेशितुः। ज्ञानादिषाड्गुण्यनिधेरचिन्त्यविभवस्य ताः ॥ परं पराणां सकला न यत्र क्लेशादयः सन्ति परावरेशे।' इति पराशरोक्तिश्च विष्णुपुराणे। अनेन 'निर्गुणं निष्कलं शान्तं निरवद्यं निरञ्जनमि'त्यादिवाक्यानि व्याख्यातानि। एतेषां वाक्यानां हेयगुणनिषेधविषयो भवति। अर्थात् सर्वेश्वरे श्रीकृष्णे प्राकृतगुणा न भवन्ति। स तु दिव्यमङ्गलगुणसागरो विराजते। परब्रह्म सर्वेश्वरो गुणदोषरहित इति कथनेन निर्विशेषब्रह्मवादः सिद्धो भवतीति शङ्का भवेत्। एतस्याः शङ्काया निवारणार्थं श्रीनिम्बार्कभगवताऽत्र विशेषणं संयोजितम् – 'अशेषकल्याणगुणैकराशिमि'ति। समस्तकल्याणगुणानां राशिर्भगवान् परमेश्वरो नन्दनन्दनः श्रीकृष्णचन्द्र इत्यत्र तात्पर्यम्। कल्याणगुणाश्च ज्ञानशक्तिबलैश्वर्यतेजोवीर्यसौशील्यवात्सल्यार्जवसमसौहार्दसौम्यकारुण्य-स्थिरताधैर्यदयामाधुर्यमार्द्दवस्वामित्वसौलभ्यप्रतिज्ञत्वपूर्णत्वकृतज्ञत्वादयो भवन्ति। एतेषु आद्याः षड्गुणा जगत्सृष्ट्याद्युपकारकाः सर्वेश्वरश्रीकृष्ण-भगवच्छब्दवाच्यपरब्रह्माश्रिता भवन्ति। एतदतिरिक्ताः सर्वेश्वरे श्रीकृष्णे स्वाभाविककल्याणगुणा अनन्ता वर्त्तन्ते। सौशील्यादयश्च गुणाः प्रपन्नभक्तानां रक्षणार्थमुपयोगिनो भवन्ति। एते सर्वे गुणा 'विवक्षितगुणोपपत्तेश्चे'ति ब्रह्मसूत्रे (१/२/२) प्रदर्शिताः। श्रीमद्भागवते (१/१६/२६-२९) चापि 'सत्यं शौचं दया क्षान्तिः ... कीर्त्तिर्मानोऽनहंकृतिरि'त्यादय एकोनचत्वारिंशद्भ्योऽधिका अप्राकृतगुणाः श्रीकृष्णे विराजन्त इति धरणीमुखेन धर्माय समुपदिष्टम्। सर्वेश्वरो भगवान् श्रीकृष्णचन्द्रः स्वीयज्ञानालोकद्वारा सर्वथा सर्वदा चाज्ञानान्धकारादिरूपदोषरहितो विराजते। अत एव श्रीमद्भागवते (१/१/१) सर्वादौ प्रोक्तम् – 'धाम्ना स्वेन सदा निरस्तकूहकम्' इति। एतत्सर्वमभिलक्ष्य श्रीनिम्बार्कमहामुनीन्द्रेण श्रीकृष्णस्तवराजे उक्तम् – 'शान्तिकान्तिगुणमन्दिरमि'त्यादि।

सर्वेश्वरो भगवान् श्रीकृष्णचन्द्रो विश्वसृष्ट्याद्यर्थं साधकानामुपासनार्थं च व्यूहरूपेण विराजते। व्यूहा अवताराश्चाङ्गानि तान्येव विद्यन्ते यस्य स

व्यूहाङ्गी अनन्तमूर्त्तिकः । भगवतः श्रीकृष्णस्यासङ्ख्येया अवतारा भवन्ति । किन्तु स एव अवतारी विराजते 'एते चांशकलाः पुंसः कृष्णस्तु भगवान् स्वयम् ।' 'वस्तुतो जानतामत्र कृष्णं स्थास्नु चरिष्णु च । भगवद्रूपमखिलं नान्यद्वस्त्विह किञ्चन ॥', 'जयति जननिवास' इति श्रीमद्भागवतं (१/३/२८, १०/१४/५६, १०/९०/४८), 'ईश्वरः परमः कृष्णः' इति ब्रह्मसंहिता (५मः अध्यायः)च प्रमाणम् । कंसासुरवधानन्तरं श्रीकृष्णस्य महत्त्वसम्बन्धे उद्धवो नन्दयशोदाभ्यामुद्बोधयति (भागवते १०/४६/४२)– 'युवयोरेव नैवायमात्मजो भगवान् हरिः । सर्वेषामात्मजो ह्यात्मा पिता माता स ईश्वरः॥' इति । व्यूहं चतुर्विधम् – वासुदेवः, सङ्कर्षणः, प्रद्युम्नः, अनिरुद्धश्च । जगदतीतः सर्वाश्रयः षड्गुणाश्रयो भगवान् हि वासुदेवः । विश्वव्यापिसूक्ष्मतमप्रकृति-तदङ्गीभूतस्थूलसूक्ष्मसमस्तजगतो नियन्ता सङ्कर्षणः । अयमनन्त-ब्रह्माण्डस्यान्तर्यामी करुणार्णवशायी पुरुषः । विश्वव्यापिस्थूलसूक्ष्मदेहविशिष्ट-महत्तत्त्वाधिष्ठितः पुरुषः प्रद्युम्नः । अयं ह्येकस्य ब्रह्माण्डस्य स्थूलसूक्ष्मचराचराणामन्तर्यामी पुरुषः । अयञ्च हिरण्यगर्भस्याप्यन्तर्यामी । अयं गर्भोदशायी नारायणः । क्षितितत्त्वादारभ्याहंतत्त्वपर्यन्तं यस्य देहः स सर्वभूतस्थो विश्वव्यापी अहंतत्त्वाधिष्ठितः पुरुषोऽनिरुद्धः । अयं सर्वेषां व्यष्टिजीवानां हृदयस्थितोऽन्तर्यामी पुरुषः । अयं हि क्षीरोदशायी नारायणः । श्रीकृष्णः चतुर्विधव्यूहरचनापूर्वकं निर्गुणस्वरूपेण सर्वेषामलक्ष्यीभूतभावेन विराजते । कठोरसाधनादिबलेन कश्चिदेतच्चतुर्व्यूहं नातिक्रामेच्चेत् स तस्य साक्षात्कारं न प्राप्नुयात् ।

सर्वेश्वरब्रह्मस्वरूपं भगवता श्रीनिम्बार्काचार्येण सिद्धान्तितमेवं यथा – ब्रह्म सच्चिदानन्दस्वरूपम् । अनेन स्वरूपेण तत् स्थूलसूक्ष्महृस्वदीर्घादि भवति । तत् कर्त्तृत्वादिसर्वप्रकारधर्मवर्जितम् । अत एव तदेकमद्वितीयं, निर्गुणमक्षरं तुरीयस्वरूपम् । निर्गुणमक्षरं ब्रह्म अचिन्त्यविचित्रसंस्थान-सम्पन्नस्यानन्तनामरूपविशिष्टस्यास्य जगतः सृष्टिस्थितिलयकारणम् । तदेवास्य च निमित्तोपादानोभयकारणम् । अत एव तत् सर्वज्ञं सर्वशक्ति सर्वनियन्तृ सर्वव्यापि सर्वरूपि च । अनेन स्वरूपेण तस्य हीश्वरसंज्ञा । तदेव ब्रह्म हि स्वयं स्वीयस्वरूपगतचिच्छक्तिमनन्तरूपेण प्रसार्य स्वस्वरूपात् प्रकाशितस्य

तथा चाभिन्नस्यास्यानन्तजगतो बृहद्बृहत्तरबृहत्तम-क्षुद्रक्षुद्रतरक्षुद्रतमेषु चांशेषु पृथक्पृथग्रूपेण प्रविष्टं वर्त्तते । अनेन पृथक्पृथग्रूपेण तस्य चिदंशो जीवः। तदेव ब्रह्म च यदनन्तनामरूपैः प्रकाशितं यस्य च प्रत्येकमंशे तद्धि भोक्तृजीवरूपेण प्रविष्टं तस्य संज्ञा च जगदस्ति । एतेन चतुर्विधरूपेण सर्वेश्वरः श्रीकृष्णचन्द्रः पूर्णतया विराजते ।

सर्वेश्वरः श्रीकृष्णः परमसौन्दर्यमयः । स एव पद्मलोचनो भवति । स नित्यमानन्दस्वरूपः । सर्वेषां दुःखशोकहरणकारित्वाच्च सोऽपि हरिरिति कीर्त्यते । विशेषविवेचनन्तु श्रीकेशवकाश्मीरिभट्टाचार्यकृतवेदान्तकौस्तुभप्रभा-अखिलभारतीयश्रीनिम्बार्काचार्यपीठविराजितजगद्गुरुश्रीराधासर्वेश्वर-शरणदेवाचार्यश्रीश्रीजीमहाराजपादकृतवेदान्तकामधेनुनवनीतसुधा-श्रीस्वभूरामदेवाचार्य-परम्परानुवर्त्तिव्रजविदेहि-चतुःसम्प्रदायश्रीमहान्त-श्रीधनञ्जयदासकाठियाबाबाकृतवेदान्तकामधेनुतत्त्वदीपिकाग्रन्थेषु समवलोकनीयम् ।

सर्वे अवताराः श्रीकृष्णस्य अंशविशेषाः भवन्ति । तदुपदिष्टं श्रीमद्भागवते (१/३/२७,२८) – 'ऋषयो मनवो देवा मनुपुत्रा महौजसः । कलाः सर्वे हरेरेव सप्रजापतयस्तथा ॥ एते चांशकलाः पुंसः कृष्णस्तु भगवान् स्वयम् । इन्द्रारिव्याकुलं लोकं मृडयन्ति युगे युगे ॥' इति । परब्रह्मश्रीकृष्ण-भिन्नाभिन्नात्मिका परमाह्लादिनीशक्तिर्भवति श्रीराधा । परमेश्वरस्य ब्रह्मणः साधारणतः स्वाभाविका शक्तिस्त्रिधा – अन्तरङ्गा, तटस्था, बहिरङ्गा चेति । अन्तरङ्गा पराशक्तिः । इयं पराशक्तिरन्तरङ्गा सन्धिनी, संवित्, ह्लादिनी चेति भेदेन त्रिविधा वर्त्तत इति विष्णुपुराणवचनं (१/१२/६९) प्रमाणम् ।

पराभ्यामपि परा चेयं ह्लादिनी शक्तिर्भवति श्रीराधा । नारदपञ्चरात्रे (५/५/११) पद्मपुराणे पातालखण्डे (८९/५३) चैतत्प्रतिपादितम् । राध्नोति साधयति कार्याणीति राधा । राध्नोति सृजति पालयति जगदिति वा राधा । अनेनैतस्याः श्रीराधिकाया अलौकिकं सर्वोत्कृष्टञ्च महत्त्वमत्र द्योतितम् । परब्रह्म श्रीकृष्ण एतस्या आराधनां करोति, एतस्मादियं राधा भवति । 'जगद्भर्तुर्विश्वसम्मोहनस्य श्रीकृष्णस्य प्राणतोऽधिकामपि । वृन्दारण्ये स्वेष्टदेवीं

च नित्यं तां राधिकां वनधात्रीं नमामः ॥' इति श्रुतेश्च । श्रीमद्भागवतमहापुराणे स्पष्टभावेन श्रीराधायाः प्रतिपादनाभावेऽपि 'अनयाऽऽराधितो नूनं भगवान् हरिरीश्वरः ।' इति तत्र (१०/३०/२८) परोक्षेण तस्या नित्यं विराजमानत्वं सूच्यते । इयं सर्वदा श्रीकृष्णमारधत्ते, एतस्मादियं राधेति कथ्यते । एतस्याः परमप्रेमाधिष्ठातृत्वं वर्त्तते । 'अनाद्योऽयं पुरुष एक एवास्ति, तदेव रूपं विधाय सर्वान् रसान् समाहरति, स्वयमेव नायिकारूपं विधाय समाराधनतत्परोऽभूत्, तस्मात्तां राधां रसिकानन्दां वेदविदो वदन्ति ।' इति श्रीमदनन्तरामदेवविरचिततत्त्वसिद्धान्तबिन्दुधृत-सामवेदसंहिताया उत्तरार्च्चिकश्रुतेः श्रीराधा परब्रह्मैव । अत एव श्रूयते ऋक्परिशिष्टे – 'राधया माधवो देवो माधवेन च राधिका विराजत' इत्यादि । व्रजाङ्गना द्वारकास्थाः श्रीकृष्णपट्टमहिष्यः श्रीलक्ष्मीश्चास्याः श्रीराधादेव्या अंशरूपा भवन्ति । श्रीराधाकृष्णावेकरससागरो विराजमानोऽपि शरीरेण क्रीडार्थं द्वौ भवत इति अथर्ववेदीयराधोपनिषद्वचनं प्रमाणम् । इयं श्रीराधा श्रीहरेः सर्वेश्वरी, सम्पूर्णसनातनी विद्या च भवति । श्रीकृष्णस्य प्राणाधिष्ठात्री-देवीरूपेणेयं विराजते । अस्याः करुणया परमधाम लब्धुं शक्यते । यः खलु रासेश्वरीं श्रीराधां न ज्ञात्वा श्रीकृष्णमुपास्ते स मूढतमो भवति । श्रीराधोपनिषदि सकलमेतदुपन्यस्तम् । श्रीराधाया अष्टाविंशति नामानि तत्र श्रूयन्ते यथा – 'राधा रासेश्वरी रम्या कृष्णमन्त्राधिदेवता । सर्वाद्या सर्ववन्द्या च वृन्दावनविहारिणी ॥ वृन्दाराध्या रमाऽशेषगोपीमण्डलपूजिता । सत्या सत्यपरा सत्यभामा श्रीकृष्णवल्लभा ॥ वृषभानुसुता गोपी मूलप्रकृतिरीश्वरी । गान्धर्वा राधिका रम्या रुक्मिणी परमेश्वरी ॥ परात्परतरा पूर्णा पूर्णचन्द्रनिभानना । भुक्तिमुक्तिप्रदा नित्यं भवव्याधिविनाशिनी ॥' इति । सर्वा देवताः स्थावरजङ्गमात्मकानि सर्वाणि भूतानि च श्रीराधिकाया उत्पद्यन्ते, तद्धेतोश्च तिष्ठन्ति । श्रूयते तद्यथा श्रीराधोपनिषदि – 'सर्वाणि राधिकाया दैवतानि सर्वाणि भूतानि राधिकाया' इति । पुनश्च तत्रैव – 'तस्याद्या प्रकृती राधिका नित्या निर्गुणा सर्वालङ्कारशोभिता प्रसन्नाशेषलावण्यसुन्दरी । अस्मदादीनां जन्म तदधीनम् ।' इति । नित्यनिकुञ्जेश्वर्याः श्रीराधाया दिव्यतेजसा इन्द्रनीलमणिसमश्रीकृष्णस्य श्यामविग्रहोऽपि गौरवर्णविशिष्टो भवतीति तत्रैव

श्रुतिः प्रमाणम् । यथा श्रीकृष्णभगवतो विग्रहगुणादिस्तथैव श्रीराधाभगवत्या इति विष्णुपुराणे (१/९/१४३) महर्षिणा पराशरेणोक्तम् । अत एव महाभावस्वरूपेयं श्रीराधा विराजते ।

एवं वैशिष्ट्यपूर्णं राधातत्त्वं निरूपयन्नुपदिशति परमकारुणिको भगवान् श्रीनिम्बार्काचार्यजगद्गुरुवर्यो वेदान्तकामधेनुदशश्लोक्याम् (५) –

'अङ्गे तु वामे वृषभानुजां मुदा विराजमानामनुरूपसौभगाम् ।

सखीसहस्रैः परिसेवितां सदा स्मरेम देवीं सकलेष्टकामदाम् ॥' इति ।

वेदान्तकामधेनुग्रन्थोपरि श्रीनिम्बार्काचार्यपीठविराजितैराचार्यवर्यैः पुरुषोत्तमाचार्यपाद-प्रभृतिभिर्विरचितेषु वेदान्तरत्नमञ्जूषेत्याद्याख्यभाष्यग्रन्थेषु प्रातःस्मरणीयेन वर्त्तमानश्रीनिम्बार्काचार्यपीठाधीश्वरेण जगद्गुरुणा श्री'श्रीजी'महाराजेन श्रीराधासर्वेश्वरशरणदेवाचार्येण विरचितो 'नवनीतसुधा' इत्याख्यो व्याख्याग्रन्थः सरलो भावगम्भीरश्च वरीवर्त्ति । व्याख्यातं तत्रेदं राधातत्त्वं तेनैव जगद्गुरुणा यथा – 'परब्रह्मभगवतो वामे अङ्गे मुदा सानन्दं विराजमानां स्थितां, सखीसहस्रैः सहस्रशब्दोऽनन्तानन्तवाची, अनन्तसखीभिरित्यर्थः । परिसेवितां – समन्तात्सेव्यमानां, सकलेष्टकामदां – भक्तेभ्यस्तदभीष्टसमस्तकामान् ददातीति सा, तां देवीं – दिव्यस्वरूपां वृषभानुजां – श्रीराधिकां श्रीकृष्णाह्लादिनीं दिव्यप्रेमाधिष्ठात्रीं परमां शक्तिं स्मरेम वयमिति शेषः । इत्यन्वयार्थः ।

वृन्दावनाधीश्वरी नित्यनिकुञ्जेश्वरी सर्वेश्वरी श्रीराधा कृष्णस्वरूपैव भगवान् सर्वेश्वरः श्रीकृष्णश्च राधास्वरूपात्मको यथा हि – 'यः कृष्णः सैव राधा या राधा सैव कृष्ण' 'एकं ज्योतिरभूद्द्वेधा राधामाधवरूपकमि'त्यादि श्रुतिस्मृतिप्रतिपादितसिद्धान्तानुसारेण, तथा महावाणीरसग्रन्थकर्त्तृभिः श्रीहरिव्यासदेवाचार्यचरणैरपि महावाण्यां 'राधां कृष्णस्वरूपां वै कृष्णं राधास्वरूपिणम्' इति निरूपितेन सच्चिन्मयगोलोकस्थदिव्यवृन्दावन-नित्यनिकुञ्जेश्वर्याः श्रीराधाया नामग्रहणेन मुख्यत्वमेवाभिव्यञ्जितम् । इयञ्च शक्तिः प्रेरयितृतत्त्वान्तर्गता, नाऽतो 'भोक्ता भोग्यं प्रेरितारं च मत्वा' इतिश्रुत्युक्ततत्त्वत्रयाधिक्यत्वातिप्रसङ्ग इत्यपि नो विस्मर्त्तव्यम् । श्लोकेऽस्मिन्निखिलजगदभिन्ननिमित्तोपादानकारणस्य सर्वनियन्तुः श्रीसर्वेश्वरस्य

भगवतः श्रीकृष्णस्यानिर्वचनीया परमप्रियतमा परमाह्लादिनी शक्तिः सर्वेश्वरी श्रीराधा तस्याश्चानन्तस्वरूपशक्तिर्निरूपिता श्रीमदाद्याचार्यवर्यैः श्रीभगवन्निम्बार्काचार्यचरणैः। विस्तृतविवेचनन्तु 'मञ्जूषायाम्' उत श्रीहरिव्यासदेवाचार्यपादविरचित'सिद्धान्तरत्नाञ्जली' इत्याख्यवेदान्तग्रन्थे समवलोकनीयं वेदान्ततत्त्वजिज्ञासुभिः प्रज्ञावद्भिः।' इति।

श्री'श्रीजी'महाराजगुरुकल्पस्य श्रीस्वभूरामदेवाचार्यपरम्परानुयायिन आचार्यस्य श्रीमहान्तधनञ्जयदासकाठियाबाबामहाराजस्य 'तत्त्वदीपिका'ख्यो वङ्गभाषानिबद्धटीकाग्रन्थोऽपि महत्त्वपूर्णः। अत्र श्रीधनञ्जयदासकाठियाबाबा-पादकर्तृकव्याख्यानस्य यथावश्यकं सारभागस्य संस्कृतानुवाद उपस्थाप्यते – श्रीराधाकृष्णयुगलमूर्त्तेरुपासनया तत्कालमपि आनुसङ्गिकभावेनोपासकस्य कामवृत्तिरूपहृद्रोगः स्वतो दूरीभूतो भवति।××× मदीयश्रीगुरुचरणैरुक्तम् – भगवतः पुरुषमूर्त्तिषु श्रीकृष्णमूर्त्तिरिव स्त्रीमूर्त्तिषु श्रीराधामूर्त्तिः प्रधाना। ××× सशक्तिकभगवन्मूर्त्तेरुपासनाया यत्सकलं महत्फलं तेषु एतदेकं विशिष्टं यत् एतत् संसाधकस्य कामवृत्तेः निवृत्तिं यथाशीघ्रं करोति ; भगवता सह संयुक्तभावेन भक्तिपूर्वकं स्त्रीमूर्त्तेरर्च्चनद्वारा स्त्रीमूर्त्तिं प्रति कामभावस्तिरोहितो भवति।' ××× शास्त्रप्रमाणतोऽत्र संक्षेपेण अधिकं किञ्चित् राधातत्त्वमालोच्यते। बृहद्गौतमीयतन्त्रे उक्तम् – श्रीराधा देवीषु श्रेष्ठा। इयं कृष्णमयी, सर्वलक्ष्मीमयी, सर्वविधलावण्यसौन्दर्यादीना-माधाररूपा, सर्वेषां मोहकारिणी च। इयं महाभावस्वरूपा। नारदपञ्चरात्रे उक्तम् – श्रीकृष्णो हि जगत्पिता, श्रीराधा च जगन्माता। सृष्टिकाले मूलप्रकृतिरीश्वरी श्रीराधा महाविष्णोर्माता भवति। अस्याः श्रीराधाया वामाङ्गात् महालक्ष्मीराविर्भूता भवति। इयं राधा हि भगवतः श्रीकृष्णस्य सर्वविधैश्वर्याणामधिष्ठात्री देवी। एतया स्वरूपशक्त्या श्रीराधया श्रीकृष्णस्य सर्वप्रकारविभूतीनां प्रकाशो भवतीत्यादि। मत्सम्पादिते तत्त्वसुधासंस्कृतटिप्पणी- उत्कलभाषाभावार्थ-प्रभृतिसंवलिते वेदान्तकामधेनुदशश्लोकीग्रन्थे जिज्ञासुभिरेतदवलोकयितुं शक्यते।

श्रीराधाकृष्णयुगलरूपब्रह्मणो लीला दिव्यानन्दरूपिणी। तस्मादानन्दादेव जगत्सृष्टिः, तस्मिन्नेव च जगत्स्थितिः। परमाह्लादिनी श्रीराधा हि सर्वाधारा। सैव परब्रह्मणः श्रीकृष्णस्य सर्वस्वमेव। अत एव

अस्मदुत्कलजननीवरपुत्रो भक्तकविर्जयदेवो गीतगोविन्दमहाकाव्ये (३/१, १०/३) समुपस्थापयति यथा –

'कंसारिरपि संसारवासनाबन्धशृङ्खलाम् । राधामाधाय हृदये तत्याज व्रजसुन्दरीः ॥' 'त्वमसि मम जीवनं त्वमसि मम भूषणं त्वमसि मम भव-जलधिरत्नम् । भवतु भवतीह मयि सततमनुरोधिनी तत्र मम हृदयमतियत्नम् ॥' इति ।

भेदाभेदविमर्शः –

श्रीनिम्बार्कदर्शनानुसारेण चिदचित्पदार्थौ तावत् ब्रह्मणो न भिन्नौ भवतः। एतस्य प्रमाणं यथा –

(क) अजामेकां लोहितशुक्लकृष्णामित्यादि । (श्वेताश्वतर ४/५)

(ख) त्रिगुणं तज्जगद्योनिरनादिप्रभवाप्ययम् ।
अचेतना परार्था च नित्या सततविक्रिया ॥

(ग) तदधीनत्वादर्थवत् । (ब्रह्मसूत्रम् १/४/३)

(घ) आदित्यवर्णं तमसः परस्तात् । (श्वेताश्वतर ३/८)

(ङ) अणुर्ह्येष आत्मा ।

(च) अस्ति खल्वणुपरो भूतात्मा योऽयं सितासितैः कर्मफलैरभिभूयमानः। (मैत्रायण्युप. ३/२)

(छ) अथ नित्यानि ह वै पुरुषः, प्रकृतिः, कालः । इत्यादि ।

ब्रह्म चित्पदार्थात् अभिन्नमपि भवति । एतस्य प्रमाणं यथा –

(क) सदेव सौम्येदमग्र आसीदेकमेवाद्वितीयम् । (छान्दो.६/२/१)

(ख) आत्मा वा इदमेक एवाग्र आसीत् । (ऐतरेय. १/१/१)

(ग) तत्त्वमसि । (छान्दोग्योप. ६/८/७)

(घ) त्वं वा अहमस्मि भगवो देवते ।

(ङ) अयमात्मा ब्रह्म । (बृहदारण्यकोप. २/५/१९)

(च) तदात्मानमेव वेदाहं ब्रह्मास्मि । (बृहदा.१/४/१०) इत्यादि ।

इत्थमुभयविधप्रमाणैः ब्रह्म चिदचित्पदार्थाभ्यामभिन्नं भिन्नं चेति स्थिरीकृत्य श्रीनिम्बार्कसम्प्रदायाचार्यैः श्रीश्रीनिवासाचार्यचरणैः वेदान्तकौस्तुभे (१/१/१) सिद्धान्तितं यथा – 'एवं चोभयविधवाक्यानां स्वार्थे प्रामाण्यात्

चिदचितोर्भिन्नस्वरूपयोरपीन्द्रियाणां भिन्नस्वरूपाणामपि 'न वै वाचो न चक्षूंषि न श्रोत्राणि न मन इत्याचक्षते ।' इति छान्दोग्ये (५/१/१५) प्राणेन्द्रियसम्वादे प्रसिद्धानां प्राणायत्तत्वादेव प्राणाभिन्नत्ववद्ब्रह्मायत्तस्थितिप्रवृत्तिमत्त्वेन ब्रह्माभिन्नत्वाच्चिदचिद् 'भिन्नाभिन्नं जिज्ञास्यं' ब्रह्मसूत्रकाराभिमतम् ॥' इति । वेदान्तदर्शनस्य यः खलुविषयः प्रदर्शितस्तस्मिन्नपि स्वाभाविकभेदाभेदो निरूपितः । तदुक्तं तेन तत्रैव – 'विषयश्चास्य ब्रह्मादिशब्दाभिधेयः सर्वज्ञः स्वाभाविकाचिन्त्यानन्तयावदात्मवृत्तिगुणशक्त्याद्याश्रयो ब्रह्मरुद्रेन्द्र-प्रकृतिपरमाणुकालकर्मस्वभावादिनियन्ता दोषास्पृष्टसीमा चिदचित्स्वाभाविकः भेदाभेदाश्रयो भगवान् वासुदेवः श्रीपुरुषोत्तमः ।' इति ।

भेदाभेदसिद्धान्तो ब्रह्मसूत्रञ्च –

जीवेन जगता च सह ब्रह्मणो भेदाभेदसम्बन्धं कृष्णद्वैपायनवेदव्यासो वेदान्तदर्शने सर्वत्र भावतः स्थलविशेषे स्पष्टतः सूत्ररूपेणोपदिशतीति श्रीनिम्बार्काचार्यो निगदति । इत्थं भेदाभेदसम्बन्धं स्थापयित्वा वेदव्यासो जीवं जगच्च ब्रह्मणोऽंशमात्रमित्युपदिशति । एवञ्चायमेव हि सर्वेषां श्रुतिवाक्यानाम् अभिप्रेतसिद्धान्त इति स स्थापयति । भेदाभेदसिद्धान्तमाधारीकृत्य वेदान्तदर्शनस्य कतिचन सूत्राणि श्रीनिम्बार्काचार्य-श्रीश्रीनिवासाचार्यकृतभाष्यसहितान्यत्र समुपस्थाप्यन्ते ।

तत्र जीवविषये यथा **(जीवः)** –

'अंशो नानाव्यपदेशादन्यथा चापि दाशकितवादित्वमधीयत एके॥' इति **ब्रह्मसूत्रे** (२/३/४२) ।

वेदान्तपारिजातसौरभभाष्ये तु –

अंशांशिभावाज्जीवपरमात्मनोर्भेदाभेदौ दर्शयति – परमात्मनो जीवोऽंशः, 'ज्ञाज्ञौ द्वावजावीशानीशावि'त्यादिभेदव्यपदेशात्, 'तत्त्वमसी'त्याद्यभेदव्यपदेशाच्च । अपि च आथर्वणिका 'ब्रह्मदाशा ब्रह्मदासा ब्रह्मेमे कितवा' इति ब्रह्मणो हि दाशकितवादित्वमधीयते ॥ इति ।

वेदान्तकौस्तुभभाष्ये तु –

जीवस्य कर्त्तृत्वं ब्रह्माधीनमित्युक्तमिदानीं भेदाभेदश्रुत्यविरोधेन तयोः सम्बन्धमाह – किमयञ्जीवो ब्रह्मणो भिन्नः, उताभिन्नः, आहोस्वित् ब्रह्मणोंशोऽतो

भिन्नाभिन्नः ? इति संशये, राज्ञः सकाशात्पुरुष इव परमात्मनः सकाशाज्जीवो भिन्नोऽस्तु, अभेदवाक्यानां गौणत्वादज्ञसर्वज्ञयोरभेदासम्भवाच्च । अथवाऽभिन्न एवास्तु, भेदश्रुतीनां गौणत्वात् । भेदाभेदयोरन्योऽन्यविरुद्धत्वादभेदश्रुतीनां भेदश्रुतीनां वाऽवश्यं गौणत्वमङ्गीकर्त्तव्यम्, इति प्राप्तेऽभिधीयते । नायञ्जीवः श्रीपुरुषोत्तमादत्यन्तभिन्नः नाप्यत्यन्ताभिन्नः, किन्तु परमात्मनोऽंशः 'अंशो ह्येष परस्ये'ति श्रुतेः । अंशो हि शक्तिरूपो ग्राह्यः 'एष परस्य शक्तिः जीवोऽल्पशक्तिरस्वतन्त्र' इति श्रुतेः । खण्डरूपो घनादिवदंशो नेह गृह्यते, जीवस्य ब्रह्मखण्डत्वे 'निष्कलमि'त्यादिवाक्यविरोधाद्घनवदंशत्वे केवलभेदापत्तेः, 'तत्त्वमसी'त्यादिवाक्यव्याकोपप्रसङ्गाच्च । अंशित्वावच्छिन्नात्परमपुरुषस्वरूपात्सार्वज्ञ्यादिगुणगणनिधेरंशत्वावच्छिन्नेन बन्धमोक्षार्हेण स्वरूपेण भिन्नोऽप्यंश्यधीनस्थितिप्रवृत्त्यादिमत्त्वात्तदभिन्नः । कुतः ? 'नानाव्यपदेशात्' भेदव्यपदेशात् । 'अन्यथा च' अभेदव्यपदेशाच्च । उभयविधवाक्यानां तुल्यबलत्वात् जीवपरमात्मनोः स्वाभाविकौ भेदाभेदौ भवत इत्यर्थः । 'य आत्मानमन्तरो यमयति, अन्तःप्रविष्टः शास्ता जनानाम्, आत्मा हि परमः स्वतन्त्रोऽधिगुणः, जीवोऽल्पशक्तिरस्वतन्त्रोऽवरः, ज्ञाज्ञौ द्वावजावीशानीशौ' इत्यादिभेदव्यपदेशः । 'तत्त्वमस्ययमात्मा ब्रह्म अहम्ब्रह्मास्मी'त्याद्यभेदव्यपदेशः । अपि चैके शाखिनः आथर्वणिकाः 'ब्रह्मदाशा ब्रह्मदासा ब्रह्मेमे कितवा' इत्येवं ब्रह्मणो दाशकितवादित्वमधीयते ॥ इति ।

'मन्त्रवर्णात् ॥' इति ब्रह्मसूत्रे (२/३/४३) ।

वेदान्तपारिजातसौरभभाष्ये तु –

'पादोऽस्य विश्वाभूतानी'ति मन्त्रवर्णाज्जीवो ब्रह्मांशः' । इति ।

वेदान्तकौस्तुभभाष्ये तु –

परमात्मनोऽंश एव जीवः । कुतः ? 'पादोऽस्य विश्वाभूतानि त्रिपादस्यामृतं दिवी'ति मन्त्रवर्णाच्च पादोऽंशः । इति ।

'अपि च स्मर्यते ॥' इति ब्रह्मसूत्रे (२/३/४४) ।

वेदान्तपारिजातसौरभभाष्ये तु –

'ममैवांशो जीवलोके जीवभूतः सनातनः' इति जीवस्य ब्रह्मांशत्वं स्मर्यते । इति ।

वेदान्तकौस्तुभभाष्ये तु –

'ममैवांशो जीवलोके जीवभूतः सनातनः' इति जीवस्य स्वांशत्वं श्रीपुरुषोत्तमेनैव स्मर्य्यते । इति ।

एतेभ्यो वाक्येभ्यो ज्ञायते यत् जीवो ब्रह्मणो भिन्नः अभिन्नश्चेति सम्बन्धे ब्रह्मसूत्रे यानि सूत्राणि सन्ति तेषां मुख्यार्थग्रहणं हि सूत्रकाराभिप्रेतम् । अंशः सर्वदा अंशिनः अभिन्नः, अंशिनो भिन्नं किञ्चिदपि वस्तु अंशमध्ये न स्यात् । अपि च अंशात् अंशी अधिक इति हेतोः अंशः अंशिनः भिन्नः । अत एव अंशाऽशिनोर्मध्ये भेदाभेदसम्बन्धः । जीवो ब्रह्मणः अंश इति हेतोः यथा ब्रह्मनित्यं तथा जीवोऽपि नित्यः । सूत्रकारेण एतदेव प्रतिपादितम् । तदत्र ससूत्रं सभाष्यं च उपस्थाप्यते ।

'चराचरव्यपाश्रयस्तु स्यात्तद्व्यपदेशो भाक्तस्तद्भावभावित्वात् ।।' इति **ब्रह्मसूत्रे** (२/३/१६) । **वेदान्तपारिजातसौरभभाष्ये तु –**

जीवात्मा निर्णीयते । 'देवदत्तो जातो मृत' इति व्यपदेशो गौणोऽस्ति, यतः 'चराचरव्यापाश्रयः', शरीरभावे जन्ममरणयोर्भावित्वात् ।। इति ।

वेदान्तकौस्तुभभाष्ये तु –

अजात्परस्माद्ब्रह्मणो वियदादेर्जनिरुक्ता, तद्वज्जीवस्य जन्मत्वमस्ति न वेति इदानीं चिन्त्यते । अग्रिमसूत्रादात्मेतिपदं लभ्यते । आत्मा जीवात्मोत्पद्यते न वेति संशये, 'देवदत्तो जातो मृत' इति व्यपेदेशादात्मा जायते विनश्यति चेति पूर्वपक्षस्तुशब्देनापनीयते । योऽयमात्मन उत्पत्तिविनाशयोर्व्यपदेशो लौकिकः स भाक्तः स्यात्, जीवविषये गौणोऽस्तीत्यर्थः । क्व तर्हि मुख्य इत्यत आह – **'चराचरव्यपाश्रयः'** इति । जङ्गमाजङ्गमशरीरविषय इत्यर्थः । कुतः ? **'तद्भावभावित्वात्'** । तद्भावे शरीरभावे उत्पत्तिविनाशयोर्भावित्वात्, 'अयं पुरुषो जायमानः शरीरमभिसम्पद्यमानः स उत्क्रामन् म्रियमाणः' इति श्रुतेः । इति ।

'नात्माऽश्रुतेर्नित्यत्वाच्च ताभ्यः ।।' इति **ब्रह्मसूत्रे** (२/३/१७) ।

वेदान्तपारिजातसौरभभाष्ये तु –

जीवात्मा नोत्पद्यते । कुतः ? स्वरूपतस्तदुत्पत्तिवचनाभावात्, 'न जायते म्रियते वा विपश्चित्, नित्यो नित्यानाम्, अजो ह्येको जुषमाणोऽनुशेते' इत्यादिश्रुतिभ्यो जीवस्य नित्यत्वावगमाच्च । इति ।

वेदान्तकौस्तुभभाष्ये तु –

ननु 'स्वर्गकामो यजेते'त्यादिवाक्यात् लोकान्तरगतैश्वर्योपायादिलक्षणात् 'देवदत्तो जातो मृत' इति व्यपदेशः शरीरजन्मनाशविषयो भवतु, किन्तु सृष्टिसंहारकालिकौ किलाऽऽकाशादेरिव जीवस्यापि जन्मनाशौ स्यातां, न तथा केनापि वाक्येन कश्चिद्विरोध इति । अत्र ब्रूमः – 'नाऽऽत्माश्रुतेरि'ति । आत्मेत्येकवचनं जात्यभिप्रायम् । 'नित्यो नित्यानां चेतनश्चेतनानामि'ति जीवबहुत्वबोधकश्रुतेः, 'असन्ततेश्चाव्यतिकर' इति वक्ष्यमाणाच्च आत्मा न जायते न च म्रियते । कुतः ? 'अश्रुतेः' । सृष्टिसंहारकालिकात्मजन्मनाशविषयकश्रुत्यभावात् । प्रत्युत ताभ्यः 'अविनाशी वा अरे ! अयमात्माऽनुच्छित्तिधर्मा, न जायते म्रियते वा विपश्चित्, नित्यो नित्यानां चेतनश्चेतनानामेको बहूनां यो विदधाति कामान्, ज्ञाज्ञौ द्वावजावीशानीशौ, अजो ह्येको जुषमाणोऽनुशेते जहात्येनां भुक्तभोगामजोऽन्य' इत्यादिभ्यः श्रुतिभ्य आत्मनो नित्यत्वावगमाच्च । 'न त्वेवाहं जातु नासं न त्वं नेमे जनाधिपाः । न चैव न भविष्यामः सर्वे वयमतः परम् ॥ अजो नित्यः शाश्वतोऽयं पुराणो न हन्यते हन्यमाने शरीरे । वेदाविनाशिनं नित्यं य एनमजमव्ययम् । कथं स पुरुषः पार्थ ! कं घातयति हन्ति कम् ॥' इत्यादिस्मृतिभ्यश्च । ननु 'सर्वे एत आत्मनो व्युच्चरन्ति, यतः प्रसूता जगतः प्रसूतिस्तोयेन जीवान्विससर्ज भूम्याम्, प्रजापतिः प्रजा असृजत, सन्मूलाः सौम्येमाः सर्वाः प्रजाः सदायतनाः सत्प्रतिष्ठाः, यतो वा इमानि भूतानि जायन्ते, येन जातानि जीवन्ति यत्प्रयन्त्यभिसंविशन्ति इत्याद्याः सचेतनजगदुत्पत्तिवादिन्यः श्रुतयः सन्ति । तस्माज्जीवस्य जन्मनाशनिषेधो न युक्तः । अत एवैकविज्ञानेन सर्वविज्ञानप्रतिज्ञासिद्धिरिति चेन्न ।उक्तश्रुतीनां प्रलयकालिकस्वास्थ्यपरित्यागपूर्वकदेहादिसंयोगहेतुकज्ञानविकाशलक्षणजीवोद्भवबोधकत्वादेवं सति जीवस्यापि ब्रह्मकार्यत्वात् तादृशप्रतिज्ञासिद्धेश्च 'सदेव सौम्येदमग्र आसीदेकमेवाद्वितीयम्' इत्यविभक्तनामरूपशक्तिकं स्वसमानातिशयशून्यं कारणावस्थं ब्रह्म कार्यकालेऽभिव्यक्तनामरूपशक्तिमत्तया स्वयमेव भोक्तृभोग्यनियन्तृरूपेण त्रिधाऽवस्थितं भवतीति । नेह केनचिद्वाक्येन विरोध इति सिद्धम् ॥ इति ।

प्रोक्तेष्वेतेषु सूत्रेषु जीवो ब्रह्मणः शक्तिरूपः अंश इति प्रतिपादितम् । एतदतिरिच्य अन्येषु सूत्रेष्वपि एवं विचारः द्रष्टुं शक्यते ।

'अधिकं तु भेदनिर्देशात् ॥' इति ब्रह्मसूत्रे (२/१/२१) ।

वेदान्तपारिजातसौरभाष्ये तु –

तत्परिहारः – सुखदुःखभोक्तुः शारीरादधिकमुत्कृष्टं ब्रह्म जगत्कर्त्तृ ब्रूमः । 'आत्मानमन्तरो यमयती'ति भेदव्यपदेशान्न तयोरत्यन्ताभेदोऽस्ति, यतो हिताकरणादिदोषप्रसक्तिः स्यात् ॥ इति ।

वेदान्तकौस्तुभाष्ये तु –

इति पूर्वपक्षे सिद्धान्तमाह । तुशब्दः पूर्वपक्षं व्यावर्त्तयति । यतः शारीरात्सर्वज्ञं सर्वशक्तिं सर्वेश्वरं समानातिशयशून्यं जगदभिन्ननिमित्तोपादान-कारणमधिकमुत्कृष्टं ब्रह्म ब्रूमः, अतो हिताकरणादिदोषप्रसक्तिर्नास्ति । अधिकत्वे हेतुः 'भेदनिर्देशादिति' । आत्मा वा अरे ! द्रष्टव्यः, ब्रह्मविदाप्नोति परं, परं य आत्मानमन्तरो यमयती'ति ब्रह्मजीवयोर्भेदनिर्देशात् । अयमर्थः । यथा 'सर्वं खल्विदं ब्रह्मे'त्यत्राचिद्वर्गस्य स्वरूपेण ब्रह्माभिन्नत्वासम्भवा-त्तज्जत्वादिना ब्रह्मभिन्नत्वमङ्गीक्रियते, तथा शारीरस्योक्तभेदश्रुतिप्रामाण्यात् स्वरूपतो ब्रह्मभिन्नत्वासम्भवाद्ब्रह्मनिरपेक्षस्थितिप्रवृत्त्यभावाद्ब्रह्माभिन्नत्वं 'तत्त्वमस्या'दिवाक्यैरभिधीयते, न तु स्वरूपतः । एवमभेदेऽपि भेदव्यपदेशान्नेह हिताकरणादिदोषप्रसक्तिरिति ॥ इति ।

'अश्मादिवच्च तदनुपपत्तिः ॥' इति ब्रह्मसूत्रे (२/१/२२) ।

वेदान्तपारिजातसौरभाष्ये तु –

भूविकारवज्रवैदूर्यादिवद्ब्रह्माभिन्नोऽपि क्षेत्रज्ञः स्वरूपतो भिन्न एवातः परोक्तस्यानुपपत्तिः ॥ इति ।

वेदान्तकौस्तुभाष्ये तु –

अपि च यथा खलु लोके भूमिविकाराणामश्मनां वज्रवैदूर्यपद्मरागादीनां भूम्यात्मकत्वेन भूमित्वाविशेषेऽपि स्वरूपेण भिन्नत्वमेवास्ति । आदिशब्देन द्रुमादिविकाराणां पत्रादीनां ग्रहणं, यथा पत्रस्य द्रुमाभिन्नत्वेऽपि न द्रुमत्वम्, यद्वादिशब्देन वज्रादिप्रभा गृह्यते, सा हि वज्राद्यभिन्नाऽपि भिन्ना दृश्यते । अतस्तस्याः प्रभावतो यथाऽभिन्नत्वेऽपि भिन्नत्वं तथा शारीरस्य ब्रह्मात्मकत्वेन ब्रह्माभिन्नत्वेऽपि स्वरूपेण तद्भिन्नत्वं युज्यते, तत्तस्माज्जीवपरब्रह्मभेदेन संसार्य्यसंसारिव्यवस्थासिद्धौ विरोधाभावादनुपपत्तिः न परोक्तहिताकरणादिदोष-प्रसक्तेरुपपत्तिरित्यविरोधसिद्धिः ॥ इति ।

ब्रह्म जीवादधिकव्यापकपदार्थ इति हेतोः जीवः सर्वव्यापी विभुः न भवति। जीवो देहपरिमाणेन अन्येन केनचित्परिमाणेन वा युक्तो विद्यते । तदाहुः –

'एवञ्चाऽऽत्माऽकात्स्न्यर्म् ॥' इति ब्रह्मसूत्रे (२/२/३४) ।

वेदान्तपारिजातसौरभाष्ये तु –

एवं शरीरपरिमाणत्वेनाङ्गीकृतस्यात्मनो बृहद्देहप्राप्तावपूर्णता स्यात्॥ इति ।

वेदान्तकौस्तुभाष्ये तु –

तन्मते यथैकस्मिन्धर्मिणि विरुद्धधर्मासम्भवरूपो दोषः, एवं तदभिमते देहपरिमाणे जीवेऽपि दोषोऽस्ति । को दोषः ? श्रुणु ! देहपरिमाण आत्मा कर्मवशात्पिपीलिकाशरीरं विहाय गजशरीरं यदाऽऽप्नोति तदा तस्याऽकात्स्न्यं स्यात् । गजशरीरानुरूपं परिपूर्णत्वं न स्यात् । गजाकाराद्देहान्निर्गतस्य चात्मनः सूक्ष्मशरीरे प्रविष्टस्य तदनुरूपं सूक्ष्मत्वञ्च न स्यादित्यर्थः ॥ इति ।

जगद्विषये यथा (जगत्) –

'उभयव्यपदेशात्त्वहिकुण्डलवत् ॥' इति ब्रह्मसूत्रे (३/२/२७) ।

वेदान्तपारिजातसौरभभाष्ये तु –

मूर्त्तामूर्त्तस्याप्रतिषेध्यत्वं द्रढयति, मूर्त्तामूर्त्तादिकं विश्वं ब्रह्मणि स्वकारणे भिन्नाभिन्नसम्बन्धेन स्थातुमर्हति, भेदाभेदव्यपदेशादहिकुण्डलवत्॥ इति ।

वेदान्तकौस्तुभभाष्ये तु –

मूर्त्तामूर्त्तादिप्रपञ्चस्य ब्रह्मकार्य्यतया ब्रह्मरूपत्वेन श्रुत्युक्तस्य 'नेति नेती'ति निषेधानर्हत्वं ब्रह्मणस्ततो भूयस्त्वेन निर्दोषत्वं चोक्तम् । एतद्दार्ढ्यार्थं प्रपञ्चस्य कार्य्यस्य कारणेन ब्रह्मणा सह भेदाभेदसम्बन्धं सर्वश्रुत्यर्थनिर्वाहकं स्वकीयं सिद्धान्तम्भगवान्सूत्रकार आह – मूर्त्तामूर्त्तादिसर्वकार्य्यजातस्य ब्रह्मभिन्नत्वेऽपि तदभिन्नत्वम् । कुतः ? उभयव्यपदेशात् भेदाभेदव्यपदेशात् । 'यतो वा इमानि भूतानि जायन्ते, यः पृथिव्यां तिष्ठन्' इत्यादिभेदव्यपदेशात्, 'सर्वं खल्विदं ब्रह्मे'त्याद्यभेदव्यपदेशात् । तत्र दृष्टान्तमाह – अहिकुण्डलवदिति । सर्वत्र विवक्षितांशमात्रेण दृष्टान्ता उपादीयन्ते । कुण्डलोपादानभूतो रज्ज्वाकारः अहिः कारणं, तत्स्थानीयं सर्वशक्त्युपेतं जगदभिन्ननिमित्तोपादानकारणं ब्रह्म, वलयाकारं कार्य्यभूतं कुण्डलं तत्स्थानीयं कार्य्यभूतं मूर्त्तामूर्त्तादिकं विश्वम् । तत्र कुण्डलं परतन्त्रं व्याप्यं कार्य्यञ्च, अहिस्तदपेक्षया स्वतन्त्रो व्यापकः कारणञ्च,

अतस्तयोर्भेदः । अहिव्यतिरेकेण कुण्डलस्य स्थितिप्रवृत्त्यभावात्ततोऽभेदश्च । एवं प्रपञ्चस्यापि चिदचिच्छक्तिमद्ब्रह्मकार्य्यस्य कारणेन ब्रह्मणा सह स्वाभाविकौ भेदाभेदौ भवतः । सूत्रानुरूपः श्रुतिपूगः 'द्वा सुपर्णा सयुजा, पृथगात्मानं प्रेरितारञ्च मत्वा, सर्वङ्खल्विदम्ब्रह्म, ऐतदात्म्यमिदं सर्वं, ब्रह्मैवेदं सर्वम्, आत्मैवेदं सर्वमि'त्यादिः । ब्रह्मात्मकत्वान्मूर्त्तामूर्त्तादिकस्य प्रतिषेधत्वं नेति भावः ॥ इति।

'प्रकाशाश्रयवद्वा तेजस्त्वात् ॥' इति **ब्रह्मसूत्रे** (३/२/२८) ।

वेदान्तपारिजातसौरभभाष्ये तु –

जीवपुरुषोत्तमयोरिपि तथा सम्बन्धो ज्ञेयः, उभयव्यपदेशात् प्रभातद्वतोरिव । 'अतोऽनन्तेने'त्यनेन केवलभेदो न शङ्क्य इति भावः ॥ इति ।

वेदान्तकौस्तुभभाष्ये तु –

ननु भवत्वेचतनवर्गस्य ब्रह्मणा सह भेदाभेदसम्बन्धः, जीवस्य तु तेन सह भेदाभेदसम्बन्धो न सङ्गच्छते, 'अतोऽनन्तेन तथा हि लिङ्गमि'त्यत्र जीवोऽनन्तेन सह साम्यं प्राप्नोतीति तयोरत्यन्तभेदप्रतीतेरित्यत आह – उभयव्यपदेशादित्यनुवर्त्तते । वाशब्दाश्चोद्यनिवृत्त्यर्थः । नास्ति तयोरत्यन्तभेदः 'यदा पश्यः पश्यते रुक्मवर्णं कर्त्तारमीशं पुरुषं ब्रह्मयोनिम् । ततस्तु तं पश्यति निष्कलं ध्यायमानः, ब्रह्मविदाप्नोति परम्, परात्परं पुरुषमुपैति दिव्यम्, अज्ञो जन्तुरनीशश्च, यः सर्वज्ञः सर्ववित्, अविद्यायामन्तरे वर्त्तमानाः, एष आत्माऽपहतपाप्मा, सत्यकामः सत्यसङ्कल्पः, य आत्मनि तिष्ठन्नि'त्यादिस्वाभाविकभेदव्यपदेशात् । 'तत्त्वमसि, अहं ब्रह्मास्मि, अयमात्मा ब्रह्मे'त्यादिस्वाभाविकाभेददर्शनाच्च जीवस्य ब्रह्मणा सह भेदाभेदः सम्बन्धः । दृष्टान्तमाह – 'प्रकाशाश्रयवदि'ति । प्रकाशः सूर्य्यादिप्रभारूपः, आश्रयः सूर्य्यादिः । तत्र हि प्रकाशस्य आश्रयेण सह स्वाभाविकौ भेदाभेदौ भवतः, तस्य तं विना पृथगवस्थानाभावात् । नन्वत्यन्तभिन्नयोस्तयोरभेदे कोऽयं निर्बन्धः ? तत्र हेत्वन्तरमाह – 'तेजस्त्वादि'ति । प्रकाशाश्रययोस्तेजस्त्वादप्यभेदस्तद्वदंशभूतस्य जीवस्यांशिना सह स्वाभाविकौ भेदाभेदौ भवत इत्यर्थः । 'अंशो नानाव्यपदेशादन्यथा चापी'त्यत्रोभयश्रुतिविरोधपरिहाराय जीवपुरुषोत्तमयोः सम्बन्ध उक्तः । इह तु तार्किकादिपक्षवदत्यन्तभेदनिषेधाय पुनरुक्त इति विवेकः ॥ इति ।

एवं अन्येषु सभाष्येषु सूत्रेषु अपि द्रष्टव्यम् ।

'तदनन्यत्वमारम्भणशब्दादिभ्यः ॥' इति ब्रह्मसूत्रे (२/१/१४) ।

वेदान्तपारिजातसौरभाष्ये तु –

कार्य्यस्य कारणानन्यत्वमस्ति, नत्वत्यन्तभिन्नत्वम् । कुतः ? 'वाचारम्भणं विकारो नामधेयं मृत्तिकेत्येव सत्यम्, ऐतदात्म्यमिदं सर्वं, तत्सत्यं, तत्त्वमसि, सर्वं खल्विदं ब्रह्मे'त्यादिभ्यः ॥ इति ।

वेदान्तकौस्तुभभाष्ये तु –

प्रथमाध्याये चिदचिद्भिन्नत्वेन ब्रह्म बहुशो वर्णितं स्वासाधारण-पदार्थस्वरूपविवेकार्थम् । इह तु कारणाद्ब्रह्मणः कार्य्यस्य जगतः पृथक्स्थितिप्रवृत्त्याद्यभावादनन्यत्वम् 'असदिति चेन्न प्रतिषेधमात्रत्वादि'त्यादौ प्रतिपादितम् । अथेदानीमुक्तसिद्धान्तं द्रढयितुं 'कारणात्कार्यस्यानन्यत्वं नास्ति, कार्यञ्चोत्पद्यते' इति वैशेषिका आहुस्तन्मतं निराकरोति ।

तयोः कार्य्यकारणयोरनन्यत्वं, तस्य कार्य्यस्य जगतः कारणाद्-ब्रह्मणोऽनन्यत्वमिति वा, तस्मात्कारणाद्वा कार्य्यस्यानन्यत्वमिति विग्रहः । तस्मात्परमकारणाच्चिदचिच्छक्तिमतोऽपरिच्छिन्नादेकाद्वितीयादिशब्दार्थात्-कारणावस्थया कार्यावस्थया च स्वेच्छयैव स्थातुं समर्थात्सर्वप्रपञ्चपूर्ववर्तिनो ब्रह्मणः सकाशाच्चिदचिद्रूपस्य परिच्छिन्नस्यानेकनामरूपस्य परतन्त्रस्य कार्य्यस्यानन्यत्वमित्यर्थः । तत्र प्रमाणमाह – 'आरम्भणशब्दादिभ्यः' इति । आरम्भणशब्दः आदिर्येषां वाक्यानां तान्यारम्भणशब्दादीनि वाक्यानि तेभ्यः, 'वाचारम्भणं विकारो नामधेयं मृत्तिकेत्येव सत्यं, सदेव सौम्येदमग्र आसीदेकमेवाद्वितीयं, तदैक्षत बहु स्यां प्रजायेय, तत्तेजोऽसृजत, ऐतदात्म्यमिदं सर्वं, तत्सत्यं, स आत्मा तत्त्वमसि, सर्वं खल्विदं ब्रह्म, तज्जलानिति, तद्धेदं तर्ह्यव्याकृतमासीत्, तन्नामरूपाभ्यां व्याक्रियत' इत्यादिभ्यः । एवंजातीयकान्यन्यान्यपि बहूनि वाक्यानि कारणभूताद्ब्रह्मणः कार्य्यभूतस्य जगतोऽनन्यत्वं प्रतिपादयन्ति, विस्तरभयान्नोदाहृतानि । तत्रारम्भणशब्द-स्यायमर्थः । छन्दोगाः 'येनाश्रुतं श्रुतं भवत्यमतं मतमविज्ञातं विज्ञातमि'त्येकोपादानकारणविज्ञानेन सर्वकार्य्यविज्ञानं प्रतिज्ञाय तत्सिद्धये दृष्टान्तमाहुः – 'यथा सौम्यैकेन मृत्पिण्डेन सर्वं मृण्मयं विज्ञातं स्याद् वाचारम्भणं विकारो नामधेयं मृत्तिकेत्येव सत्यमि'ति । यथैकेन मृत्पिण्डेन मृद्द्रव्यतया विज्ञातेन

सर्वं मृण्मयं मृद्विकारजातं मृदात्मकतया विज्ञातं स्यात् । यतो हि तथाभूतं कार्यजातं वाचा वागिन्द्रियेणारभ्यते व्यवह्रियत इति वाचारम्भणं, तद्द्विविधं विकारोऽर्थः नामधेयं शब्दश्च, तदेतदुभयमालम्ब्य वाग्व्यापारः प्रवर्त्तते घटेनोदकमाहरेति । अतः पृथुबुध्नोदरत्वादिलक्षणः घटादिनामको जलाहरणादिव्यवहारसाधको विकारो मृत्तिकैवेति सत्यं, कारणभिन्नं कार्यं व्यक्तिबुद्ध्यादिभेदादितिमतमसत्यमित्यर्थः । नहि मृद्भिन्ने वातादौ घटव्यक्तिबुद्ध्यादिकल्पना शक्या कर्त्तुम् । यद्यसदेव कार्यमुत्पद्यते, तर्हि सर्वत्र सर्वोत्पत्तिप्रसङ्गः, कारकव्यापारवैयर्थ्यप्रसङ्गश्च स्यादित्यलं विस्तरेण ॥ इति ।

ब्रह्मविषये यथा (ब्रह्म) –

'जन्माद्यस्य यतः ॥' इति ब्रह्मसूत्रे (१/१/२) ।

वेदान्तपारिजातसौरभभाष्ये तु –

तल्लक्षणापेक्षायां सिद्धान्तमाह – अस्याचिन्त्यविचित्रसंस्थान-सम्पन्नस्यासङ्ख्येयनामरूपादिविशेषाश्रयस्याचिन्त्यरूपस्य विश्वस्य सृष्टिस्थितिलया यस्मात्सर्वज्ञाद्यनन्तगुणाश्रयाद्ब्रह्मेशकालादिनियन्तुर्भगवतो भवन्ति, तदेव पूर्वोक्तनिर्वचनविषयं ब्रह्मेति लक्षणवाक्यार्थः ॥ इति ।

वेदान्तकौस्तुभभाष्ये तु –

एवं निरुक्त्या बृहद्गुणशक्तिस्वरूपं श्रीकृष्णाख्यं ब्रह्म पूर्वाधिकरणे निर्णीतम् । इदानीं किं तल्लक्षणमित्याकाङ्क्षायां तदेव जगज्जन्मादिकर्त्तृत्व-सार्वज्ञ्यसत्यत्वादिमत्त्वेन प्रतिपाद्यते ।

अत्रास्येतिशब्दो जगदाख्यकार्यपरः । यत इति च कारणवाचकः । पूर्वसूत्राद्ब्रह्मेतिपदमनुवर्त्तते । यत्तदोर्नित्यसम्बन्धात्तच्छब्दाध्याहारः । जन्म आदिर्यस्य तदिदं जन्मादि सृष्टिस्थितिलयमोक्षम् । अत्र तद्गुणसंज्ञानो बहुब्रीहिः। यतो यस्मात्सर्वेश्वरात्सर्वज्ञात्सर्वशक्तेः परमकारणात्सर्वनियन्तुर्भगवतः श्रीपुरुषोत्तमादस्य जगतो नामरूपाभ्यां व्याकृतस्य विविधविभक्तभोक्तृ-संयुक्तस्य नियतदेशकालफलोपभोगाश्रयस्य तर्कागोचररचनस्य सृष्टिस्थिति-लयमोक्षाः प्रवर्त्तन्ते तद्ब्रह्म तदेव मुमुक्षुभिर्जिज्ञास्यमिति सूत्राक्षरयोजना । तथा च श्रुतयः – 'भृगुर्वै वारुणिर्वरुणं पितरमुपससार अधीहि भगवो ब्रह्मे' त्युपक्रम्य, 'यतो वा इमानि भूतानि जायन्ते येन जातानि जीवन्ति यत् प्रयन्त्यभिसंविशन्ति तद्विजिज्ञासस्व । तद्ब्रह्म । सत्यं ज्ञानमनन्तं ब्रह्मे'त्याद्याः । यतो

यस्माच्छ्रीपुरुषोत्तमादिमानि महदादितृणान्तानि भूतानि जायन्त इति सृष्टिरुक्ता, येन जातानि जीवन्तीति स्थितिरुक्ता, अभिसंविशन्तीति लयो दर्शितः, यत् प्रयन्ति यं सर्वकर्मध्वंसानन्तरं प्राप्नुवन्तीति मोक्ष उक्तः । अत्र चेतनस्यानादिनिधनस्य देहादिसंयोगहेतुकविचित्रविज्ञानविकाशो जन्म, तत्सङ्कोचपूर्वकः कारणप्रवेशः प्रलयः । एतच्च 'चराचरव्यपाश्रय' इत्यादि सूत्रद्वयव्याख्याने स्फुटीभविष्यति । अचेतनांशस्य सृष्ट्यादौ रूपान्तरभावे मुख्यतेति विवेकः । द्वितीयवाक्यार्थस्तु सत्यत्वज्ञानत्वानन्तत्वधर्मवद्ब्रह्मेति । अत्र सत्यपदमसत्यस्य ज्ञानपदमचिद्वर्गस्यानन्तपदं जीववर्गस्य च व्यावर्त्तकम् । तथा च जगदभिन्ननिमित्तोपदानत्वे सति सत्यत्वादिमत्त्वं ब्रह्मलक्षणं सिद्धम् । परापरादिशब्दाभिधेयानां स्वस्वाभाविकीनां सूक्ष्मावस्थापन्नानां शक्तीनां तत्तद्गतसद्रूपकार्याणाञ्च स्थूलतया प्रकाशकत्वमुपादानत्वम् । स्वस्वानादि-कर्मसंस्कारवशीभूतात्यन्तसङ्कुचितभोगस्मरणानर्हज्ञानधर्माणां चेतनानां कर्मफलभोगार्हज्ञानप्रकाशनेन तत्तत्कर्मफलतत्तद्भोगसाधनैः सह योजयितृत्वं निमित्तत्वम् । विषयवाक्यानुरूपा स्मृतिश्च – 'भृगुणाऽभिहितं शास्त्रं भारद्वाजाय पृच्छते ।' इत्युपक्रम्य, 'स एष भगवान् विष्णुरनन्त इति विश्रुतः। सर्वभूतात्मभूतस्थो दुर्विज्ञेयोऽकृतात्मभिः ॥ अहङ्कारस्य यः स्रष्टा सर्वभूतभवाय वै । यतः समभवद्विश्वं पृष्टोऽहं यदिह त्वये'ति मोक्षधर्मे । ननु श्वेतश्वतरोपनिषदि 'कालस्वभावो नियतिर्यदृच्छा भूतानि योनिः पुरुष इति चिन्त्यमि'ति बहूनि कारणान्युक्तानि, पुरुषोत्तमो वासुदेव एव जगतां कर्त्तेति निर्द्धारणे किं प्रमाणमिति चेच्छृणु 'यः कारणानि निखिलानि तानि कालात्मयुक्तान्यधितिष्ठत्येकः । ज्ञः कालकालो गुणी सर्वविद्यः । न तस्य कश्चिज्जनिता न चाधिपः । एको ह वै नारायण आसीत् । विष्णुस्तदासीद्धरिरेव निष्कलः । नारायणाद्ब्रह्मा जायते नारायणाद्रुद्रो जायते । एतस्य ध्यानान्तस्थस्य ललाटात् त्र्यक्षः शूलपाणिः पुरुषोऽजायत । एको वशी सर्वगः कृष्ण ड्ड्यः । एकोऽपि सन् बहुधा यो विभति । क इति ब्रह्मणो नाम ईशोऽहं सर्वदेहिनाम् । आवां तवाङ्गसम्भूतौ तस्मात्केशवनामवान् । अहं ब्रह्मा आद्य ईशः प्रजानां तस्माज्जातस्त्वं च मत्तः प्रसूतः कृष्ण एव हि लोकानामुत्पत्तिरपि चाप्ययः । कृष्णस्य हि कृते भूतमिदं विश्वं चराचरम् । वेदे रामायणे चैव भारते पञ्चरात्रके । आदावन्ते च मध्ये च

हरिः सर्वत्र गीयते । अहं कृत्स्नस्य जगतः प्रभवः प्रलयस्तथा । मत्तः परतरं नान्यत् किञ्चिदस्ति धनञ्जय ! । अहं सर्वस्य प्रवभो मत्तः सर्वं प्रवर्त्तते ।' इत्यादि श्रुतिस्मृतिपूगो जगत्कारणनिर्द्धारणे मानम् । जगदुत्पत्त्यादिविषयेषु वाक्येषु क्वचिच्छ्रूयमाणाः हिरण्यगर्भादिशब्दा उक्तलक्षणब्रह्मपरा ज्ञेयाः । तस्मात् सर्वात्मा सर्वेश्वरः सर्ववेदैकवेद्यः श्रीकृष्णो जगतः कारणमिति सिद्धम् ॥ इति । '**शास्त्रयोनित्वात् ॥**' इति **ब्रह्मसूत्रे** (१/१/३) ।

वेदान्तपारिजातसौरभभाष्ये तु –

किं प्रमाणकमित्याकाङ्क्षायां सिद्धान्तमाह – शास्त्रमेव योनिस्तज्ज्ञप्ति-कारणं यस्मिंस्तदेवोक्तलक्षणलक्षितं वस्तु ब्रह्मशब्दाभिधेयमिति ॥ इति ।

वेदान्तकौस्तुभभाष्ये तु –

एवं जिज्ञासासूत्रेण ब्रह्म जिज्ञास्यमित्युक्तं, लक्षणसूत्रेण च जगज्जन्मादिकारणत्वं सत्यत्वादिमत्त्वं ब्रह्मलक्षणमुक्तम् । इदानीं तत्र किं प्रमाणमित्याकाङ्क्षायां प्रमाणमुच्यते –

उक्तलक्षणं ब्रह्मानुमानादिगम्यमुत वेदप्रमाणकमितिसंशये, अनुमानादिगम्यं 'यतो वाचो निवर्त्तन्त' इति ब्रह्मणो वागगोचरत्वश्रवणादिति पूर्वपक्षे, ब्रह्म नानुमानादिगम्यं किन्तु वेदप्रमाणकम् । कुतः ? शास्त्रयोनित्वात् । शास्त्रं वेदः योनिः कारणं ज्ञापकं प्रमाणं यस्मिंस्तच्छास्त्रयोनिस्तस्य भावस्तत्त्वं तस्माच्छास्त्रयोनित्वाच्छास्त्रप्रमाणकत्वात् । वेदैकप्रमाणकमेव ब्रह्मेति सिद्धान्तः । ननु लाघवाच्छास्त्रयोनीत्येव सुवचं, तथा च शास्त्रयोनि वेदप्रमाणकं ब्रह्मेतीष्टसिद्धिरिति चेन्न । नानुमानादिगम्यं ब्रह्म शास्त्रयोनित्वादितीतरप्रमाण-विधायकहेतुनिर्देशात् । ननु नानुमानादिगम्यमिति कुतो लभ्यते इति चेत्, पूर्वोक्तकार्यत्वलिङ्गेन जगतः कर्त्तृजन्यत्वसाधकेनानुमानगम्यं ब्रह्मेति शङ्का जाता । तन्निवारणायार्थिकस्तत्पदलाभः 'सर्वे वेदा यत्पदमामनन्ति, सर्वे वेदा यत्रैकीभवन्ति, तं त्वौपनिषदं पुरुषं पृच्छामः । नावेदविन्मनुते तं बृहन्तमि' त्यादिश्रुतिभ्यः । 'वदैश्च सर्वैरहमेव वेद्यः । वेदे रामायणे चैव भारते पञ्चरात्रके । आदावन्ते च मध्ये च हरिः सर्वत्र गीयते । नमामः सर्ववचसां प्रतिष्ठा यत्र शाश्वती'त्यादि स्मृतिभ्यश्च । ननु पृथिव्यादीनि सावयवानि भूतानि सकर्त्तृकाणि कार्यत्वात् घटादिवदित्यनुमानेनेतरस्य कारणत्वासम्भवाज्जगत्कारणात्मक-

ब्रह्मसिद्धौ किं वेदेनेति चेन्न । आकाशादिभूतोत्पत्तेर्वेदमन्तरेण केनापि ज्ञातुमशक्यत्वात् तन्निष्ठकार्यत्वस्यासिद्धत्वेन हेतोः स्वरूपासिद्धत्वात्। न च वेदद्वारा भूतोत्पत्तिर्ज्ञातव्या तया च तन्निष्ठकार्यत्वसिद्ध्या न स्वरूपासिद्धो हेतुरिति वाच्यम् । तथैव वेदादेव जगत्कारणे ब्रह्मणि विज्ञाते सति अनुमानवैयर्थ्यापत्तेः, अस्मत्पक्षप्रवेशाच्च । एवं क्षित्यङ्कुरादीनां प्रसिद्धानां कार्याणामपि कार्यत्वेन लिङ्गेन न ब्रह्मानुमातुं शक्यम्, भूबीजजलजीवादीनां तत्कारणत्वकल्पनासम्भवात् अदृष्टकल्पनाया अन्याय्यत्वाच्च ।

अत्रेदं बोध्यम् । यत्र यत्र कार्यत्वं दृश्यते तत्तदनुरूपः क्षेत्रज्ञः कर्त्ता अप्यनुमानेन साधयितुं शक्यः । कृत्स्नस्य तु विश्वस्य वेदं विना कार्यत्व-मप्रसिद्धमतो जगत्कार्त्ताऽपि वेदादेव ज्ञातुं शक्यो नत्वनुमानसहस्रेण । न च प्रत्यक्षप्रमाणगम्यं ब्रह्म, तद्ग्रहणे हि साधारणानामिन्द्रियाणामसामर्थ्यात्। नेन्द्रियाणि नानुमानं, 'नैषा तर्केण मतिरापनेया प्रोक्तान्येनैव सुज्ञानाय प्रेष्ठे'ति श्रुतेः । हे प्रेष्ठ ! एषा ब्रह्मविषया मतिस्तर्केण न निरस्या, यद्वा न प्राप्तुं योग्या । अन्येन वेदविदा सर्वज्ञेनाचार्येण प्रोक्ता सुज्ञानाय भवतीत्यर्थः, 'तर्काप्रतिष्ठानादि'त्यादि सूत्रात् । 'अचिन्त्याः खलु ये भावा न तांस्तर्केण योजयेदि'ति मनुस्मृतेः । 'अचिन्त्याः खलु ये भावाः न तांस्तर्केण साधयेत् । नाप्रतिष्ठिततर्केण गम्भीरार्थस्य निश्चय' इति महाभारताच्च । किञ्च सर्वज्ञैर्मन्त्रैः ऋषिभिश्च साकल्येन सर्वथाऽगम्यं दुर्बोधमचिन्त्यानन्तगुण-शक्त्यादिमज्जगत्कारणं ब्रह्मानुमानादिवेद्यमिति कोऽनुन्मत्तो ब्रूयात् । न च 'यतो वाचो निवर्त्तन्त' इत्यादिश्रुतीनां का गतिरिति शङ्क्यम् । तासामियत्तानवच्छिन्नं ब्रह्मेत्यर्थपरत्वात् । वक्ष्यति च 'प्रकृतैतावत्त्वं ही'ति सूत्रे । शास्त्रस्य योनिः शास्त्रयोनीति विग्रहेऽप्ययमेवार्थः, सर्वज्ञब्रह्मनिःश्वसितैरन्तरङ्गैर्वेदैरेव ब्रह्म वेद्यं, न बहिर्भूतैरन्यकल्पितानुमानादिभिरिति फलितोऽर्थः । अत्रास्य सूत्रस्य 'अस्य महतो भूतस्य निःश्वसितमेतद्यदृग्वेदो यजुर्वेदः सामवेद' इति वाक्यं विषयः । न चास्मिन्नर्थे वेदानां नित्यत्वहानिः, नित्यसिद्धानां निर्गमनमात्रस्वीकारात्, 'वाचा विरूपनित्यया । अनादिनिधना नित्या वागुत्सृष्टा स्वयम्भुवा । आदौ वेदमयी दिव्या यतः सर्वाः प्रवृत्तय' इति श्रुतिस्मृतिभ्याञ्च । अनेन ब्रह्मणोऽप्राकृतो नित्यो विग्रहः सूचितः, प्राकृतसृष्टेः पूर्ववर्त्तिनो वेदस्य तन्निःश्वसितत्वात् ।

एतदुपरिष्टाद्वक्ष्यामः । तत्सिद्धं वेदैकप्रमाणकं ब्रह्मेति ॥ इति ।

'तत्तु समन्वयात् ॥' इति ब्रह्मसूत्रे (१/१/४) ।

वेदान्तपारिजातसौरभभाष्ये तु –

ननु समस्तस्यापि वेदस्य क्रियापरत्वेन तद्भिन्नविषयकाणां वेदान्तवाक्यानामप्यर्थवादवाक्यानां तत्प्राशस्त्यप्रतिपादनद्वारा परम्परया विधिवाक्यैकवाक्यतावत् क्रत्वङ्गकर्तृप्राशस्त्यप्रतिपादनेन विध्येकपरत्वात् कथमिव शास्त्रैकप्रमाणकं ब्रह्मेति प्राप्ते राद्धान्तः – तज्जिज्ञास्यं विश्वकारणं शास्त्रप्रमाणकं ब्रह्मैव न कर्मादि, तत्रैव प्रतिपादकतया कृत्स्नस्यापि वेदस्य समन्वयात् । मुख्यवृत्त्याऽन्वयः समन्वयस्तस्मात् । यद्वा वेदेषु तस्यैव प्रतिपादकतया समन्वयादिति सङ्क्षेपः । न च कर्मणि तत्समन्वयो वक्तुं शक्यः, तस्य तु विविदिषोत्पादनेनैव नैराकाङ्क्ष्यात् । क्रत्वङ्गं ब्रह्मेति तु बालभाषितम् । तस्य सर्वकर्मकर्त्रादिकारकनियन्तृत्वेन स्वातन्त्र्यात् तत्फलदातृत्वाच्च, प्रत्युत कर्मण एव विविदिषोत्पादनेन परम्परया तत्प्राप्तिसाधनीभूतज्ञानोत्पत्त्युपकारकत्वेन समन्वय इति निश्चीयते, विविदिषाश्रुतेः । ननु प्रत्यक्षादिप्रमाणाविषयकत्ववच्छब्दप्रमाणाविषयत्वस्यापि श्रुतिसिद्धत्वान्न शास्त्रैकप्रमेयं ब्रह्मेति प्राप्ते ब्रूमः । जिज्ञास्यं ब्रह्म शास्त्रप्रमाणकमेव नान्यप्रमाणकम्, समस्तश्रुतीनां साक्षात्परम्परया वा तत्रैव समन्वयात् । तत्र लक्षणप्रमाणादिवाक्यानां स्वत एव तद्विषयकत्वेन शाण्डिल्यपञ्चाग्निमधुविद्यादिवाक्यानां प्रतीकादिप्रकारकाणाञ्च परम्परया समन्वयः । यद्वा सर्वेषामपि वाक्यानां भिन्नप्रवृत्तिनिमित्तकत्वेऽपि साक्षादेव ब्रह्मणि समन्वयः । तत्तद्वाक्यविषयाणां सर्वेषामपि ब्रह्मात्मकत्वाविशेषेण मुख्यवाच्यत्वात् । न चैवं विषयनिषेधपराणां बाधः शङ्कनीयस्तेषां ब्रह्मस्वरूपगुणादिविषयकेयत्तानिषेधपरत्वेन समविषयत्वात् । किञ्चात्र प्रष्टव्यो भवान् – शब्दाविषयं ब्रह्मेति वाक्यस्य वाच्यं ब्रह्माभिप्रेतं न वेति ! आद्ये वाच्यत्वसिद्धेरवाच्यत्वप्रतिज्ञाभङ्गः । द्वितीये सुतरां वाच्यतेति । तस्मात् सर्वज्ञः सर्वाचिन्त्यशक्तिविश्वजन्मादिहेतुर्वेदैकप्रमाणगम्यः सर्वभिन्नाभिन्नो भगवान् वासुदेवो विश्वात्मैव जिज्ञासाविषयस्तत्रैव सर्वं शास्त्रं समन्वेतीत्यौपनिषदानां सिद्धान्तः ॥ इति ।

वेदान्तकौस्तुभभाष्ये तु –

एवं श्रीकृष्णस्य बृहद्गुणशक्त्याश्रयस्य जगदभिन्ननिमित्तकारणस्य वेदैकप्रमाणकत्वमुक्तम् । इदानीं तदेव द्रढयितुं सर्ववेदसमन्वयं तस्मिन् ब्रह्मणि सर्वेश्वरे दर्शयन् 'आम्नायस्य क्रियार्थत्वादानार्थक्यमतदर्थानामि'ति वदता जैमिनिना सर्वोऽपि वेदः क्रियायां योजितोऽक्रियार्थानामानर्थक्यविधानात् वेदान्तानामपि क्रत्वङ्गकर्तृप्राशस्त्यप्रकाशनद्वारा क्रियायां समन्वयात्कथं वेदैकप्रमाणकं ब्रह्मेत्याक्षेपं निराकरोति ।

तु-शब्दः पूर्वपक्षव्यावृत्त्यर्थः । तत् जिज्ञास्यं जगत्कारणं ब्रह्मैव वेदैकप्रमाणकम्, कुतः ? समन्वयात् । वेदेषु तस्यैव समन्वयात् । सम्यग्-वाच्यतयाऽन्वयः समन्वयस्तस्मात् । सर्वस्य वेदस्य वा तस्मिन् मुमुक्षुजिज्ञास्ये जगदभिन्ननिमित्तोपादानकारणे शास्त्रयोनौ प्रधानक्षेत्रज्ञकालकर्मादिनियन्तरि ब्रह्मरुद्रेन्द्रादिकिरीटेडितपादपीठे निखिलदोषगन्धाघ्रातमाहात्म्ये सार्वज्ञ्याद्यनन्त-गुणनिलये मुक्तोपसृप्ये ब्रह्मणि श्रीकृष्णे सम्यग्वाचकतया अन्वयस्तस्मात् । समन्वितश्च 'यतो वा इमानि भूतानि जायन्ते । आनन्दादेव खल्विमानि भूतानि जायन्ते । एतस्माज्जायते प्राणः मनः सर्वेन्द्रियाणि च । सदेव सौम्येदमग्र आसीदेकमेवाद्वितीयम् । तदैक्षत बहु स्यां प्रजायेय । नारायणाज्जायते प्राणः नारायणाद्ब्रह्मा जायते नारायणाद्रुद्रो जायते । एको ह वै नारायण आसीत् न ब्रह्मा नेशानः । ब्रह्म वा इदमेकमेवाग्र आसीत् । ब्रह्म वा इदमग्र आसीत्तदात्मानमेवावेदाहं ब्रह्माऽस्मीति । तस्मात् सर्वमभवत् । आत्मा वा इदमेकमेवाग्र आसीत् । तस्माद्वा एतस्मादात्मन आकाशः सम्भूतः । सर्वे वेदाः यत्पदमामनन्ति । सर्वे वेदा यत्रैकीभवन्ति । अन्तःप्रविष्टः शास्ता जनानाम् । यं सर्वे देवा नमन्ति । सत्यं ज्ञानमनन्तं ब्रह्म । आनन्दं ब्रह्मणो विद्वान् । विज्ञानमानन्दं ब्रह्म । सर्वं खल्विदं ब्रह्म । य आत्माऽपहतपाप्मा विजरो विमृत्युर्विशोको विजिघत्सोऽपिपासः । यः सर्वज्ञः सर्ववित् । ब्रह्मविदाप्नोति परम् । ब्रह्मैवेदं सर्वमि'त्यादिवाक्यकदम्बस्तत्रैव । ननु पञ्चप्रकारवाक्यसमुदाय-स्तावत्समस्तो वेदः, वाक्यानि च विधिनिषेधार्थवादमन्त्रनामधेयाख्यानि । तत्र 'ज्योतिष्टोमेन यजेत स्वर्गकाम' इत्यादिविधिवाक्यम् । 'ब्राह्मणो न हन्तव्य' इत्यादिनिषेधवाक्यम् । 'वायुर्वै क्षेपिष्ठा देवते'त्यादयोऽर्थवादाः । 'इषे त्वा, अग्निर्मूर्द्धा दिव' इत्यादयो मन्त्राः । ज्योतिष्टोमाश्वमेधादीनि नामधेयानीति

तेषां विवेकः । तथा चोपक्रमे 'अथातो धर्मजिज्ञासे'तिसूत्रे वेदस्याध्ययनविधिकरणकभावनाविधिभाव्यफलवदर्थपरत्वमुक्तम् । 'चोदनालक्षणोऽर्थो धर्म' इति द्वितीये लक्षणसूत्रे धर्मे चोदना प्रमाणमिति(यत्र) कार्यपरत्वव्याप्यं वेदप्रामाण्यं तत्र कार्यपरत्वमितिव्याप्त्या निर्णीतम् । तत्र 'वायुर्वै क्षेपिष्ठा देवते'त्यर्थवादानां धर्मे प्रामाण्यमस्ति न वेति संशये पूर्वपक्षमाह – 'आम्नायस्य क्रियार्थत्वादनर्थक्यमतदर्थानामि'ति । वेदस्य क्रिया एवार्थो विषयः । प्रतिपाद्यो यस्य स क्रियार्थस्तस्य भावस्तत्त्वं तस्माद्धेतोरर्थवादानां प्रामाण्यं नास्ति । किं तर्हीत्याशङ्क्याह अतदर्थानामानर्थक्यमिति, न सा क्रिया अर्थो येषां ते अतदर्था अर्थवादादयस्तेषामानर्थक्यमर्थशून्यत्वमेवास्तु, तथैव वेदान्तानामपि, नहि 'स्वाध्यायोऽध्येतव्य' इत्यध्ययनविध्युपात्तानां निष्फलब्रह्मपरत्वे प्रामाण्यं युक्तमिति प्राप्ते सिद्धान्तमाह – 'विधिना त्वेकवाक्यत्वात् स्तुत्यर्थेन विधीनां स्युरि'ति । अर्थवादानां विधिवाक्यैरेकवाक्यत्वात् तद्विधेयार्थानां स्तुत्यर्थेन स्तुत्यर्थरूपेण द्वारेणार्थवादाः प्रमाणं स्युरिति । एवञ्च विधिनिषेधविधुराणां वेदान्तानां सिद्धार्थवस्तुबोधकानामपि मन्त्रार्थवादादिष्वेवान्तर्भावेनाध्ययन-विध्युपात्तत्वात्सर्वथाऽऽनर्थक्यनिरासाय परम्परया साध्ये कर्मण्येवान्वयो युक्तः । स्वातन्त्र्याभ्युपगमे निष्फलत्वापत्तेस्तेषां क्रत्वङ्गकर्तृत्वप्रतिपादनेन नैराकाङ्क्ष्यं बोध्यम् । तत्र तत्त्वपदार्थपराणां वाक्यानां कर्मकर्तृदेवतास्तावकत्वं, तज्ज्ञानस्य च परविद्याख्यस्य फलस्तावकत्वं वेदान्तवाक्यानि न ब्रह्मपराणि क्रत्वङ्गकर्तृप्राशस्त्यप्रकाशनपरत्वादर्थवादवाक्यवदिति चेन्न । स्वोत्प्रेक्षित-कल्पनामात्रत्वात्, कर्मणो मोक्षोपायभूतविद्योत्पादकत्वेन परम्परया ब्रह्मण्येव समन्वयाच्च । 'तमेतमात्मानं वेदानुवचनेन ब्राह्मणा विविदिषन्ति यज्ञेन दानेन तपसाऽनाशकेने'त्यादिश्रुतेः । अत्र यज्ञेन विविदिषन्तीति अश्वेन जिगमिषतीति वत् यदि यज्ञाख्यस्य करणस्य धात्वर्थेनान्वयस्तदा कर्मणो विद्यार्थत्वं तद्द्वारा ब्रह्मपरत्वञ्च ज्ञेयम् । यदि तु सन्प्रत्ययस्य प्राधान्यात्प्रत्ययार्थान्वयवशा-दिच्छार्थत्वं तदेच्छाद्वारा विद्याङ्गत्वं तद्द्वारा ब्रह्मपरत्वम्बोध्यम् । विद्याङ्गत्वं कर्मणो वक्ष्यति च 'सर्वापेक्षा च यज्ञादिश्रुतेरश्ववदि'ति । न च वेदान्तवेद्यं वस्तु क्रत्वङ्गमिति वक्तुं शक्यम् । तस्य सर्वकर्मकर्त्रादिकारक-नियन्तृत्वेन स्वातन्त्र्यात् । न च वेदान्तानां विध्यङ्गत्वमर्थवादादिवद्वक्तुं शक्यम् ।

भिन्नप्रकरणपठितत्वाद्विधिसान्निध्याभावाच्च । नापि प्रवृत्तिनिवृत्त्यभावरूप-भूतार्थबोधकतया वेदान्तानां निष्फलत्वं वक्तुं शक्यम् । वेदान्तवेद्यब्रह्मज्ञानस्य मोक्षरूपपरमश्रेयः फलवत्त्वात् । ननु 'अक्षय्यं ह वै चातुर्मास्ययाजिन' इत्यादिना कर्मणोऽपि तद्वत् फलश्रवणात्तत्र समन्वयो न दोषावह इति चेन्न । 'यथेह कर्मजितो लोकः क्षीयत एवमेवामुत्र पुण्यजितो लोक' इत्यस्याः केवलकर्मतिजो लोकोऽनित्यः कर्मैकप्राप्यत्वात्कृष्यादिवदित्यनुमानानुगृहीतायाः 'प्लवा ह्येतेऽदृढा यज्ञरूपा' इति श्रुत्यन्तरदृढीकृतार्थायाः श्रुतेः प्राबल्यात्, 'अक्षय्यं ह वै चे'त्यादिश्रुतेर्दौबल्याद्दुर्बलवाक्यार्थे कर्मणि तत्समन्वयस्यानौचित्याच्च । 'एतद्विदुरमृतास्ते भवन्ति, ब्रह्मविदाप्नोति परमि'त्यादिश्रुत्युक्तेऽर्थस्तु न केनापि वेदवचनेन विरुद्ध्येत । न च शक्यश्चालयितुमनुमानशतैः । न च अक्षय्यमिति श्रुत्यर्थबाधः, तस्या आपेक्षिकार्थपरत्वात्, 'आब्रह्मभुवनाल्लोकाः पुनरावर्तिनोऽर्जुन ! । मामुपेत्य तु कौन्तेय ! पुनर्जन्म न विद्यत' इति वेदपर्य्याय-भूतायाः श्रीभगवत्स्मृतेरुभयत्र प्रामाण्याच्च । ननु स्यादेतदुपनिषद्भागस्य कथञ्चिद्ब्रह्मपरत्वं तत्र तथात्वदर्शनात्पूर्वभागस्य तु 'यावज्जीवमग्निहोत्रं जुहोति, ज्योतिष्टोमेन यजेत स्वर्गकाम' इत्यादिना नित्यकाम्यादिकर्मविधायकत्वेन निराकाङ्क्षत्वश्रवणात्कथं ब्रह्मपरत्वमिति चेन्न । कृत्स्नस्यापि वेदस्य ब्रह्मपरत्वमेव, कर्मादौ तस्य केनचिदंशेन कथञ्चिदन्वयदर्शनेऽपि समन्वयस्तु ब्रह्मण्येव । तत्रोपनिषद्भागस्य हि साक्षात्स्वरूपगुणादिप्रतिपादनपरत्वात्साक्षादन्वयः । तत्रापि चिदचिद्ब्रह्मस्वरूपपरत्वेन भेदवाक्यानां सर्वस्य ब्रह्मात्मकत्वप्रतिपादन-परत्वेनाभेदवाक्यानां सृष्ट्यादिपराणां वाक्यानां जगत्कर्तृत्वादिगुण-प्रतिपादनपरत्वेन निर्गुणवाक्यानां मायिकगुणनिषेधपरत्वेन सगुणवचनानां स्वाभाविकगुणप्रतिपादनपरत्वेन 'यद्वाचाऽनभ्युदितमि'त्यादीनामियत्ता-नवच्छिन्नत्वप्रतिपादपरत्वेन चान्वयः । नित्यनैमित्तिककर्मपराणां चाधिकारिसत्त्वशुद्धिसम्पादनद्वारा ब्रह्मविषयकज्ञानादिसहकारित्वेन काम्यपराणां च'एतस्यैवानन्दस्यान्यानि भूतानि मात्रामुपजीवन्ती'ति विषयानन्दस्यापि ब्रह्मानन्दलेशत्वात्तद्द्वारा ब्रह्मण्येवान्वयः । किञ्च काम्यानां मोक्षाधिकारिशुद्धदेवादिदेहोत्पादनद्वारा ब्रह्मविद्यापरत्वेन समन्वयः । किञ्च संयोगपृथक्त्वन्यायेन 'दध्नेन्द्रियकामस्य जहुयादि'ति वाक्यान्तरेण 'दध्ना

जुहोती'त्यनेन नित्यस्यापि दध्न इन्द्रियार्थत्वमिव स्वर्गाद्यर्थस्यापि कर्मणो विद्यार्थत्वं बोध्यम् । 'आप्रणखात्सुवर्णादि'तिवाक्यानां च श्रीविग्रहपरत्वेन समन्वयः । यद्वा सर्वस्य वस्तुजातस्य ब्रह्मात्मकत्वात्तद्वाचकशब्दजातस्य साक्षात्तात्रान्वायः । तस्मात्कृत्स्नस्य वेदस्य सर्वज्ञे स्वाभाविकानन्ताचिन्त्यशक्तौ जगत्कारणे ब्रह्मणि पुरुषोत्तमे चिदचिद्भिन्नाभिन्ने श्रीकृष्णे समन्वय इति सिद्धं 'वेदैश्च सर्वैरहमेव वेद्य' इति श्रीमुखवचनात् ॥ इत्यादि ।

ब्रह्म जगतो निमित्तोपादानोभयकारणम् । तदुक्तं यथा –

'प्रकृतिश्च प्रतिज्ञादृष्टान्तानुपरोधात् ॥' इति **ब्रह्मसूत्रे** (१/४/२३) ।

वेदान्तपारिजातसौरभभाष्ये तु –

प्रकृतिरुपादानकारणं चकारान्निमित्तकारणं च परमात्मैव 'उत तमादेशमप्राक्ष्यो येनाश्रुतं श्रुतं भवत्यमतं मतं भवत्यविज्ञातं विज्ञातं भवति' इति प्रतिज्ञायाः, 'यथा सौम्यैकेन मृत्पिण्डेन सर्वं मृण्मयं विज्ञातं स्यादि'ति दृष्टान्तस्य च सामञ्जस्यात् ॥ इति ।

वेदान्तकौस्तुभभाष्ये तु –

इत्थं निरीश्वरसाङ्ख्यमतं निराकृत्येदानीं सेश्वरसाङ्ख्यमतं निराकुर्वन् पूर्वोक्तं जगदभिन्ननिमित्तोपादानकारणत्वं भगवतो द्रढयति ।

ननु 'जन्माद्यस्य यत' इति ब्रह्मलक्षणप्रतिपादकसूत्रानन्तर-मस्याधिकरणस्य पाठो युक्तः, दृढतया जगत्कारणप्रकारविधायकत्वादिति चेन्न । सम्यक् पश्यतीहैवास्य योग्यत्वात् । तथा हि 'ब्रह्मजिज्ञासा कर्त्तव्या' किं तल्लक्षणं ब्रह्मण इत्याकाङ्क्षायां 'जन्माद्यस्य यत' इति ब्रह्मलक्षणमुक्तम् । तत्रोपादानत्वं निमित्तत्वं चश्रुतिसूत्राभ्यां सिद्धमेव । तदनन्तरमुपादानत्वं वा, निमित्तत्वं वेत्याकाङ्क्षाभावान्न पुनः प्रपञ्चितम् । अत्र तु स्वातन्त्र्येण प्रकृतिपरिणामवादिनो निराकृताः । अपि तत्र केचित्सेश्वरसाङ्ख्याः प्रत्यवतिष्ठन्ते – लोके चेतनानां कुलालादीनां निमित्तकारणत्वमेव दृष्टं, नोपादानत्वं, 'स ऐक्षत ईक्षांचक्रे' इत्यादिनेक्षापूर्विका सृष्टिरुक्ता । अत्र ईक्षिता परमेश्वरः कथञ्चिन्निमित्तमात्रमस्तु जगत्कारणम्, उपादानं तु महदादेस्तदधिष्ठितं प्रधानमेव, घटादेर्मृदादिवत् । 'विकारजननीमज्ञामष्टरूपामजां ध्रुवाम् । ध्यायते ध्यासिता तेन मन्यते प्रेरिता पुनः ॥ सूयते पुरुषार्थं च तेनैवाधिष्ठिता जगत् । गौरनाद्यन्तवती सा जनित्री

भूतभाविनी'त्यादिशास्त्रप्रामाण्यादिति । अत्राभिधीयते । ब्रह्मैव जगतः प्रकृतिरुपादानं, चकारान्निमित्तञ्च । कुतः ? 'प्रतिज्ञादृष्टान्तानुपरोधात्' । प्रतिज्ञायाः दृष्टान्तस्य च अबाधनात् सामञ्जस्यात् । प्रतिज्ञा तावत् – 'उत तमादेशमप्राक्ष्यो येनाश्रुतं श्रुतं भवत्यमतं मतमविज्ञातं विज्ञातमि'ति । श्रुत्यर्थस्तु हे पुत्र श्वेतकेतो ! तमादेशं तमादेष्टारं परमात्मानमप्राक्षः पृष्टवानसि, येन गुरुमुखात् श्रुतेनाश्रुतमपि श्रुतं भवति, अमतं मतं भवति, अविज्ञातं विज्ञातं भवतीति । अनया प्रतिज्ञया परमात्मन उपादानत्वं गम्यते, उपादानश्रवणादिना उपादेयश्रवणादेरेव सङ्गतत्वात् । दृष्टान्तस्तु – 'यथा सोम्यैकेन मृत्पिण्डेन सर्वं मृण्मयं विज्ञातं स्यादि'त्यादि । अनेन दृष्टान्तेन दार्ष्टान्तेऽपि परमात्मन उपादानत्वं गम्यते । नहि दृष्टान्ते कुलालो गृहीतः, न च कुलालेन ज्ञातेन घटो ज्ञातः स्यात्, मृत्पिण्डेन तु ज्ञानेन सर्वं घटादिकं मृण्मयं विज्ञातं स्यादेव । यदुक्तं लोके चेतनानां कुलालादीनां निमित्तत्वमेव दृष्टमिति । तत्रोच्यते । न वयमनुमानादिना जगत्कारणं साधयामः, येन कुलालादिदृष्टान्तापेक्षा भवेत् । वयं तु वेदविरुद्धसर्वप्रमाणपरित्याग-पूर्वकशास्त्राचार्योक्तकारिणः । किञ्च लोकेऽपि केशलोमादिकार्य्यस्योपादानकारणं चेतनं पुरुषम्, ऊर्णाया उपादानमूर्णनाभिञ्च पश्यामः । श्रूयते च 'यथा पुरुषात्केशलोमानि, यथोर्णनाभिः सृजते गृह्णते चे'ति । नन्वत्रोपादेयानुरूपो हि उपादानेऽंशोप्यस्तीति चेत् । प्रकृतेप्यस्ति प्रकृत्याख्या देवात्मशक्तिः ॥ इति । एवं अनन्तरवर्त्ती उपदेशोऽपि प्राप्यते । तदपि द्रष्टव्यम् ।

'अभिध्योपदेशात् ॥' इति ब्रह्मसूत्रे (१/४/२४) ।

वेदान्तपारिजातसौरभभाष्ये तु –

'तदैक्षत बहुस्यामि'त्यभिध्योपदेशाद्ब्रह्मणः स्रष्टुत्वप्रकृतित्वे वर्तते ॥ इति ।

वेदान्तकौस्तुभभाष्ये तु –

'सोऽकामयत' इत्यभिध्योपदेशात् सङ्कल्पोपदेशात् स्रष्टृत्वं, 'बहु स्यामि'ति सङ्कल्पोपदेशादुपादानत्वञ्च परमात्मन एवोपपद्यते ॥ इति ।

'साक्षाच्चोभयाम्नानात् ॥' इति ब्रह्मसूत्रे (१/४/२५) ।

वेदान्तपारिजातसौरभभाष्ये तु –

'ब्रह्म वनं' ब्रह्म स वृक्ष आसीद्यतो द्यावापृथिवी निष्टतक्षुर्मनीषिणो मनसा पृच्छ्यते तद्यदध्यतिष्ठद्भुवनानि धारयन्नि'ति निमित्तत्वमुपादानत्वं च ब्रह्मणः, आम्नानाद्ब्रह्मैवोभयरूपम् ॥

वेदान्तकौस्तुभभाष्ये तु –

चशब्दोऽवधारणे । प्रकृतिर्निमित्तञ्च ब्रह्मैव । कुतः ? 'साक्षादुभयाम्नानात्' । तथा हि 'किंस्विद्वनं क उ स वृक्ष आसीद्यतो द्यावापृथिवी निष्टतक्षुर्मनीषिणो मनसा पृच्छ्यते तद्यदध्यतिष्टत् भुवनानि धारयन्नि'ति, जगदुपादाननिमित्तादिप्रश्ने 'ब्रह्म वनं ब्रह्म स वृक्ष आसीद्यतो द्यावापृथिवी निष्टतक्षुर्मनीषिणो मनसा विब्रवीमि वो ब्रह्माध्यतिष्ठद्भुवानि धारयन्नि'ति साक्षादुभयं निमित्तकारणत्वमुपादानकारणत्वं च ब्रह्मण आम्नायते ॥ इति ।

'आत्मकृतेः परिणामात् ॥' इति **ब्रह्मसूत्रे** (१/४/२६) ।

वेदान्तपारिजातसौरभभाष्ये तु –

ब्रह्मैव निमित्तमुपादानञ्च । कुतः ? 'तदात्मानं स्वयमकुरुत' इत्यात्मकृतेः । ननु कर्त्तुः कुतः कृतिविषयत्वं ? परिणामात्सर्वज्ञं सर्वशक्ति ब्रह्म स्वशक्तिविक्षेपेण जगदाकारं स्वात्मानं परिणमय्य, अव्याकृतेन स्वरूपेण शक्तिमता कृतिमता परिणतमेव भवति ॥ इति ।

वेदान्तकौस्तुभभाष्ये तु –

ब्रह्मैव निमित्तमुपादानञ्च । कुतः ? 'आत्मकृतेः' । 'तदात्मानं स्वयमकुरुते'ति आत्मनः कर्मभूतस्य कृतिविषयस्य स्वयं कृतिमान्निर्दिश्यते, कृतिः करणमतो हेतोरित्यर्थः । ननु स्वस्य कृतिमतः स्वात्मैव कृतिविषयत्वेन कथं सङ्गच्छते, तत्राह 'परिणामात्' । सर्वज्ञः सर्वशक्तिरप्रच्युतस्वरूपः परमात्मा स्वात्मकस्वाधिष्ठितनिजशक्तिविक्षेपेण जगदाकारं स्वात्मानं परिणमयतीत्येवंभूतात्परिणामात्सर्वमनवद्यम् । 'पराऽस्य शक्तिर्विविधैव श्रूयते स्वाभाविकी ज्ञानबलक्रिया च, विचित्रशक्तिः पुरुषः पुराणो न चान्येषां शक्तयस्तादृशाः स्युः । शक्तयः सर्वभावानामचिन्त्यज्ञानगोचराः । शतशो ब्रह्मणस्तास्तु सर्गाद्या भावशक्तयः । भवन्ति तपतां श्रेष्ठ ! पावकस्य यथोष्णते'त्यादि श्रुतिस्मृतिप्रतिपादिता अनन्ताः स्वाभाविक्यस्तस्य शक्तयः सन्ति । तासां सृष्ट्यादौ विक्षेपं करोति । श्वेताश्वतराणां मन्त्रवर्योऽस्य सृष्ट्यादावन्यनिरपेक्षत्वं समानातिशयशून्यत्वञ्च प्रतिपादयति 'न तस्य कार्यं करणञ्च विद्यते न तत्समश्चाभ्यधिकश्च दृश्यत' इति । सर्वशक्तिविक्षेपरूपपरिणामे च 'यथोर्णनाभिः सृजते गृह्णते च, प्रधानं पुरुषं चापि प्रविश्यात्मेच्छया

हरिः । क्षोभयामास सम्प्राप्ते सर्गकाले व्ययाव्ययौ ॥ प्रसार्य च यथाङ्गानि कूर्मः संहरते पुनः । तद्वद्भूतानि भूतात्मा सृष्टानि ग्रसते पुनः' इत्यादि श्रुतिस्मृतयो मानम् ॥ इति ।

'योनिश्च हि गीयते ॥' इति **ब्रह्मसूत्रे** (१/४/२७) ।

'यद्भूतयोनिं परिपश्यन्ति धीराः, कर्त्तारमीशं पुरुषं ब्रह्मयोनिमि'ति चेति योनिशब्देन ब्रह्म गीयते, अतो ब्रह्मैवोपादानम् ॥ इति ।

वेदान्तकौस्तुभभाष्ये तु –

हि यतो 'यद्भूतयोनिं परिपश्यन्ति धीरा' इति 'कर्त्तारमीशं पुरुषं ब्रह्मयोनिमि'ति च 'एष योनिः सर्वस्ये'ति चोपादानवाचकेन योनिशब्देन ब्रह्म गीयते, अतो हेतोरुपादानं ब्रह्मैवेत्यर्थः । तस्मात्साङ्ख्यपक्षो वेदविरुद्धत्वान्नादर्त्तव्यः । सर्ववेदैकवेद्यो जगद्भिन्नाभिन्नः श्रीपुरुषोत्तमो भगवान्सर्वेश्वरः श्रीकृष्ण एव जगदभिन्ननिमित्तोपादानत्वेन मुमुक्षुभिर्ध्येय इति सिद्धम् ॥ इति ।

जीवो जगच्चोभयं ब्रह्मणो भिन्नमभिन्नश्च । उभयमेतत् ब्रह्मणः शक्तिरूपमंशमात्रम् । एतद्द्वयमतिक्रम्य ब्रह्म विराजते । यया शक्त्या ब्रह्म जगद्रूपेण प्रकाशितं भवति सा मायाशक्तिः । इयं ब्रह्मण आत्मभूता शक्तिः । अस्या मायाशक्तेर्नामान्तरं प्रकृतिरिति । इयं माया प्रकृतिर्वा सत्त्वरजस्तमोभिधेयत्रिगुणात्मिका । जीवस्य बुद्धिः, अहङ्कारः, मनः, वचनं, रूपरसादि, इन्द्रियादि चेति सर्वमेतस्याः प्रकृतेः रूपान्तरमात्रम् । ब्रह्म जीवरूपेण जगद्रूपेण च प्रकाशितमप्येतमुभयमतिक्रम्य विद्यत इति श्रुतिप्रमाणितम् । प्रसङ्गेऽस्मिन् –

'प्रकृतैतावत्त्वं हि प्रतिषेधति ततो ब्रवीति च भूयः ॥' इति **ब्रह्मसूत्रे** (३/२/२२) ।

वेदान्तपारिजातसौरभभाष्ये तु –

किं 'नेति नेती'ति वाक्यं 'द्वे वाव ब्रह्मणो रूपे मूर्त्तश्चामूर्त्तश्चे'त्यादिना प्रकृतं मूर्त्तामूर्त्तादिरूपं प्रतिषेधत्यथवा प्रकृतरूपयोगात्प्राप्तम्ब्रह्मण एतावत्त्वमिति ? सन्देहे, रूपं प्रतिषेधतीति प्राप्ते, उच्यते – प्रकृतैतावत्त्वमेव प्रतिषेधति, ततो भूयो न ह्येतस्मादिति नेत्यन्यत्परमस्तीत्यादिवाक्यशेषो ब्रवीति ॥ इति ।

वेदान्तकौस्तुभभाष्ये तु –

पूर्वत्रोभयलिङ्गं ब्रह्मेत्युक्तमिदानीं ब्रह्मरूपत्वेन प्रमाणान्तराऽनवगतं

श्रुतिवेद्यं ब्रह्मात्मकत्वाद्ब्रह्मणो रूपं नेदम्ब्रह्मणो रूपमित्येवं श्रुत्यप्रतिषेध्यं चिदचिदात्मकञ्जगत्सत्यमस्ति तद्योगात्प्राप्तम्परिच्छिन्नत्वञ्चानन्ताचिन्त्य-कल्याणगुणशक्तिमतस्तद्रूपवतो ब्रह्मणो निवार्य्यते ।

बृहदारण्यके 'द्वे वाव ब्रह्मणो रूपे मूर्त्तञ्चामूर्त्तञ्चे'त्युपक्रम्य 'तस्य ह वा एतस्य पुरुषस्य रूपं यथा महारजतमि'त्यादिना महारजतादीनि रूपविशेषाणि च दर्शयित्वाऽऽम्नायते 'अथात आदेशो नेति नेती'ति । तत्र मूर्त्तं तेजोऽवन्नात्मकम्भूतत्रयममूर्त्तञ्च वाय्वाकाशात्मकम्भूतद्वयं महारजतादीनि रूपविशेषाणि च प्रकृतानि । तत्र संशयः किं 'नेति नेती'तिश्रुतिः प्रकृतं ब्रह्मणो मूर्त्तामूर्त्तादिरूपजातं प्रतिषेधति, किं वा प्रकृतं यद्ब्रह्मणो मूर्त्तामूर्त्तादिरूपजातं तद्वत्त्वेन प्राप्तं ब्रह्मणो यदेतावत्त्वं तन्निषेधतीति ? तत्र मूर्त्तामूर्त्तादिरूपजातं प्रतिषेधतीति प्राप्ते, उच्यते प्रकृतं यद्यन्मूर्त्तामूर्त्तादिकं ब्रह्मणो रूपं तत्तद्रूपयोगात्प्राप्तं यद्यदेतावत्त्वं तत्तन्नेति नेतीतिश्रुतिः प्रतिषेधति । हिशब्दो 'द्वे वाव ब्रह्मणो रूपे मूर्त्तञ्चामूर्त्तञ्च, ऐतदात्म्यमिदं सर्वं, सर्वं खल्विदं ब्रह्म, भोक्ता भोग्यं प्रेरितारश्च मत्वा सर्वं प्रोक्तं त्रिविधं ब्रह्ममेतदि'त्यादिश्रुतिशतसिद्धं चिदचिदात्मकं सर्वं ब्रह्मात्मकत्वाद्ब्रह्मणो रूपं प्रतिषेधानर्हमिति दर्शयति, इयत्तानवच्छिन्नत्वम्परस्य ब्रह्मणो दर्शयति – 'ततो ब्रवीति च भूय' इति । तत एतावत्त्वनिषेधानन्तरं भूयः पुनः इयत्तानवच्छिन्नं ब्रह्म वाक्यशेषो ब्रवीति । यद्वा पूर्वोक्तात् मूर्त्तामूर्त्तादिकाद्रूपाद्भूयो भूयस्त्वं वाक्यशेषो ब्रवीति, नह्येतस्मादिति नेत्यन्यत्परमस्ति । 'अथ नामधेयं सत्यस्य सत्यं प्राणा वाव सत्यं तेषामेष सत्यमि'ति । अस्यार्थः – एतस्मात्पूर्वोक्तादन्यद्ब्रह्मस्वरूपं नहीति न वाच्यम् । एतस्मात्परमुत्कृष्टमियत्तानवच्छिन्नं समानातिशयशून्यं ब्रह्मास्ति । तस्य सर्वोत्कृष्टस्य ब्रह्मणो नामधेयमप्यस्ति । तदेवाह – सत्यस्य सत्यमिति । ननु कस्य सत्यस्य सत्यमित्याकाङ्क्षायामाह – 'प्राणा वाव सत्यं तेषां सत्यमि'ति । प्राणाः प्राणवन्तो जीवास्ते वियदादिवत्स्वरूपान्यथाभावं सृष्टिवेलायां न प्राप्नुवन्त्यतस्ते सत्यं, ब्रह्मणो हि सर्वकारणत्वाद्वेदा यथा नित्यास्तथाऽपि सुप्तोत्थितन्यायेन यत उत्पद्यन्ते, तथा जीवा अप्यनादिकर्म्मवशाद्देहयोगेन जन्मभाजो ज्ञानसङ्कोचविकाशरूपविकारवन्त एतत्परस्य ब्रह्मणो नास्त्यतस्तदंशित्वाच्च तेषामपि सत्यमित्यर्थः । अत एवाह श्रुतिः – 'नित्यो नित्यानाञ्चेतनश्चेतनानामि'ति ॥ इति ।

'अरूपवदेव हि तत्प्रधानत्वात् ॥' इति ब्रह्मसूत्रे (३/२/१४) ।

वेदान्तपारिजातसौरभभाष्ये तु –

'नामरूपे व्याकरवाणी'त्यस्मिन्कार्य्येऽपि परस्य नामरूपनिर्वाहकत्वेन प्रधानत्वाद्धेतोः स्वोत्पाद्यनामरूपभोक्तृत्वाभावाद्ब्रह्मारूपवद्भवति, अतो दोषगन्धाऽनाघ्रातं ब्रह्म ॥ इति ।

वेदान्तकौस्तुभभाष्ये तु –

नन्वस्तु स्थानतोऽपि ब्रह्मणि दोषाभावः, तथापि नामरूपकर्त्तृत्वेन ब्रह्मणस्तद्भोक्तृत्वं प्राप्नोति, कर्त्तुः प्रवृत्तेस्तदभ्युदयार्थत्वात् । 'नामरूपे व्याकरवाणी'ति नामरूपयोरुत्तमपुरुषप्रयोगाद्ब्रह्मकर्त्तृकत्वमवगम्यते, तस्मात्परस्य ब्रह्मणः कर्मवश्यत्वसिद्धिः, कर्म्मवश्ये सर्वदोषाः सम्भवन्तीत्यत्राह – रूपाणि नामसहितानि देवदेहादीनि जीवकर्म्मानुसारिब्रह्मकृतानि भोग्यत्वेन न विद्यन्ते अस्य अतोऽरूपवदेव ब्रह्म नामरूपयोर्व्याकरणे स्वभोगार्थं नैव प्रवर्त्तत इत्यर्थः, आप्तकामत्वात् । हिशब्दः प्राकृतनामरूपनिबन्धनानां सर्वेषां दोषाणां ब्रह्मण्यभावं सूचयति । कुतः ? तत्प्रधानत्वात् तस्मिन्कार्य्ये ब्रह्मणो नामरूपनिर्वहितृत्वेन प्रधानत्वात् । 'आकाशो ह वै नामरूपयोर्निर्वहिते'ति श्रुतेर्जीवार्थं नामरूपनिर्वहितृत्वं परस्य जीवेनेतिपदमपि सूचयति । पूर्वोक्तलक्षणो ब्रह्मांशो जीवपदार्थस्तत्रांशित्वेन ब्रह्मापि वर्त्तते 'य आत्मनि तिष्ठन्नि'ति श्रुतेः । तत्र देवादिनामरूपोत्पादनेऽंशप्रवृत्त्यनुपपत्त्यांश-कार्य्यसिद्ध्यर्थं प्रवृत्तेऽंशिनि ब्रह्मणि जीवशब्दप्रवृत्तिर्मुख्यैव । अतो जीवेनात्मनेति सामानाधिकरण्यम्, जीवस्य कर्म्मवश्यत्वात्तद्रूपसम्बन्धित्वेन दोषाः सम्भवन्ति । ब्रह्मणो जीवकर्म्मानुरूपकर्त्तृत्वेऽपि तत्फलभोक्तृत्वाभावा-न्नोक्तदोषाः सम्भवन्ति । तस्मादुभयलिङ्गं ब्रह्म ॥ इति ।

'आनन्दमयोऽभ्यासात् ॥' इति ब्रह्मसूत्रे (१/१/१३) ।

वेदान्तपारिजातसौरभभाष्येतु –

आनन्दमयः परमात्मैव नतु जीवः, कुतः ? परमात्मविषयकानन्द-पदाभ्यासात् ॥ इति ।

वेदान्तकौस्तुभभाष्ये तु –

एवं खलु प्रधानकारणवादनिरासव्याजेनाचिद्वर्गात्स्वरूपतो भिन्ने ब्रह्मणि,

'सदेव सौम्येदमि'त्यादिश्रुतीनां समन्वयो दर्शितः । इदानीश्चेतनवर्गादपि निरतिशयानन्दवत्त्वेन स्वरूपतो विभिन्ने ब्रह्मणि आनन्दमयादीनां श्रुतीनां समन्वयं दर्शयति । तैत्तिरीयके अन्नमयप्राणमयमनोमयविज्ञानमयकोशचतुष्टयम् अनुक्रम्याम्नायते – 'तस्माद्वा एतस्माद्विज्ञानमयादन्योन्तरात्माऽऽनन्दमयस्तेनैष पूर्ण' इति । तत्र संशयः – किमत्रानन्दमयपदेन प्रत्यागात्मोच्यते उत परमात्मेति । किं तत्र युक्तम् ? 'तस्यैष एव शारीर आत्मा यः पूर्वस्ये'ति शारीरत्वश्रवणात्, अन्नमयप्राणमयमनोमयविज्ञानमयानन्दमया मे शुद्ध्यन्तामि'ति श्रुत्यन्तरे आनन्दमयस्य शोध्यत्वश्रवणाच्च, नित्यशुद्धस्य परमात्मनः शोध्यत्वासम्भवाच्च आनन्दमय प्रत्यगात्मेति प्राप्ते ब्रूमः । आनन्दमयः निरतिशयानन्दवान् परमात्मैव । कस्मात् ? अभ्यासात् । परमात्मनि पुरुषोत्तम एवानन्दशब्दस्य बहुकृत्वोऽभ्यस्यमानत्वात् 'यदेष आकाश आनन्दो न स्यात् । एष ह्येवानन्दयाति । आनन्दो ब्रह्मेति व्यजानादि'त्यादिना । अपि च 'सैषाऽऽनन्दस्य मीमांसा भवती'त्यारभ्य 'आनन्दं ब्रह्मणो विद्वान्न बिभेति कुतश्चने'त्यन्तस्य वाक्यस्य ब्रह्मानन्दे एव निरतिशयापरिमितत्वप्रतिपादनेन समाप्तिदर्शनात् । नन्वानन्दपदस्यैव तत्राभ्यासोऽस्ति नत्वानन्दमयस्येति चेन्न । 'वसन्ते ज्योतिषा यजेते'त्यत्र ज्योतिःशब्दस्य ज्योतिष्टोमपरत्ववदानन्दपदस्याप्यानन्दमयपरत्वात् । यत्तूक्तं शारीरत्वश्रवणान्न परमात्माऽऽनन्दमय इति, तत्र सर्वेष्वन्नमयादिषु तन्नियन्तृत्वेन वर्त्तमानत्वात्परमात्मनः शारीरत्वव्यपदेशः सङ्गच्छते । आनन्दमये तु 'तस्यैष एव शारीर आत्मा यः पूर्वस्ये'ति निर्देशस्तस्यानन्यात्मत्वं दर्शयति । शुद्ध्यन्तामित्यस्य च प्रसाध्यन्तामित्यर्थः॥ इति ।

ब्रह्म चक्षुरादीन्द्रियातीतमेव भवति । तदुक्तं यथा –

'तदव्यक्तमाह ॥' इति ब्रह्मसूत्रे (३/२/२३) ।

वेदान्तपारिजातसौरभभाष्ये तु –

'न चक्षुषा गृह्यते नापि वाचे'त्यादिशास्त्रं ब्रह्माव्यक्तमाह ॥ इति ।

वेदान्तकौस्तुभभाष्ये तु –

एवम्भूतं ब्रह्म मूर्त्तादिरूपवदपि ततो भयस्त्वेन रूपेण वर्त्तमानं सत्साधारणैः करणैर्न गृह्यत इत्याह – तद्ब्रह्माव्यक्तमग्राह्यं हि शास्त्रमाह 'न सदृशे तिष्ठति रूपमस्य न चक्षुषा पश्यति कश्चनैनम् । न चक्षुषा गृह्यते नापि

वाचा नान्यैर्देवैस्तपसा कर्मणा वे'त्यादि ॥ इति ।

समुचितभक्तिबलेन हि ब्रह्मणः साक्षात्कारः सम्भवति । तदुपदिश्यते भगवता वेदव्यासेन यथा –

'अपि संराधने प्रत्यक्षानुमानाभ्याम् ॥' इति ब्रह्मसूत्रे (३/२/२४) ।

वेदान्तपारिजातसौरभभाष्ये तु –

भक्तियोगे ध्याने तु व्यज्यते 'ब्रह्मज्ञानप्रसादेन विशुद्धसत्त्वस्ततस्तु तं पश्यति निष्कलं ध्यायमानः, भक्त्या त्वनन्यया शक्य अहमेवंविधोऽर्जुन !। ज्ञातुं द्रष्टुञ्च तत्त्वेन प्रवेष्टुञ्च परन्तपे'त्यादिश्रुतिस्मृतिभ्याम् ॥ इति ।

वेदान्तकौस्तुभभाष्ये तु –

ननु तर्हि 'आत्मा वा अरे ! दष्टव्य' इत्यादिवाक्यव्याकोपः स्यादित्याशङ्क्य, शास्त्रानुसारिभिर्दर्शनेप्सुभिर्महानुभावैः कृते यत्ने तु व्यक्तो भवतीत्याह – अपिशब्दः सम्भावनायाम् । संराधने सम्यगाराधने निदिध्यासनलक्षणे भक्तियोगे ब्रह्म व्यक्तम्भवति । एतच्च प्रत्यक्षानुमानाभ्यां श्रुतिस्मृतिभ्यां गम्यते । 'यमेवैष वृणुते तेन लभ्यस्तस्यैष आत्मा वृणुते तनुं स्वाम्, ज्ञानप्रसादेन विशुद्धसत्त्वस्ततस्तु तं पश्यति निष्कलं ध्यायमान' इत्यादिश्रुतेः, 'भक्त्या त्वनन्यया शक्य अहमेवंविधोऽर्जुन ! ज्ञातुं द्रष्टुञ्च तत्त्वेन प्रवेष्टुञ्च परन्तप ! ॥ यं विनिद्रा जितश्वासाः सन्तुष्टाः संयतेन्द्रियाः । ज्योतिः पश्यन्ति युञ्जानास्तस्मै योगात्मने नमः ॥ योगिनस्तं प्रपश्यन्ति भगवन्तं सनातनमि'त्यादि स्मृतेश्च ॥ इति ।

श्रीनिम्बार्कदर्शनविचारितं तत्त्वत्रयमेतत् योगशास्त्रतत्त्वत्रयमिव न स्वतन्त्रं किन्तु सर्वतन्त्रस्वतन्त्रब्रह्मपरमात्माभिन्नं, तस्मात् ब्रह्मणः सर्वथा अपृथग्भावेन विद्यमानञ्च । एष श्रौतो भेदाभेदो न तावत् तार्किकसम्मतो भेदाभेदः । चेतनाचेतनात्मकस्यास्य सर्वस्य ब्रह्मात्मकत्वम् । एतत् तत्त्वं प्रतिपादयन् श्रीश्रीनिवासाचार्यचरणः वेदान्तकौस्तुभे (१/१/१) उपदिशति यथा – अत एव तत्त्वद्वयजिज्ञासाकाङ्क्षा नास्ति, एकविज्ञानेन सर्वविज्ञानप्रतिज्ञा च सूपपन्ना । यथाहुः –

सर्वं हि विज्ञानमतो यथार्थकं श्रुतिस्मृतिभ्यो निखिलस्य वस्तुनः ।
ब्रह्मात्मकत्वादितिवेदविन्मतं त्रिरूपतापि श्रुतिसूत्रसाधिता ॥ इति ।

वेदान्तकामधेनुदशश्लोकी (७) वचनमिदं स्फुटीक्रियते श्रीनिम्बार्काचार्य-पीठाधीश्वरेण जगद्गुरुणा श्रीराधासर्वेश्वरशरणदेवाचार्येण नवनीतसुधाख्ये ग्रन्थे यथा – इतः पूर्वं तत्त्वमादिपदार्थाः निरूपिताः, तद्यथा हि – ज्ञानस्वरूपमित्यादिश्लोकद्वयेन त्वं-पदार्थः, अप्राकृतमित्याद्येकेन श्लोकेन इदं-पदार्थः, 'स्वभावतोऽपास्ते'त्यादिश्लोकद्वयेन तत्पदार्थश्च व्याख्यातः । 'उपासनीयमि'तिश्लोकेन च तत्पदार्थस्य सर्वोपास्यत्वं, तदुपासनस्य च विधेयत्वं प्रतिपादितम् । अधुना श्लोकेनानेन पूर्वश्लोकोक्तोपासनाख्यनिदिध्यासनस्यान्तरङ्ग 'श्रोतव्य' इत्यादिश्रुतिविधेयं वाक्यजन्यज्ञानं निरूपयँस्तत्त्वमस्यादिवाक्यार्थमाह श्रीमदाचार्यपादः –

श्लोकस्यास्यान्वयप्रकारश्चेत्थं बोध्यम्-हि यस्मात् निखिलस्य समग्रस्य वस्तुनः चराचरात्मकस्य श्रुतिस्मृतिभ्यः, निरपेक्षरवः श्रुतिः, पदार्थविवेचिनी स्मृतिः, ताभ्यः स्वतः समूलत्वेन च प्रमाणीभूताभ्यः। ब्रह्मात्मकत्वात् चराचरात्मकजगतो ब्रह्माधीनस्वरूपस्थितिप्रवृत्तिकत्वात् तादात्म्यादिति यावत् । अतः हेतोः सर्वं प्रत्येकवस्तुजातस्य समग्रं विज्ञानं बोधः यथार्थकं वास्तविकं न भ्रम इत्यर्थः । (यतः) या त्रिरूपता भोक्तृ-भोग्य-नियन्तृरूपविभिन्नता श्रुतिसूत्रसाधिता – 'भोक्ता-भोग्यं प्रेरितारञ्च मत्वा' इत्यादिश्रुतिभ्यः, 'अंशो नानाव्यपदेशात्, भेदव्यपदेशाच्चान्यः, अधिकं तु भेदनिर्देशात्' इत्यादि सूत्रेभ्यश्च, 'ममैवांशो जीवलोके जीवभूतः सनातनः।' इति । श्रीभगवद्वचनाच्च निर्द्धारिता, साऽपि यथार्था । तदत्र प्रमाणं दर्शयति – इति वेदविन्मतं वेदतत्त्वार्थविदां श्रीसनत्कुमार-नारद-व्यासादीनां, तस्मादेष राद्धान्तः । एवं 'तत्त्वमस्या'दिवाक्यानां सङ्क्षिप्तातिसङ्क्षिप्तोऽर्थो बोद्धव्यः – स्वतन्त्रसत्ताश्रयो विश्वनियन्ता परमात्मा हि तत्-पदार्थः । परतन्त्रसत्ताश्रयः सर्वेश्वरनियम्यो जीवश्च त्वं-पदार्थः । असि-पदञ्च तादात्म्यसम्बन्धं तयोः सूत्रयति, तथा च त्वं तदात्मकोऽसीति वाक्यार्थो निर्झरति ।

तादात्म्यञ्च भेदसहिष्णुरभेदो भिन्नाभिन्नो द्वैताद्वैतापरपर्य्यायः । अतः शुक्तिरजतादिस्थलेऽपि नात्यन्तं भ्रमः । पञ्चीकरणप्रक्रियया शुक्तावपि रजतानां सत्त्वाद्विशिष्टपार्थिवादिषु पदार्थेषु तदतिरिक्तपदार्थानामधिकांशत्वभानमेव भ्रान्तिर्निगद्यते । केवलाद्वैत-केवलद्वैतप्रतिपादकवाक्यान्यपि क्रमशः

स्वतन्त्रसत्तापरतन्त्रसत्ताप्रतिपादनेनैव सार्थकानि । द्वैतनिषेधकवाक्यानि तु परतन्त्रसत्ताश्रययोर्जीवजड़पदार्थयोश्च स्वातन्त्र्यं निषेधयन्ति । तत्रोभयविधश्रुतिस्मृतिसूत्रादिवचनान्येवमवधेयम्, तद्यथा अभेदप्रतिपादकानि वचनानि – 'सदेव सौम्येदमग्र आसीदेकमेवाद्वितीयम्, आत्मा वा इदमेक एवाग्र आसीत्', 'तत्त्वमसि', 'अयमात्मा ब्रह्म', 'सोऽहं ब्रह्मास्मि', 'आत्मैवेदं सर्वम्', 'सर्वं खल्विदं ब्रह्म तज्जलानिति', 'अत एव च तद्ब्रह्म', 'अनवस्थितेरसम्भवाच्च नेतरः', 'तदनन्यत्वमारम्भणशब्दादिभ्यः', 'क्षेत्रज्ञं चापि मां विद्धि', 'नास्ति परं ततोऽन्यत्' इत्यादि वचनानि तदभेदद्योतकानि सन्ति । एवञ्च भेदप्रतिपादकानि वचनान्यपि समवधेयानि, तद्यथा – 'नित्यो नित्यानां 'रसो वै सः, रसं ह्येवायं लब्ध्वाऽऽनन्दी भवति', 'सोऽश्नुते सर्वान् कामान् सह ब्रह्मणा विपश्चिता', 'स तत्र पर्येति जक्षन् क्रीड़न् रममाणः', 'सर्वभूतान्तरात्मा', 'अन्तःप्रविष्टः शास्ता जनानां', 'ज्ञाज्ञौ द्वावजावीशानीशौ', 'प्रधानक्षेत्रज्ञपतिर्गुणेशः' । 'ज्योतिषां ज्योतिः', 'सर्वस्य वशी सर्वस्येशानः', 'भेदव्यपदेशाच्च', 'शारीरश्चोभयेऽपि हि भेदेनैनमधीयते', 'विवक्षितगुणोपपत्तेश्च', 'सर्वधर्मोपपत्तेश्च', 'द्वाविमौ पुरुषौ लोके क्षरश्चाक्षर एव च', 'उत्तमः पुरुषस्त्वन्यः', 'चतुर्विधा भजन्ते मां जनाः सुकृतिनोऽर्जुन' इत्याद्युभयात्मकानि श्रुतिसूत्रस्मृतिवचनानि ज्ञातव्यानि सन्ति । एवञ्चोभयविधवाक्यानि सादरमभिगृह्य श्रीनिम्बार्काचार्यवर्येण जगन्नियन्त्रा भगवता सर्वेश्वरेण सह चेतनाचेतनयोः स्वाभाविकद्वैताद्वैत (भेदाभेद) सिद्धान्तः प्रतिपादितः । तच्च सर्वनियन्तृत्व-सर्वात्मत्व-सर्वव्यापकत्व-स्वतन्त्रसत्त्व-सर्वाधारत्वादिधर्मैश्च तस्य तयोश्चात्यन्तभेदः । ब्रह्मात्मकत्व-तन्नियम्यत्व-तत्तन्त्रसत्त्व-तत्पराधेयत्वादियोगेन चाभेदः । एवञ्च सङ्क्षेपेणैवावबोध्यम् । विस्तृतविवेचनन्तु वेदान्तरत्नमञ्जूषायामेवावलोकनीयम् ॥ इति ।

श्रीराधाकृष्णयुगलोपासना –

मनुष्यरूपो जीवो ज्ञानस्वरूपोऽपि अल्पज्ञोऽल्पशक्तिश्च विद्यते । अघटनघटनपटीयस्या माययैव तस्य ज्ञानमावृतं भवतीति हेतोः स मुह्यमानः सन् शोचति अनिशम् । सामान्यतः स स्वजीवने परमोत्कर्षमधिरोढुं न प्रभवति । हृदये सदा सन्निहितस्य सुखप्रकाशस्वरूपस्य सर्वेश्वरस्य ब्रह्मणः अनुभवगोचरे

सति मनुष्यस्य दुःखाज्ञानान्धकारो दूरीभवति । प्रकाशपूर्णे हृदयेऽस्मिन् विहर्ता सन्मार्गप्रचोदयिता वैराग्यवसुदाता परात्ता जगज्जननिवहधर्ता लोकोद्धर्ता व्याकर्ता भक्तानां कर्मबन्धनानि उच्छिनत्ति । एतदनुरोधेन प्रतिदर्शनसम्प्रदायम् उपासना विधीयते ।

द्वैताद्वैतवेदान्तदर्शनसम्प्रदाये श्रीराधाकृष्णयुगलोपासना समादृता अस्ति। श्रीकृष्णेन सह राधाया उपासनं श्रीनिम्बार्काचार्यसम्प्रदायस्य प्रधानं वैशिष्ट्यम् । एतच्च ध्याने अपश्यत् आद्याचार्यवर्यः श्रीनिम्बार्कभगवान् । अत एव उक्तवान् वेदान्तकामधेनुदशश्लोक्याम् (४,५) –

स्वभावतोऽपास्तसमस्तदोषमशेषकल्याणगुणैकराशिम् ।
व्युहाङ्गिनं ब्रह्म परं वरेण्यं ध्यायेम कृष्णं कमलेक्षणं हरिम् ॥
अङ्गे तु वामे वृषभानुजां मुदा विराजमानामनुरूपसौभागाम् ।
सखीसहस्रैः परिसेवितां सदा स्मरेम देवीं सकलेष्टकामदाम् ॥ इति।

ब्रह्म एकमेव । इदं खलु रसस्वरूपम् । एतत्प्राप्य जीव आनन्दी भवति । ब्रह्मणि हि सर्वे रसा विद्यन्ते । स पुरुषोत्तमः स्वयमेव नायिकारूपं विधाय रसोपासनायां तत्परो भवति । वेदविदः परमपुरुषस्य इदं नायिकारूपं 'रसिकानन्दस्वरूपिणी श्रीराधा' इति मन्यन्ते । तदुक्तं तत्त्वसिद्धान्तबिन्दुधृते सामवेदे उत्तरार्च्चिके – 'अनाद्ययं पुरुष एक एवास्ति । तदेवं रूपं विधाय सर्वान् रसान् समाहरति, स्वयमेव नायिकारूपं विधाय समाराधनतत्परोऽभूत् । तस्मात्तां राधां रसिकानन्दां वेदविदो वदन्ति, तस्मादानन्दमयोऽयं लोकः।' इति । श्रीश्रीनिवासाचार्य इव श्रीनिम्बार्काचार्यस्य अपरः शिष्यः श्रीऔदुम्बराचार्यः । स स्वप्रणीते 'औदुम्बरसंहिता' इत्याख्ये ग्रन्थे राधाकृष्णतत्त्वं विशेषतो निरूपयति स्म । तत्र स दर्शयति युग्माराधनव्रते –

'संसेवितं तत्र न भेदमाचरेच्छ्रीराधिकाकृष्णयुगार्च्चनव्रती ।
दोषाकरत्वाद्धि भिदानुवर्त्तिनां सत्कर्मणामेवमभेद्यभेदिनाम् ॥' इति ।

अज्ञानान्धकारनिवृत्तिनिमित्तं नितरां सदा श्रीराधाकृष्णयुगलोपासना कर्त्तव्या । श्रीसनकादिमहर्षिभिः देवर्षिवर्य्यनारदाय उपदिष्टेयं श्रीराधाकृष्णयुगलोपासना । इयमुपासना वैदिकसिद्धान्तानुकूला वरीवर्त्ति । इयं च जीवैः सततमाश्रयणीया । अतोऽत्र श्रीनिम्बार्काचार्यः वेदान्तकामधेनुदशश्लोकीग्रन्थे (६) प्रस्तौति –

उपासनीयं नितरां जनैः सदा प्रहाणयेऽज्ञानतमोऽनुवृत्तेः ।
सनन्दनाद्यैर्मुनिभिस्तथोक्तं श्रीनारदायाखिलतत्त्वसाक्षिणे ॥ इति ।

तत्त्वमेतत् स्फुटीकृतं जगद्गुरुणा श्रीराधासर्वेश्वरशरणदेवाचार्येण नवनीतसुधाव्याख्यायां यथा – इतः पूर्वं श्लोकपञ्चकेन तत्त्वत्रयं साङ्गोपाङ्गतया प्रतिपाद्येदानीं भगवद्भावापत्तिरूपमोक्षप्राप्तिसाधनीभूतामुपासनां दर्शयति करुणैकचित्ताचार्यपादः – जनैरत्र श्रीहरिभक्तिनिरतैर्भगवद्दर्शनबुभुक्षुभि-र्मुमुक्षुभिः अज्ञानतमोऽनुवृत्तेरनाद्यनन्तमायाजनिताज्ञानपरम्परापुञ्जप्रतिबन्धकस्य प्रहाणये समग्रतयाऽऽत्यन्तिकनिवृत्त्यर्थं सदा सर्वास्ववस्थासु नितरां गङ्गादिप्रवाहवत्प्रतिक्षणं प्रतिपलञ्च 'सततमावर्त्तयेत्' इति श्रीगोपालतापिन्युपनिषद्रीत्या 'सततं कीर्त्तयन्तो माम्' इति श्रीमद्भगवद्गीतोक्त-वचनेन च सातत्येन पूर्वोक्तोपास्यपरकश्लोकद्वयप्रतिपादित-श्रीराधाकृष्णयुगलतत्त्वं रसपरब्रह्म उपासनीयं भजनीयं ध्येयं गेयञ्चेति ।

ननु विविधोपास्यविषयकोपासनानां विद्यमानत्वात्कथमेतसयैवोपास्य-स्योपासना कार्येति चेन्न । लोकाचार्यैः श्रीमत्सनत्कुमारादिभिः शास्त्रसारभूतत्वेनास्यैव प्राधान्यसमर्थितत्वात् । तद्यथाऽऽम्नायते 'छान्दोग्ये भूमविद्याप्रकरणे श्रीनारदसनत्कुमारसंवादे – 'यो वै भूमा तदेव सुखं नाल्पे सुखमस्ति भूमैव सुखं भूमा त्वेव विजिज्ञासितव्य' इति भूमानं भगवो विजिज्ञासे' इति । तथैव च वेदान्तसूत्रभाष्ये भूमाधिकरणेऽपि निपुणं निदर्शितं परमाचार्यवर्यैः । निखिलजगज्जन्मादिहेतुना परब्रह्मणा सर्वेश्वरेण श्रीकृष्णेनापि गीतायां समुपदिष्टं – 'मय्येव मन आधत्स्व मयि बुद्धिं निवेशय', 'मच्चित्तः सततं भव', 'मामेकं शरणं व्रज', 'मन्मना भव मद्भक्तो मद्याजी मां नमस्कुरु' इत्यादि शास्त्रवचनैः । पुराणपुरुषोत्तमो भगवान् सर्वेश्वरः श्रीकृष्ण एव सततं समाराधनीय इति निश्चप्रचम् । एतदेवोत्तरार्द्धेनाभिव्यनक्ति सनन्दनाद्यैर्ब्रह्मणो मानससुतैर्मुनिभिर्मननशीलैः कुमारैः सनकसनन्दनसनातनसनत्कुमारैः अखिलतत्त्वसाक्षिणे सकलशास्त्रोक्तसमस्ततत्त्वविदे श्रीनारदाय श्रीभगवन्निम्बार्कपरम्पराप्रकाशकपञ्चपदीविद्यात्मकश्रीगोपालमन्त्रराजप्रदायकाय तथा श्रीवृन्दावननित्यनिकुञ्जेश्वरसर्वेश्वरश्रीराधाकृष्णोपासनमेव सर्वात्मना सम्पादनीयम् .... इति ।

संसारसागरादुद्धारनिमित्तं जीवेन सर्वेश्वरश्रीराधाकृष्णशरणं गन्तव्यम् । एतं निर्मलं सत्यं ज्ञानमनन्तं ब्रह्मेति मत्वा श्रीनिम्बार्काचार्येण उपदिश्यते वेदान्तकामधेनुदशश्लोक्याम् (८) यथा –

नान्याः गतिः कृष्णपदारविन्दात् संदृश्यते ब्रह्मशिवादिवन्दितात् ।
भक्तेच्छयोपात्तसुचिन्त्यविग्रहादचिन्त्यशक्तेरविचिन्त्यसाशयात् ॥ इति ।

व्याख्यातमेतत् नवनीतसुधाग्रन्थे जगद्गुरुणा श्रीराधासर्वेश्वरशरणदेवाचार्येण – सप्तमश्लोके कोष्ठद्वये क्रमशः प्रथमे तत्त्वमादिपदार्थाः सङ्क्षेपेण निरूपिताः, द्वितीये च कोष्ठे भेदपराणामभेदपराणां भेदनिषेधकारिणाञ्चास्थूलादिवाक्यानां समन्वयप्रक्रियां प्रदर्श्य सर्वस्य वेदस्य स्वार्थे प्रामाण्यं प्रतिपादितम् । अधुनाऽनेनाष्टमश्लोकेन तृतीयकोष्ठे साधनानि विधीयन्ते । तानि साधनानि कर्म-ज्ञान-भक्ति-प्रपत्ति-गुर्वाज्ञानुवृत्ति-योगभेदात्पञ्चविधानि सन्ति । तत्र कर्मयोगः श्रीभगवच्चरणैराचार्यैः 'सदाचारप्रकाशे' निर्णीतः । ज्ञानयोगश्चात्रैव ग्रन्थे सङ्गृहीतो भक्तियोगश्चाग्रिमे नवमश्लोके परिवर्णितोऽस्ति । श्लोकेनानेन तु प्रपत्ति-गुर्वाज्ञानुवृत्तियोगौ प्रतिपद्येते – अचिन्त्यशक्तेः न चिन्तयितुं शक्या अचिन्त्या अचिन्त्या चासौ शक्तिर्यस्य सः अचिन्त्यशक्तिः, तस्मात् अचिन्त्यशक्तेः 'पराऽस्य शक्तिर्विविधैव श्रूयते स्वाभाविकी ज्ञानबलक्रिया च ।' इत्यादिशास्त्रप्रमाणात् । अविचिन्त्यसाशयात् आशयेन सह वर्तमानं साशयं तात्पर्यं ब्रह्मादिभिरप्यचिन्त्यं, सर्वथैवातर्क्यं साशयं तात्पर्यं यस्य सः अविचिन्त्यसाशयस्तस्मात् । 'न ते विष्णोर्जायोमानो न जातो देवस्य महिम्नः परमं तमापः', 'यतो वाचो निवर्त्तन्ते ।' इत्यादिश्रुतिवचनात् तदचिन्त्यत्वं स्वाभाविकमेव । भक्तेच्छयोपात्तसुचिन्त्यविग्रहात् भक्तानामिच्छा भक्तेच्छा तयोपात्तो व्यक्तीकृतो विश्वरूपादिसुचिन्त्यविग्रहो येन सः तस्मात् । यथाऽर्जुनादिसमीहया विश्वरूपादिविविधाचिन्त्यदिव्यस्वरूपदर्शनात् सर्वेश्वरश्रीकृष्णस्य भक्तेच्छयोपात्तसुचिन्त्यविग्रहत्वं स्वतः सिद्धमेव । तत्र श्रीमद्भगवद्गीतायामर्जुनेन सम्प्रार्थितो भगवान् श्रीकृष्णः समुपदिशति, यथा हि – 'पश्य मे पार्थ रूपाणि शतशोऽथ सहस्रशः' । इत्यादि । ब्रह्मशिवादिवन्दितात् – ब्रह्मा च शिवश्च ब्रह्मशिवौ तौ आदिर्येषां ते ब्रह्मशिवादयस्तैर्वन्दितस्तस्मात् ब्रह्मशिवादिवन्दितात् । अर्थादत्रेदमवधेयं

यद्यावन्निखिलविधिशिवपुरन्दरकिन्नरादिसुरवृन्दैस्तथा श्रीसनकादिनारदादि-समस्तऋषिमुनीश्वरैः सततस्तुतिपूर्वकसेवितात्, यथा हि – 'यं सर्वे देवा नमन्ति मुमुक्षवो ब्रह्मवादिनश्च तमेकं गोविन्दं सच्चिदानन्दविग्रहं वृन्दावनसुरभूरुहतलासीनं सततं समरुद्गणोऽहं परमया स्तुत्या तोषयामी'त्यादिश्रुतिवचनात् स्पष्टमेव । कृष्णपदारविन्दात् निखिलजगदुत्पत्ति-स्थितिलयकारणरूपभगवत्परात्परब्रह्मसर्वेश्वरपरमानन्दकन्दनन्दनन्दन-गोलोकव्रजवृन्दावनविहारियुगलचरणकमलात् । 'कृषिर्भूवाचकः शब्दो णश्च निर्वृत्तिवाचकः । तयोरैक्यं परब्रह्म कृष्णशब्देन गीयते ॥' इत्यादिश्रुतिप्रमाणात् कृष्णपदाभिधेयपरब्रह्मणोऽतिरिक्तात् नान्या गतिः अन्या अपरा गतिः अवलम्बो न नैव संदृश्यते विलोक्यते क्षेत्रज्ञानां कृते इति शेषः । अत्र कृष्णपदारविन्दात् इत्यत्र पदशब्दमुपादाय विग्रहयुक्तस्यैव प्रपत्तव्यता द्योतिताः । अरविन्दशब्देन च तत्पदनखसौन्दर्यमभिव्यनक्ति । भगवच्चरणशरणागतिं (प्रपत्तिं) विना कथमपि मुमुक्षूणां जागतिकत्रिविधतापविमोचनं भवितुं नैव शक्यतेऽयमेवाशयः श्लोकवचनस्य । तथा चेयमेव प्रपत्तिः शरणागतिरूपैव प्रतिपादिता भवति । 'आनुकूल्यस्य सङ्कल्पः प्रातिकूल्यस्य वर्जनम् । रक्षिष्यतीति विश्वासो गोप्तृत्ववरणं तथा ॥ आत्मनिक्षेपकार्पण्ये षड्विधा शरणागतिः ॥' इति शास्त्रराद्धान्तदर्शनात् भगवच्छरणागतिस्वरूपप्रतिपादनं स्पष्टम् । अत्र श्रीभगवच्छरणागतिगुर्वाज्ञानुवृत्तियोगस्यापि तदुभयलक्षणं यतो हि 'न विना गुरुसम्बन्धं ज्ञानस्याधिगमः कुतः । गुरुः पारयिता यस्य ज्ञानं प्लवमिहोच्यते ॥' इत्यादिभारतोक्तमानेन सर्वस्यापि साधनजातस्य गुरूपसत्तिपूर्वकत्वात् । गुरूपसत्तिरप्यत्रार्थादेव प्रतिपादितेति बोध्यम् । इत्यादि ।

दैन्यादिलक्षणसमन्विते शरणागते भक्ते अनन्तकृपासागरस्य भगवतः श्रीकृष्णस्य अनिर्वचनीया कृपा भवति । ततः फलरूपा प्रेमलक्षणा पराभक्तिर्जायते । एतस्याः पराभक्तेः अङ्गभूतानि श्रवणादीनि भवन्त्येव । श्रवणादिलक्षणा साधनभक्तिः । यस्यां कस्यञ्चित् परिस्थितावपि परमेश्वरभक्तिसम्बन्धीयं कर्म नूनमनुष्ठातव्यमिति श्रुतिस्मृत्युभयानुशासनम् । तद्यथा बृहदारण्यके (४/४/२१) – तमेव धीरो विज्ञाय प्रज्ञां कुर्वीत ब्राह्मणः । नानुध्यायान् बहूनूछब्दान् वाचो विग्लापनं हि तत् ॥ इति । तथा च भगवद्गीतायाम् (९/१३,१४) – महात्मानस्तु मां पार्थ दैवीं प्रकृतिमाश्रिताः । भजन्त्यनन्यमनसो

ज्ञात्वा भूतादिमव्ययम् ॥ सततं कीर्त्तयन्तो मां यतन्तश्च दृढव्रताः । नमस्यन्तश्च मां भक्त्या नित्ययुक्ता उपासते ॥ इति । तथा च ब्रह्मसूत्रे (३/४/३४) सूत्रितं यथा – सर्वथाऽपि त एवोभयलिङ्गात् ॥ इति । एतत्सर्वमभिलक्ष्य श्रीमद्भागवते (१/८/३६) उक्तं यथा – शृण्वन्ति गायन्ति गृणन्त्यभीक्ष्णश... इत्यादि । ततः परं परापरभक्त्यनुष्ठानार्थमुपदिशति परमकारुणिकः श्रीनिम्बार्काचार्यः वेदान्तकामधेनुदशश्लोक्याम् (९) यथा –

कृपाऽस्य दैन्यादियुजि प्रजायते यया भवेत् प्रेमविशेषलक्षणा ।
भक्तिर्ह्यनन्याऽधिपतेर्महात्मनः सा चोत्तमा साधनरूपिकाऽपरा ॥ इति।

वचनमिदं स्फुटीकृतं जगद्गुरुश्रीनिम्बार्काचार्यपीठाधिश्वरेण श्रीराधासर्वेश्वरशरणदेवाचार्येण नवनीतसुधाख्यव्याख्याग्रन्थे यथा – अष्टमश्लोकेन श्रीभगवत्प्रपत्तिं गुर्वाज्ञानुवृत्तियोगं साङ्गोपाङ्गतया प्रतिपाद्याथात्र नवमश्लोकेन भक्तियोगमाह श्रीभगवन्निम्बार्काचार्यचरणः – अस्य निरतिशयस्वाभाविकसौन्दर्य-माधुर्य-लावण्य-कारुण्य-मार्द्दव-सौकुमार्य-सौशील्य-वात्सल्य-क्षमा-कृपा-दया-सौहार्द्द-सत्यप्रतिज्ञत्वाद्यनन्तगुणगण-महोदधेः सर्वनियन्तुः सर्वात्मनः सर्वान्तर्यामिणः सर्वेश्वरस्य भगवतः श्रीकृष्णस्य कृपा निर्हैतुकपरमदिव्यानुग्रहो दैन्यादियुजि सर्वथैवाभिमानादिशून्ये निरवलम्बे श्रीभगवच्छरणापन्ने परमानन्यप्रपन्ने कार्पण्यादियुक्तेऽर्थात् – 'उपाया नैव सिद्ध्यन्तीत्यपाया विविधास्तथा । इति या गर्वहानिस्तद्दैन्यं कार्पण्यमुच्यते ॥' इति वचनात्पूर्वोक्तभगवत्प्रपन्ने भगवच्चिन्तनपरायणे जने हि इति निश्चप्रचतया प्रजायते आविर्भवति प्रकटीभवति अर्थात् समुत्पद्यते । अनन्याधिपतेः महात्मनः इत्येतद्विशेषणद्वयं परब्रह्मणो भगवतः श्रीकृष्णस्य सर्वेश्वरत्वं सर्वाधारत्वं शरणागतपालकत्वं निर्हैतुककरुणार्णवत्वादिगुणसमूहं विषदयति । अत्रायमाशयो यन्निखिलविश्वान्तरात्मा भगवान् श्रीकृष्ण एव सर्वाधिपतिर्वरीवर्त्ति ततः परं न कोऽपि विद्यते, अर्थात्तदेव समस्तजगत्पतिरस्ति, यथा हि – 'तमीश्वराणां परमं महेश्वरं तं देवतानां परमञ्च दैवतम् । पतिं पतीनां परमं परस्ताद्विदाम देवं भुवनैकमीड्यमि'त्यादि-वचनात्तस्य सर्वोत्कृष्टत्वं प्रसिद्धमेव । यया भगवत्कृपया परमात्मविषये प्रेमविशेषलक्षणा प्रेम एव विशेषलक्षणं यस्याः, च सा उत्तमा पराभक्तिः प्रभवेत् । अत्रायमाशयो यत्पूर्वं भगवतो दिव्यगुणस्वरूपादीनां ज्ञानं प्रभवति सत्सङ्गादिभिर्गुरूपदेशेन च, ततश्च परब्रह्मणि भगवति श्रीराधाकृष्णे

साधनरूपाऽपरा भक्तिः सञ्जायते । तदनन्तरं भगवत्स्वरूपस्य विशेषज्ञानं जायते, तेन च प्रेमलक्षणा पराभक्तिराविर्भवति, यत्रानुरक्ताः परमानन्यभक्ता मुक्तिमपि नाभिलषन्ति । इत्यादि ।

द्वैताद्वैतदर्शनानुयायिभिः साधकजनैरर्थपञ्चकमवश्यं ज्ञातव्यम् । ते च अर्थाः यथा – श्रीराधाकृष्णयुगलदिव्यस्वरूपं, जीवात्मनः स्वरूपं, भगवत्प्राप्तिरूपकृपाफलं, श्रीराधासर्वेश्वरयुगलपदाम्बुजे भक्तिः, भगवद्भावप्राप्तौ विरोधिनः स्वरूपं च । श्रीनिम्बार्कभगवता वेदान्तकामधेनुदशश्लोकीग्रन्थे (१०) एतस्मिन् प्रसङ्गे उपदिश्यते यथा –

उपास्यरूपं तदुपासकस्य च कृपाफलं भक्तिरसस्ततः परम् ।

विरोधिनो रूपमथैतदाप्तेर्ज्ञेया इमेऽर्था अपि पञ्च साधुभिः ॥ इति ।

स्फुटीकृतमेतत् जगद्गुरुश्रीनिम्बार्काचार्येण श्रीराधासर्वेश्वरशरणदेवाचार्येण श्री'श्रीजी'महाराजेन नवनीतसुधाख्यव्याख्याग्रन्थे यथा – इतः प्राक् पूर्वप्रकरणे सङ्क्षिप्ततया समन्वयाविरोधसाधनक्रमरूपेण वेदान्तसूत्रोक्तपदार्था निरूपिताः । अत्राधुना फलविवक्षया सर्वशास्त्रार्थं संगृह्णन् पूर्वप्रतिपादितार्थं पुनः संस्मारयति स्वल्पधीयां कृते परमाद्याचार्यवर्यः श्रीभगवन्निम्बार्काचार्यचरणः –

उपास्यरूपम् उपास्यस्य परमात्मनो वेदान्तकामधेनुदशश्लोक्यामेव चतुर्थ-पञ्चमश्लोकवर्णितस्य भगवतः श्रीराधाकृष्णस्य रूपम् अर्थात्तस्य निरतिशयसौन्दर्य-माधुर्य-कारुण्य-लावण्याद्यनन्तदिव्यसच्चिदानन्दस्वरूपं तथा च तदुपासकस्य तस्य परमात्मन उपासकस्य क्षेत्रज्ञस्य प्रत्यगात्मनो मुमुक्षोर्जीवस्य रूपं च, कृपाफलम् अनन्तकोटिब्रह्माण्डाधिपतेर्जगज्जन्मादिहेतोर्मुक्तोपसृप्यस्य क्षराक्षरातीतस्याकारणकरुणावरुणालयस्य भगवतः श्रीराधाकृष्णस्य कृपया फलं मुक्तिलक्षणम् अर्थादात्यन्तिकदुःखनिवृत्तिपूर्वकश्रीभगवद्भावापत्तिरूपात्मिकैव मुक्तिर्यथा हि – 'परं ज्योतिरुपसंपद्य स्वेन रूपेणाभिनिष्पद्यते ।' इति श्रुतेः। तथैव परब्रह्मणा भगवता श्रीकृष्णेन गीतायां समुपदिष्टं – 'मामेव ये प्रपद्यन्ते मायामेतां तरन्ति ते, तेषामहं समुद्धर्त्ता मृत्युसंसारसागरात्, तत्प्रसादात्परां शान्तिं स्थानं प्राप्स्यसि शाश्वतम् ।' इत्यादिवचनैर्भगवतः कृपाफलरूपमोक्षस्वरूपं स्पष्टमेव । ततः परं सर्वेश्वरस्य भगवतः कृपाफलावाप्त्यनन्तरं भक्तिरसः भक्तेः पराभक्तेः रसः परमप्रेमानन्दोऽर्थाद् भगवत्कृपाफलरूपात्मिका भक्तिरथवा भक्त्या रस्यतेऽनुभूयते इति भक्तिरसः श्रीभगवत्साक्षात्कारानुभवः । 'भक्तिवशः

पुरुषो भक्तिरेव भूयसी'ति श्रुतेः, भक्त्या त्वनन्यया शक्य:', 'अनन्येनैव योगेन मां ध्यायन्त उपासते', 'ये भजन्ति तु मां भक्त्या मयि ते तेषु चाप्यहम् ।' इति भगवद्वचनाच्च भक्तिरसवैशिष्ट्यं स्पष्टमेव । अथ भक्तिविवेचनानन्तरम् एतदाप्तेः एतस्य पुराणपुरुषोत्तमस्य भगवतः सर्वेश्वरस्य श्रीराधाकृष्णस्य आप्तेः प्राप्तेरर्थात्तद्दिव्यमङ्गलविग्रहदर्शनावाप्तेर्ये श्रीभगवत्प्राप्तिप्रतिबन्धकभूताः कामक्रोधलोभमोहमदमत्सरादयो विविधान्तरायाः सन्ति तेषां सर्वविधं रूपं सम्यकृतया साकल्येन साधुभिः मुमुक्षुभिर्जनैरवश्यं ज्ञेयाः अवधेयाः, तथा चैते पूर्वोक्ता उपास्य-उपासक-भक्तिरस-कृपाफल-विरोधिरूपा इमे पञ्चविधा अर्था अपि श्रीराधाकृष्णसमुपासकैश्च नितान्ततया सर्वदाऽवधारणीयाः सन्ति । अत्रानेनैवार्थपञ्चकज्ञानेन सर्वं ज्ञानं भवतीति निष्कर्षः । विस्तरस्तु वेदान्तरत्नमञ्जूषायां श्रीभगवन्निम्बार्काचार्यपीठविराजितैराचार्यवर्यैः पुरुषोत्तमाचार्यचरणैर्विहितस्तत्रैव जिज्ञासुभिः प्रज्ञावद्भिरवलोकनीयम् । इति ।

दानखण्ड-नाटिकापरिचयः –

'अपारे काव्यसंसारे कविरेकः प्रजापतिः । यथास्मै रोचते विश्वं तथेदं परिवर्त्तते ॥ ' इति आनन्दवचनम् (ध्वन्यालोके - ३/४३) । तत्र दानखण्डम् इत्याख्याया नाटिकायाः प्रणेता आचार्यः श्रीगोपालभट्टः । श्रीधनञ्जयदासकाठियाबाबाप्रणीते 'श्रीश्रीनिवासाचार्य व तत्परवर्त्ति आचार्यगण' इत्याख्ये ग्रन्थे समुद्धृते आचार्यपरम्परास्तोत्रे एतद्विषये सूचना लभ्यते –

गोप्ता श्रुतीनां परतत्त्ववक्ता त्राताऽऽऽश्रितानाञ्च भवार्णवाद्यः ।
गोपालभट्टं तमहं प्रपद्ये विज्ञानवैराग्यदयादिपूर्णम् ॥ इति ।

श्रीगोपालभट्टाचार्यस्य जन्मोत्सवः अर्थात् पट्टाभिषेकोत्सवः पौषकृष्णैकदश्याम् अभूत् । द्वैताद्वैतदर्शनाचार्यपरम्परायामयमष्टाविंशतितम आचार्यः । अयमुत्कलदेशीयश्च । उत्कलीयं साहित्यं धर्मभित्तिकम् । उत्कलीयाः कवयः काव्यादर्श-धर्मादर्शयोः समन्वयकर्त्तारः । अतस्तदनुरोधेन भक्तकविः श्रीगोपालभट्टः श्रीराधाकृष्णप्रेमलीलामुपजीव्य नाटिकामिमां विरचयति स्म ।

क्रान्तदर्शी कविरित्युच्यते । कवयते वर्णयति इति कविः । तस्य कर्म काव्यं, षञ्-प्रत्ययः । तच्च रसोल्लासि भवेत् । 'नियतिकृतनियमरहितां

ह्लादैकमयीमनन्यपरतन्त्रां नवरसरुचिरां निर्मितिमादधती भारती कवेर्जयति' इति प्रशंसायां, 'काव्यं यशसेऽर्थकृते व्यवहारविदे शिवेतरक्षतये । सद्यः परनिर्वृतये कान्तासंमिततयोपदेशयुजे ॥' इति च तस्य प्रयोजने मम्मटः (काव्यप्रकाशे – १/१,२) । काव्यप्रणयने कारणञ्च (तत्रैव १/३) 'शक्तिर्निपुणता लोकशास्त्र-काव्याद्यवेक्षणात् । काव्यज्ञशिक्ष्याभ्यास इति हेतुस्तदुद्भवे ॥' इति। स्वरूपञ्च (तत्रैव सू.१) – 'तददोषौ शब्दार्थौ सगुणावनलङ्कृती पुनः क्वापि ।' इति ।

ध्वनिगुणीभूतव्यङ्ग्यत्वेन काव्यं द्विविधमुक्तम् । दृश्यश्रव्यत्वभेदेन काव्यं पुनर्द्विधा मतम् । सहृदयहृदयाह्लादिशब्दार्थमयत्वमेव काव्यलक्षणम् । तच्च त्रिविधं गद्यपद्यचम्पूभेदात् । चम्पूकाव्ये गद्यपद्ययोर्मिश्रणं दृश्यते । नाटिकाऽपि चम्पूकाव्यवत् भवति । सुदीर्घकाव्यपरम्परां प्रति जनमानसस्य निरसतायां जातायां प्रायोगिकरमणीयताविवृद्धये नाट्यपरम्पराया आविर्भावः । अतः 'काव्येषु नाटकं रम्यमि'त्युक्तिः संगच्छते । अत्र नाटकपदेन नाटिकाया अपि ग्रहणम् । अष्टादशोपरूपकेषु नाटिका परिगणिताऽस्ति – 'नाटिका त्रोटकं गोष्ठी सट्टकं नाट्यरासकम् । प्रस्थानोल्लाप्यकाव्यानि प्रेङ्खणं रासकं तथा ॥ संलापकं श्रीगदितं शिल्पकञ्च विलासिका । दुर्मल्लिका प्रकरणी हल्लीशो भाणिकेति च ॥ अष्टादश प्राहुरुपरूपकाणि मनीषिणः । विना विशेषं सर्वेषां लक्ष्म नाटकवन्मतम् ॥ इति साहित्यदर्पणे (६/४-६)। नाटिकापरिचयश्चापि तत्रैव (६/२६९-२७२) प्राप्यते, तद्यथा – 'नाटिका क्लृप्तवृत्ता स्यात् स्त्रीप्राया चतुरङ्किका । प्रख्यातो धीरललितस्तत्र स्यान्नायको नृपः ॥ स्यादन्तःपुरसंबद्धा सङ्गीतव्यापृताऽथवा । नवानुरागा कन्याऽत्र नायिका नृपवंशजा ॥ संप्रवर्त्तेत नेताऽस्यां देव्यास्त्रासेन शङ्कितः । देवी भवेत्पुनर्ज्येष्ठा प्रगल्भा नृपवंशजा ॥ पदे पदे मानवती तद्वशः सङ्गमो द्वयोः । वृत्तिः स्यात् कैशिकी स्वल्पविमर्शाः सन्धयः पुनः ॥ द्वयोर्नायिकानायकयोः । यथा – रत्नावली-विद्धशालभञ्जिकादिः ।' इति ।

दानखण्ड-नाटिकायां कथावस्तु कल्पितं नास्ति । पात्रमपि न कल्पितमस्ति । एवं वस्तुपात्रे प्रसिद्धे दानखण्ड-नाटिकायाम् । नाटिकानियमे तु वस्तु प्रकल्पितं भवति, पात्रञ्च प्रसिद्धमिति द्रष्टव्यम् ।

दानखण्ड-नाटिका चतुरङ्किका कैशिकीवृत्तिसंवलिता चास्ति । 'शृङ्गारे

कैशिकी' इति दशरूपकवचनात् (२/६२) शृङ्गाररसोऽत्र वर्त्तते । वैष्णवास्तु अमुं रसं माधुर्यरसमिति वदन्ति । पात्रबाहुल्याभावादियं नाटिका 'रत्नावली'त्यादिनाटिकातो भिन्ना इत्यपि विमर्शणीयम् । दानखण्डनाटिकायाः प्रथमेऽङ्के वसनचौर्यकेलिः कलिता । द्वितीये भारवहनकेलिः कीर्त्तिता । तृतीये पारखण्डकेलिर्गदिता । चतुर्थे च दानकेलिर्दर्शिता । संसारस्य असारत्व-प्रतिपादनाय वसनचौर्यकेलिः, संसारभारस्य ब्रह्मणि समर्पणार्थं भारकेलिः, संसारादुद्धाराय पारकेलिः, ब्रह्मसान्निध्यलाभाय च दानकेलिर्वर्त्तते ।

नायिकाऽत्र राधा मुग्धा । नायकश्च श्रीकृष्णो धीरललितः । तदुक्तं प्रतापरुद्रीये नाटकप्रकरणे – 'उदयद्यौवना मुग्धा लज्जाविजितमन्मथा ।', 'निश्चिन्तो धीरललितः कलासक्तः सुखी मृदुः ।' इति । एकान्ततोऽनुकूलः स्यात् अर्थात् एकस्यां नायिकायां विशेषानुरक्तोऽनुकूलो नायकः । अस्या नाटिकायाः पद्यं सरसं सरलं सालङ्कारं परिष्कृतं परिमार्जितं चेति द्योतयितुमाद्यन्तयोरङ्कयोरेकमेकं पद्यमत्र दीयते –

'जयति जननिवासो देवकीजन्मवादो यदुवरपरिषत्स्वैर्दोर्भिरस्यन्नधर्मम् ।
स्थिरचरवृजिनघ्नः सुस्मितश्रीमुखेन व्रजपुरवनितानां वर्द्धयन् कामदेवम् ॥'
'अन्योन्यबाहुपरिशीलितकण्ठदेशं कान्तेन सा स्मरकथास्मितसुन्दरास्यम् ।
लीलाभ्रमन्मधुरगुञ्जितभृङ्गपुष्पं कुञ्जं जगाम तरसा हरिणायताक्षी ॥ इति ।

अस्यां नाटिकायां मालिनी, वसन्ततिलका, इन्द्रवज्रा, उपजातिः, स्वागता, रथोद्धता, मन्दाक्रान्ता, शिखरिणी, आर्या चेत्यादीनि छन्दांसि दृश्यन्ते ।

संसारोऽयं रङ्गमण्डपः । अत्र सुखदुःखानुभवानुसारमभिनयकारिणो जीवात्मान एव । एकस्मिन्नेव शरीरे जीवात्मपरमात्मनोः सहैकत्रावस्थानेऽपि जीवात्मनः कर्मफलोपभोगपरत्वं, परमात्मनस्तु द्रष्टृत्वमात्रं 'तयोरन्यः पिप्पलं स्वाद्वत्त्यनश्नन्नन्यो अभिचाकशीती'ति श्रुतेः (ऋग्वेदे १/१६४/२०, अथर्ववेदे ९/१४/२०, श्वेताश्वतरोप. ४/६, मुण्डकोप. ३/१/१) । जीवात्मनो दुःखफलोपभोगस्तु तस्य असामर्थ्यकारणादेव 'अनीशया शोचति मुह्यमान' इति श्रुतेश्च (श्वेताश्व. ४/७) । शुभगतिप्राप्त्यर्थमाचार्य एव आश्रयणीय 'आचार्यवान् पुरुषो वेद' (छान्दोग्योप. ६/१४/२) इति च तदुपदिष्टत्वात् । शिष्यकृते आचार्यकर्त्तृकम् अनुशासनं नित्यमभिप्रेरकं मनोमुग्धकरमहिंसामूलकञ्च भवितव्यम् । 'मधुमती कशा सूनृता च' इति ऋग्वेदे प्रथममण्डले । तदुपदिष्टञ्च

मनुना (२/१५९) – 'अहिंसयैव भूतानां कार्यं श्रेयोऽनुशासनम्। वाक् चैव मधुरा श्लक्ष्णा प्रयोज्या धर्ममिच्छता ॥' इति । एतदनुसारेण तु दानखण्डनाटिकेयं भक्तकवेः श्रीगोपालभट्टाचार्यस्य सार्थककृतिरस्तीति ।

आधारभूतमातृकाविवरणम् –

तत्त्वजिज्ञासायां शास्त्रमारब्धम् । शास्त्रस्यापरं नाम ग्रन्थ इति । श्रुतिस्मृत्योरनन्तरं साहित्यप्रणयनावसरे शास्त्रस्य लिपिबद्धता जाता । लिपिबन्धनादेषा मातृकेत्यभिधीयते । सा च मातृवत् । मातृका स्वयंग्रन्थकार-हस्तलिपिसंबलिता अन्यजनहस्तलिपिसंबलिता वा भवति । उपादानदृशा मातृका साधारणतस्त्रिविधा – भूर्जपत्रमातृका, तालपत्रमातृका, कर्गजपत्रमातृका च । एतासु आद्ये द्वे प्राचीने, कर्गजपत्रमातृका तु अर्वाचीना ।

भुवनेश्वरे उत्कलराज्यश्रसंग्रहालये संरक्षिताया आधारभूतायाश्च दानखण्डनाटिकामातृकाया विवरणं प्राप्यते – मातृकाग्रन्थनाम – दानखण्डम् । ग्रन्थकारनाम – श्रीगोपालभट्टः । मातृकाक्रमाङ्कः – OSM. Cat. No. - L /618 (A) । मातृकाश्रेणी – तालपत्रमातृका । मातृकाया आकारः - 40" X 2.5" । मातृकायाः पत्रसङ्ख्या - २२ । मातृकायाः प्रतिपत्रं प्रतिपार्श्वं धाटिका-सङ्ख्या – ३ । मातृकालिपिः – उत्कला । मातृकायाः प्रारम्भः – 'जयति जननिवासो ×××× वर्द्धयन् कामदेवम् ॥' इति । मातृकायाः समाप्तिः – 'ततो राधा अन्योन्यबाहु ××× हरिणायताक्षी ॥ तत्र गत्वा सखीभिः सह सुरतमनुभूय राधा मथुरां गतवती । इति दानकेलिः । श्रीः । इति श्रीगोपालभट्ट-विरचिता दानखण्ड-नाटिका समाप्ता । श्रीः ।' इति । मातृकालिपिकारस्य नाम सङ्केतश्च – बाबाजी आनन्दगुरुब्रह्मचारी, C/O जीतेन् दास, वाणीविहारः, भुवनेश्वरम्, ओडिशा । मातृकाया अवस्था – पुरातनी स्पष्टाक्षरा च । मातृकाप्रस्तुतिकालः – न लिपिबद्धः । मातृकायाः संग्रहस्थानम् – पश्चिमवङ्गप्रदेश-मेदिनीपुरमण्डलान्तर्गत-कांथी-क्षेत्रात् 31-3-1978 तारिकायां सङ्गृहीता इयं मातृका । पुष्पिका – श्रीराधाकृष्णार्पणमस्तु । इयं दानखण्ड-नाटिका अप्रकाशिता वर्त्तते ।

भारतवर्षे देवाभिकाङ्क्षिते नानासम्प्रदायास्तत्सम्प्रदायगतान्यनेकानि

दर्शनानि प्रवर्त्तमानानि विलसन्ति । धर्मप्रधाने देशेऽस्मिन् सरणीद्वयं दृश्यते – प्रवृत्तिमार्गो निवृत्तिमार्गश्चेति । निवृत्तिमार्गोपासका मोक्षमीहन्ते । तेषां मते पुनर्जन्माभावो मुक्तिः । प्रवृत्तिमार्गदर्शकास्तु अशुभकर्मत्यागिनः कामक्रोधादिरहिताः सर्वभूतहिते रता आत्मन्यात्मानं निरतिशयसुखरूपमभिलषन्ति । 'इहैव तैर्जितः सर्गो येषां साम्ये स्थितं मनः । निर्दोषं हि समं ब्रह्म तस्माद्ब्रह्मणि ते स्थिताः ॥'(गीता ५/१९) । अत्र साम्ये आनन्दैकरूपे ब्रह्मणीत्यर्थः । निर्दोषं नाम दुःखरहितम् । एवं समबुद्धिमन्तः समे आत्मनि स्थिता अर्थात् आनन्दरूपे ब्रह्मण्यवस्थिताः संसारमुपकुर्वाणा जना वस्तुतो मुक्तिपदभाजो भवन्ति । तनुं विना जगद्भजनमसम्भवम्, 'शरीरमाद्यं खलु धर्मसाधनम्' (कुमारसम्भवे - ५/३३) । धर्मस्तु परोपकाररूपः । परोपकारी तु भगवान् तथा च भक्तः । भगवानपि जगत्कल्याणार्थमवतरति, विभिन्नरूपञ्च धृत्वा जगन्मङ्गलं कुरुते । एवं तद्भक्तोऽपि तत्सान्निध्यं सदा सर्वदा प्राप्य जगत्कल्याणं कुर्वन् दृश्यते । जगत् निर्माय भगवान् भक्तरूपेण तत्र प्रविष्टः । जगद्विहाय भगवतो वैकुण्ठादावुपरि लोके सत्ता नास्ति अन्यथा अवतारवादो निष्फलतां व्रजेत् । 'यदा यदा हि धर्मस्य ग्लानिर्भवती'ति(गीता ४/७)कथनमनौचित्यमावहेत् । अतो भगवन्मतेऽपि पुनर्जन्म आवश्यकमन्यथा संसारस्य कल्याणं न सम्भवेत् । जगत्कल्याणसाधनं हि सर्वेषां दार्शनिकानामिष्टम् । श्रीनिम्बार्कसम्प्रदायदार्शनिका अपि जगत्कल्याणं कर्त्तुं पुनर्भवत्वमिच्छन्ति । यदि सर्वे जन्ममृत्युजरारहिताः स्युरर्थात् संसारधर्मरहिता भवेयुस्तर्हि जगद्धितं कथं भवेत् ? तेषां सन्मार्गदर्शकाः के स्युः ? क्षीणे पुण्ये मर्त्यलोकं विशन्ती'ति (गीता ९/२१) कथनं परिपूरयति पुनर्जन्मसिद्धान्तम् । एतेन गभीरतमविचारेण श्रीनिम्बार्कसम्प्रदायदर्शनं जगति जनप्रवर्त्तनाय चकास्ति ।

भगवतो नामरूपाणि सम्प्रदायरूपेण प्रवर्त्तमानानि सन्ति । मुक्तिं सर्वे दार्शनिकाः कामयन्ते । मुक्तिपदस्य यो हि अर्थः श्रीनिम्बार्कसम्प्रदायदर्शनेऽस्ति स सर्वथा विलक्षणः प्रतिभाति । श्रीराधाकृष्णकृपायाः फलं मुक्तिलक्षणम् । आत्यन्तिकदुःखनिवृत्तिपूर्वकश्रीभगवद्भावापत्तिरूपात्मिकैव मुक्तिः 'सर्वकर्मध्वंसाभावपूर्वकसमस्तनिःशेषाविद्यानिवृत्त्यात्मकपरिपूर्णयावदात्मभाविब्रह्मस्वरूपादिविषयकानुभूतिसन्ततिर्मुक्तिरिति तदेव भगवद्भावापत्तिसायुज्यसाम्यादिशब्दैरभिधीयते ।' इति श्रीपुरुषोत्तमाचार्योक्तेः (वेदान्तरत्न-

मञ्जूषायां-१०) । वस्तुत आत्मानन्दानुभूतिरेव मुक्तिः । सा च अस्मिन् देहे न तु देहान्तरे । सगुणब्रह्मोपासका मुक्तिं न कामयन्ते यतो हि ब्रह्मानन्दरसास्वादसक्तास्ते देहं विना मुक्तिं तुच्छां मन्यन्ते । निर्गुणब्रह्मोपासकास्तु जागतिकरसत्यागपूर्विकां मुक्तिं विदुः । सांसारिकरसासक्तित्यागे सति ब्रह्मानन्दरसासक्तिः सम्भवति । सगुणब्रह्मोपासकास्तु सांसारिकरसात् मुक्तिं प्राप्य सगुणब्रह्मरसानुभूतिरूपां मुक्तिं लभन्ते । इयमेव मुक्तिः श्रेयस्करी । अत्यागपूर्वकमेव ग्रहणम् । यथाऽऽह श्रीहर्षः (८/१५) – 'तत्कालमानन्दमयी भवन्ती भवत्तरानिर्वचनीयमोहा । सा मुक्तसंसारिदशारसाभ्यां द्विस्वादमुल्लासमभूङ्क्तमृष्टम् ॥' इति । अत एव संसारसुखात्यागपूर्वकं ब्रह्मानन्दसुखास्वादग्रहणं मुच्-धातोरर्थः कर्त्तव्यः । इदमेव तत्त्वं प्रतिपादयितुं श्रीगोपालभट्टाचार्येण नाटिकेयं विरचिता या च श्रीनिम्बार्कसम्प्रदायदर्शनानुकूला श्रीराधाकृष्णसगुणब्रह्मस्वरूपदर्शिका परमार्थिका माधुर्यरसभरा च ।

जगद्दर्शका एव दार्शनिकाः । ते तु भगवन्त एव । त एव विविधं दर्शनं प्रचोदयन्तीति ध्रुवोक्त्या (श्रीमद्भागवते - ४/९/६) प्रतीयते – 'योऽन्तःप्रविश्य मम वाचमिमां प्रसुप्तां सञ्जीवयत्यखिलशक्तिधरः स्वधाम्ना । अन्यांश्च हस्तचरणश्रवणत्वगादीन् प्राणान्नमो भगवते पुरुषाय तुभ्यम् ॥' इति । अहमपि ध्रुववदल्पमतिः, त एव मां प्रचोदयन्तः सन्ति । अन्यानि दर्शनानि विहाय श्रीनिम्बाकदर्शनं प्रति मम या प्रवृत्तिः सा तैरेव उन्मीलिता । श्रीनिम्बार्कदर्शनमतं सिद्धान्तं मां शिक्षयन्तः सन्ति । अत्र मम किमपि नास्ति, यदस्ति तत् अन्तरतमस्यैव । 'स्यामेदिन्द्रस्य शर्मणि', 'इन्द्रः वो विश्वतस्परि हवामहे जनेभ्यः । अस्माकमस्तु केवलः ॥' इत्यादि (ऋग्वेदे १/४/६, १/७/१०) । अतः अन्तःप्रविष्टस्य तस्य भगवतः शरणे अहं सदा स्यामिति वचनेन विरमामीति ॐ ।

विद्वज्जनचरणचञ्चरीकः
डॉ० विश्वनाथस्वाईं
विभागाध्यक्षः, धर्मशास्त्रविभागः,
श्रीजगन्नाथवेदकर्मकाण्डमहाविद्यालयः,
पुरी, ओडिशा ।

विजया दशमी
१७-१०-२०१० तारिका
(रविवासरः) ।

****

* श्रीराधासर्वेश्वरो विजयते *

—— * श्रीभगवन्निम्बार्काचार्याय नमः * ——

श्रीगोपालभट्टप्रणीता

दानखण्डनाटिका

'सुधा'व्याख्योपेता

~ ~ ~ ~ ~ ~ ~

प्रथमोऽङ्कः

जयति जननिवासो देवकीजन्मवादो
यदुवरपरिषत्स्वैर्दोर्भिरस्यन्नधर्मम् ।
स्थिरचरवृजिनघ्नः सुस्मितश्रीमुखेन
व्रजपुरवनितानां वर्द्धयन् कामदेवम् ॥ १ ॥

श्रीराधावल्लभं सत्यं ज्ञानं सर्वेश्वरं विभुम् ।
दीनार्त्तान् शरणं प्राप्तान् त्रातुं विग्रहधारिणम् ॥
नीलाद्रीशं जगन्नाथं, निम्बार्कञ्च जगद्गुरुम् ।
प्रणम्य दानखण्डस्य 'सुधा'व्याख्या विधीयते ॥

अथ स्वाभाविकद्वैताद्वैतद्रष्ट्र-भेदाभेदवादि-चक्रराजश्रीसुदर्शनावतार-परमकारुणिकमहामुनीन्द्रश्रीनिम्बार्कभगवत्पादपद्माश्रिताश्रितः प्रेक्षावच्छिरोमणिः आचार्यः श्रीगोपालभट्टो दानखण्डमित्याख्यां बिभ्रतीं दर्शनतत्त्वसम्बलितां भारतीं प्रयोगविज्ञानच्छलेन प्रवक्तुं प्रारिप्सिताभिनवग्रन्थस्य प्रतिबन्धदुरितोपशमनाय

'मङ्गलादीनि मङ्गलमध्यानि मङ्गलान्तानि च शास्त्राणि प्रथन्ते'

इति व्याकरणमहाभाष्य(३/१)कारमहर्षिपतञ्जलिवचनं,

'रङ्गविघ्नोपशान्त्यर्थं नान्दीमादौ प्रयोजयेत् ।'

इतिनाट्यशास्त्रवचनञ्चानुसरन् स्वेष्टदेवं संस्मरति –'जयति जननिवास' इति ।

यद्यपि 'ओङ्कारश्चाथशब्दश्च द्वावेतौ ब्रह्मणः पुरा ।
कण्ठं भित्त्वा विनिर्यातौ तस्मान्माङ्गलिकावुभौ ॥'

इत्याप्तवचनं वरीवर्त्ति, यदि च

'ब्रह्मापरं युज्यतां ब्रह्म पूर्वं ब्रह्मान्ततो मध्यतो ब्रह्म सर्वतः ।'

इति अथर्ववेदः (१४/१/६४) सर्वत्र मङ्गलाचरणे तयोर्ब्रह्मवाचकयोः स्मरणमनुशास्ति तथापि तदेव अथौङ्कारद्वितयं नाम परब्रह्मणः सामान्यप्रकाशमात्रम् । अत्र नाटिकामङ्गलाचरणे तु साक्षात्परब्रह्मसर्वेश्वर-श्रीकृष्णस्मरणात् तावथौङ्कारावनुक्तौ ।

'ब्रह्मणः प्रणवं कुर्यादादावन्ते च सर्वदा ।
स्रवत्यनोङ्कृतं पूर्वं पुरस्ताच्च विशीर्यति ॥'

इति भगवतो मनोः (२/७४) अनुशासनानुसारेण च श्रुतिकल्पैतच्छास्त्रारम्भे ओङ्कारपाठस्य विहितत्वेति प्रोक्तकारणादपि तावेव न स्मृतौ ।

'आशिर्नमस्क्रिया वस्तुनिर्देशो वाऽपि तन्मुखम् ।'

इति काव्यादर्शकारदण्डि (१/१४) प्रोक्ते त्रिविधे मङ्गलाचरणेऽत्र त्वन्तिमप्रकारद्वयस्य सङ्गतिः । जयति सर्वोत्कर्षेण विराजते । सर्वोत्कृष्टश्च सर्वेश्वरः श्रीकृष्ण एवेतिकृत्वाऽत्र नमस्कारो व्यज्यते । जगदभिन्ननिमित्तोपादानकारणं मूर्त्तिमन्माधुर्यं पुरुषोत्तमो राधामाधवः श्रीकृष्णभगवानत्र वस्तु चास्ति । नान्दीरूपत्वेनास्य मङ्गलाचरणस्य विचारे त्वत्र पत्रावलीनान्दीत्यालक्ष्यते,

'यस्यां बीजस्य विन्यासो ह्यभिधेयस्य वस्तुनः ।
शेषेण वा समासोक्त्या नान्दी पत्रावलीति सा ॥'

इति नाट्यदर्पणोक्तेः । नान्दीलक्षणन्तु साहित्यदर्पणे (६/२४) –

'आशीर्वचनसंयुक्ता स्तुतिर्यस्मात् प्रयुज्यते ।
देवद्विजनृपादीनां तस्मान्नान्दीति संज्ञिता ॥' इति ।

नाटिकारूपे वेदान्तदर्शनतत्त्वसमन्विते शास्त्रेऽस्मिन् प्रेक्षकाणां प्रवृत्तिजागरणार्थमनुबन्धचतुष्टयमत्र समीक्ष्यते । तथा हि – ब्रह्मविद्या ग्रन्थेऽस्मिन्नुपदिश्यते । अत एव ब्रह्मज्ञानलाभनिमित्तं यथार्थत इच्छुकः पुरुषोऽत्र अधिकारी । यदुक्तं बृहदारण्यके (४/४/२३) –

'मुमुक्षुर्भूत्वाऽऽत्मन्येवात्मानं पश्यति ।' इति ।

यथा वा – 'मुमुक्षुर्वै शरणमहं प्रपद्ये' इति श्वेताश्वतरे (६/१८) । विषयस्तु लीलावपुः सर्वेश्वरः श्रीकृष्णभगवान् । स हि ग्रन्थेऽस्मिन्नोतश्च प्रोतश्चेति विभाव्यते । विषयविषयिभावः सम्बन्धः । भगवद्भावापत्तिरूपमोक्षो हि प्रयोजनश्चेति । यद्यपि दर्शनतत्त्वमत्र नाटिकायां ज्ञानविषयं तथापि ह्लादैकमयत्वं प्रत्यक्षमेव,

'मधुरं रसवद्वाचि वस्तुन्यपि रसस्थितिः ।
येन माद्यन्ति धीमन्तो मधुनेव मधुव्रताः ॥'

इति दण्डिवचनम् (१/५४) अप्यत्र द्रष्टव्यम् ।

परब्रह्मणो भगवतः श्रीकृष्णस्य चरितानुवर्णनमत्रादौ प्रस्तूयते – जयति जननिवास इति । प्रादुर्भावार्थक-जनी-धातोरचूप्रत्ययेन जनशब्दो निष्पद्यते । जायते उत्पद्यते इति जनः,

'जनुर्जननजन्मानि जनिरुत्पत्तिरुद्भवः ।'

इत्यमर(१/५/३०)वचनात् । 'जनाः प्राकृता एव जननधर्मिणो वा' इति शुक्लयजुर्वेदीयबृहदारण्यकोपनिषद् (४/४/११) व्याख्याने श्रीशङ्कराचार्य-भगवत्पादाः । 'जना जीवा' इति श्रीमद्भागवतभावार्थदीपिकाव्याख्याकारा अस्मदुत्कलीयवैष्णवश्रेष्ठाः श्रीश्रीधरस्वामिनः । जनो भूताद्यर्थकः, 'जनो लोके जगद्भेदे पृथग् जने' इति अनेकार्थसंग्रहकोष(२/२६८)कारहेमचन्द्राचार्यवचनात्। जनाः साधारणतः स्थावरा जङ्गमाश्चेति द्विविधाः । ऊर्ध्वं बीजं भूमिं च भित्त्वा ये जायन्ते, येषाञ्चैकत्र भूमावेवावस्थानं ते स्थाणुभावापन्नाः स्थावरा भवन्ति । स्थानात्स्थानान्तरं गमनशीलास्तु जङ्गमाः कथ्यन्ते । जङ्गमाश्च जरायुजाः, अण्डजाः, स्वेदजाश्चेति त्रिप्रकारका भवन्ति । जरायुजादयो भगवता मनुना (१/४३-४५) समुदाहृता यथा –

'पशवश्च मृगाश्चैव व्यालाश्चोभयतोदतः ।
रक्षांसि च पिशाचाश्च मनुष्याश्च जरायुजाः ॥
अण्डजाः पक्षिणः सर्पा नक्रा मत्स्याश्च कच्छपाः ।
यानि चैवं प्रकाराणि स्थलजान्यौदकानि च ॥
स्वेदजं दंशमशकं यूकामक्षिकमत्कुणम् ।
ऊष्मणश्चापजायन्ते यच्चान्यत्किञ्चिदीदृशम् ॥' इति ।

न केवलं स्थावरजङ्गमाः, उत्तमगतिसम्पन्नाः प्रजापतयो देवाश्चापि जना भवन्ति । न्यायसिद्धान्तमुक्तावल्यां पार्थिवशरीरत्वनिरूपणप्रसङ्गे देवानां जन्यत्वं स्मर्यते । तद्यथा – 'तत्र नृसिंहत्वस्य एकव्यक्तिवृत्तितया जातित्वाभावाज्जलीय-तैजसशरीरवृत्तितया देवत्वस्यापि जातित्वाभावादिति वाच्यम् । कल्पभेदेन नृसिंहशरीरस्य नानात्वेन नृसिंहत्वजात्या लक्षणसमन्वयात् ।' इति । अत एव जन-पदेन स्थावरजङ्गमादीनां सर्वेषां भूतानां व्यवहारः ।

स्थावरजङ्गमानां भूतानां मध्ये कदाचित् सुखलेशावाप्तिकारणात् कीटादयः प्राणिनः श्रेष्ठाः । तेषां मध्ये सार्थनिरर्थदेशोपसर्पणापसर्पणकारिणो बुद्धिजीविनः पश्वादयः श्रेष्ठाः । तेषां मध्ये प्रकृतज्ञानसम्बन्धात् मनुष्याः श्रेष्ठाः । तेषां मध्ये अपवर्गाधिकारयोग्यत्वात् सर्वपूज्यत्वाच्च ब्राह्मणाः श्रेष्ठाः । ब्राह्मणानां मध्ये ज्योतिष्टोमादिकर्माधिकारित्वात् विद्वांसः श्रेष्ठाः । तेषां विदुषां मध्ये शास्त्रोक्तकर्त्तव्यबुद्धिपरायणाः श्रेष्ठाः । तेषु हिताहितप्राप्तिपरिहारभागित्वात् अनुष्ठातारः श्रेष्ठाः । तेषु चानुष्ठानकारिषु मोक्षलाभात् ब्रह्मज्ञानिनः श्रेष्ठा भवन्तीति मन्वादयो वदन्ति । अज्ञानी देहाभिमानी जीवात्मा स्वकर्मानुसारं स्वोपार्जितविज्ञानानुसारं च शरीरधारणार्थं शुक्रबीजसमन्वितः सन् उत्पत्तिस्थानं प्रविशति । अत्यन्ताधमश्चान्यो वृक्षादिः स्थावरभावं प्रतिपद्यते । श्रूयत एतद्यथा कृष्णयजुर्वेदीयकठोपनिषदि (२/२/७) –

'योनिमन्ये प्रपद्यन्ते शरीरत्वाय देहिनः ।
स्थाणुमन्येऽनुसंयन्ति यथाकर्म यथाश्रुतम् ॥' इति ।

तथा चापि श्रूयते ऋग्वेदीये ऐतरेयारण्यके (२/३/२) – 'यथाप्रज्ञं हि सम्भवाः।' इति । एककालमनेकेषु प्रादुर्भूतेष्वपि सम्पृक्तो जीवात्मा प्रोक्तनियमानुसारं

शरीरधारणादिरूपं फलं प्राप्नोति । अत एव स्मर्यते गरुडपुराणे(२/४२/१) –

'यथा धेनुसहस्रेषु वत्सो विन्दति मातरम् ।
तथा पूर्वकृतं कर्म कर्त्तारमनुगच्छति ॥' इति ।

शब्दादीनि पञ्च तन्मात्राणि, सत्त्वादयस्त्रयो गुणाः, श्रोत्रपाय्वादीनि दश ज्ञानेन्द्रिय-कर्मेन्द्रियाणि, प्राणापानादयः पञ्च प्राणाः, मनो बुद्धिश्चैतेषां समष्टिः लिङ्गशरीररूपेण जायते । चेतनासंयुक्तं शरीरमिदं साधारणतो जीव इति उच्यते । तदुपदिश्यते श्रीमद्भागवते (४/२९/७३-७५) प्राचीनबर्हिर्नारदसंवादे –

'अर्थे ह्यविद्यमानेऽपि संसृतिर्न निवर्त्तते ।
ध्यायतो विषयानस्य स्वप्नेऽनर्थागमो यथा ॥
एवं पञ्चविधं लिङ्गं त्रिवृत् षोडशविस्तृतम् ।
एष चेतनया युक्तो जीव इत्यभिधीयते ॥
अनेन पुरुषो देहानुपादत्ते विमुञ्चति ।
हर्षं शोकं भयं दुःखं सुखं चानेन विन्दति ॥' इति ।

चेतनं त्रिप्रकारकम् । तद्यथा – बुद्ध्यवच्छिन्नचेतनं, सर्वत्र परिपूर्णचेतनम्, आभासचेतनञ्च । बुद्धौ प्रतिबिम्बितं चेतनमाभासचेतनं भवति । एषु चेतनेषु साभासबुद्धिचेतनस्य कर्त्तृत्वमस्ति । अर्थात् चिदाभासेन सह बुद्धिः सर्वं कार्यं साधयति । किन्तु अज्ञजना भ्रान्तिवशतो निरवच्छिन्ने निर्विकारे साक्षिण्यात्मरूपे ब्रह्मणि कर्त्तृत्वं जीवत्वं चारोपयन्ति । यः खलु अस्माभिर्जीव इति कथ्यते तस्मिन् आभासचेतनन्तु मिथ्या भवति यतो हि बुद्धिरविद्यायाः कार्यमस्ति । ब्रह्म यथार्थतो विच्छेदरहितचेतनं भवति । तस्य विच्छेदचेतनत्वमपि विकल्पेन मन्यते । अनेन उपाधीनां बाधे कृतेऽपि साभासाहंरूपाविच्छिन्नचेतनजीवस्य तत्त्वमस्यादिमहावाक्यबलात् पूर्णचेतनब्रह्मणा सह एकत्वं परिलक्ष्यते । उक्तमेतद्यथा अध्यात्मरामायणे बालकाण्डे (१/४६-४९)– पार्वतीमहेश्वरसंवादे –

'बुद्ध्यवच्छिन्नचेतनमेकं पूर्णमथापरम् ।
आभासन्त्वपरं बिम्बभूतमेवं त्रिधा चितिः ॥

साभासबुद्धेः कर्तृत्वमवच्छिन्नेऽविकारिणि ।
साक्षिण्यारोप्यते भ्रान्त्या जीवत्वञ्च तथाबुधैः ॥
आभासस्तु मृषा बुद्धिरविद्या कार्यमुच्यते ।
अविच्छिन्नन्तु तद्ब्रह्म विच्छेदस्तु विकल्पतः ॥
अविच्छिन्नस्य पूर्णेन एकत्वं प्रतिपद्यते ।
तत्त्वमस्यादिवाक्यैश्च साभासस्याहमस्तथा ॥' इति ।

साधारणतो जङ्गमाश्चैतन्यविशिष्टाः कथ्यन्ते । सर्वे स्थावराश्चापि तमोगुणेन विचित्रदुःखफलेनाधर्मकर्महेतुकेन व्याप्ता अनभिभूतचैतन्यविशिष्टा अभिभूतचैतन्यविशिष्टाश्चेति भेदेनान्तश्चैतन्या भवन्ति । स्मर्यत एतद्यथा भगवता मनुना (१/४९) –

'तमसा बहुरूपेण वेष्टिताः कर्महेतुना ।
अन्तःसंज्ञा भवन्त्येते सुखदुःखसमन्विताः ॥'इति ।

स्थावरजङ्गमादिजनशरीरमनित्यं विनाशशीलञ्च । जीवात्मपुरुषस्य एतत् आयतनम् । पुरुषपदवाच्येषु त्रिषु उत्तमपुरुषस्तु अविनाशी नियन्ता भूर्भुवःस्वराख्यातेषु त्रिषु लोकेषु चैतन्यबलशक्त्या प्रविश्य स्वरूपसद्भावमात्रेण सर्वेषां बिभरणकर्त्ता ईश्वरः परमात्मा चेति विज्ञायते। तदुपदिश्यते भगवद्गीतायां (१५/१६, १७) श्रीकृष्णेन यथा –

'द्वाविमौ पुरुषौ लोके क्षरश्चाक्षर एव च ।
क्षरः सर्वाणि भूतानि कूटस्थोऽक्षर उच्यते ॥
उत्तमः पुरुषस्त्वन्यः परमात्मेत्युदाहृतः ।
यो लोकत्रयमाविश्य बिभर्त्यव्यय ईश्वरः ॥' इति ।

चेतनाचेतनवस्तुजातस्य भगवदायत्तत्वम् । स एव भगवान् ब्रह्म परमात्मा चेति शब्दितमिति स्मर्यते महर्षिणा वेदव्यासेन श्रीमद्भागवते (१/२/११) यथा –

'वदन्ति तत्तत्त्वविदस्तत्त्वं यज्ज्ञानमद्वयम् ।
ब्रह्मेति परमात्मेति भगवानिति शब्द्यते ॥' इति ।

अक्षरोऽयं ब्रह्मशब्दाभिधेयः परमपुरुषो जननिवासः सर्वेषु स्थावरजङ्गमादिजनेषु निवसति । श्रूयते ऋग्वेदे (१/१/१) – 'ॐ अग्निमीळे पुरोहितम् ...' इति ।

तथा च सामवेदे (१/१/१/१, २) –

'ॐ अग्न आयाहि वीतये गृणानो हव्यदातये ।
नि होता सत्सि बर्हिषि ॥
त्वमग्ने यज्ञानां होता विश्वेषां हितः ।
देवेभिर्मानुषे जने ॥' इति ।

अयमेव परमदेव आत्मा सर्वत्र परिपूर्णोऽस्ति । इमं विना जगतः सत्ता नास्ति,

'ईशावास्यमिदं सर्वं यत्किञ्च जगत्यां जगत् ।'

इति शुक्लयजुर्वेदीयेशोपनिषच्छ्रुतेः (१) । ब्रह्माण्डरूपगर्भे अन्तर्यामिरूपेणास्य विद्यमानता वर्त्तते । सोऽयमधुना जगद्रूपेण प्रकटितो वर्त्तते, प्रलयानन्तरं सृष्टिकाले चापि प्रकटितो भविष्यति । स चायं सर्वेषु जनेषु अन्तर्यामिरूपेण विराजते । परमपुरुषश्चायं सर्वान् सर्वाभ्यश्च दिग्भ्यः पश्यति । तथा एव श्रूयते शुक्लयजुर्वेदे (२२/४), कृष्णयजुर्वेदीयश्वेताश्वतरोपनिषदि (२/१६) च –

'एष ह देवः प्रदिशोऽनु सर्वाः पूर्वो ह जातः स उ गर्भे अन्तः ।
स एव जातः स जनिष्यमाणः प्रत्यङ्जनांस्तिष्ठति सर्वतोमुखः ॥'इति।

महाभारते अनुशासनपर्वणि (१४९/११, १२) सर्वकारणकारणं परमात्मा विष्णुरिति श्रीभीष्मेणोक्तम् –

'यतः सर्वाणि भूतानि भवन्त्यादियुगागमे ।
यस्मिंश्च प्रलयं यान्ति पुनरेव युगक्षये ॥
तस्य लोकप्रधानस्य जगन्नाथस्य भूपते ! ।
विष्णोः ×× ×× ×× ×× ×× ॥' इति ।

स एव सर्वनियमनशीलः परमात्मा सर्वत्र सर्वेषां प्राणीनां सकलप्रवृत्तिनिवृत्ति-मूलज्ञानोदये देशे तथा च स्वेनैव निर्मितं देहेन्द्रियावस्थप्रकृत्याख्यं यन्त्रमारूढानि सर्वभूतानि स्वकीयया सत्त्वादिगुणमय्या मायया गुणानुगुणं प्रवर्त्तयन् विराजत इति गीतायां (१८/६१) स्वयं श्रीमुखेन उक्तम् –

'ईश्वरः सर्वभूतानां हृद्देशेऽर्जुन ! तिष्ठति ।
भ्रामयन् सर्वभूतानि यन्त्रारूढानि मायया ॥' इति ।

उक्तञ्च श्रीमद्भागवते (११/२/४१) कविमुनिना यथा –

'खं वायुमग्निं सलिलं महीञ्च ज्योतींषि सत्त्वानि दिशो द्रुमादीन् ।
सरित्समुद्रांश्च हरेः शरीरं यत्किञ्च भूतं प्रणमेदनन्यः ॥' इति ।

सः परमात्मा अव्यक्तोऽपि व्यक्तो भवति । तदुक्तं महाभारते स्त्रीपर्वणि (२/१३) यथा –

'अदर्शनादापतितः पुनश्चादर्शनं गतः ।
नासौ तव न तस्य त्वं वृथा का परिदेवना ॥' इति ।

तथा चोक्तं गीतायां (२/२८, ४/६) स्वयं श्रीकृष्णेन अर्जुनाय –

'अव्यक्तादीनि भूतानि व्यक्तमध्यानि भारत ! ।
अव्यक्तनिधनान्येव तत्र का परिदेवना ॥
अजोऽपि सन्नव्ययात्मा भूतानामीश्वरोऽपि सन् ।
प्रकृतिं स्वामधिष्ठाय सम्भवाम्यात्ममायया ॥' इति ।

उक्तञ्च श्रीमद्भागवते (१०/४७/३०) तेनैव उद्धवमाध्यमेन गोपीकाभ्यः –

'आत्मन्येवात्मनाऽऽत्मानं सृजे हन्म्यनुपालये ।
आत्ममायानुभावेन भूतेन्द्रियगुणात्मना ॥' इति ।

तस्मिन् परमात्मनि सर्वेषां जनानामाश्रयो वासो वा वर्त्तते । तनुक्तं श्रीकृष्णेन गीतायां (७/७) यथा –

'मत्तः परतरं नान्यत् किञ्चिदस्ति धनञ्जय ! ।
मयि सर्वमिदं प्रोतं सूत्रे मणिगणा इव ॥' इति ।

मृद्भक्षणदोषं नाङ्गीकुर्वन् भर्त्सितोऽव्याहतैश्वर्यो भगवान् श्रीकृष्णः मातरं यशोदां स्वमुखं दर्शयति । तदा यशोदा तत्र मुखगह्वरे विश्वरूपदर्शनं करोति । तदुक्तं श्रीमद्भागवते (१०/८/३७, ३८) –

'सा तत्र ददृशे विश्वं जगत् स्थास्नु च खं दिशः ।
साद्रिद्विपाब्धिभूगोलं सवाय्वग्नीन्दुतारकम् ॥
ज्योतिश्चक्रं जलं तेजो नभस्वान् वियदेव च ।
वैकारिकाणीन्द्रियाणि मनो मात्रा गुणास्त्रयः ॥' इति ।

ब्रह्मण उपादानकारणत्वं प्रस्तूयते सामवेदतलवकारशाखीयच्छान्दोग्योपनिषदि (६/१/४) यथा – 'यथा सौम्यैकेन मृत्पिण्डेन सर्वं मृण्मयं विज्ञातं स्याद्

वाचारम्भणं विकारो नामधेयं मृत्तिकेत्येव सत्यम् ।' इति ।
निमित्तकारणत्वञ्चोक्तं यथा श्रीमद्भागवते (११/३/३५) –

'स्थित्युद्भवप्रलयहेतुरहेतुरस्य यत्स्वप्नजागरसुषुप्तिषु सद्बहिश्च ।
देहेन्द्रियासुहृदयानि चरन्ति येन सञ्जीवितानि तदवेहि परं नरेन्द्र ॥'इति।

अपि चोक्तं तत्रैव (११/९/२१) –

'यथोर्णनाभिर्हृदयादूर्णां संतत्य वक्त्रतः ।
तया विहृत्य भूयस्तां ग्रसत्येवं महेश्वरः ॥' इति ।

परब्रह्मणः स्वरूपं वदन्ति च प्रेक्षावच्छिरोमणयो महामहोपाध्यायास्त्रिपाठिनः डॉ०सुधाकराचार्याः –

'ब्रह्म ब्रह्मभ्रमार्द्रं भ्रमति मतिचितं भ्राम्यदभ्रं यथाऽप्सु
भ्रामं भ्रामं तृणेभ्योऽपि च चलदलकं यद्धुनुते तोयवीच्याम् ।
क्षुब्धे क्षुब्धं स्थिरे च स्थिरसलिलचरं स्पष्टबिम्बं यथेदं
नित्यं ब्रह्मापि तद्वत् स्थिरचरमतिगं व्यक्तमत्यक्तमाशु ॥
काये ह्यायामदीर्घे नभसि नु भसिते छद्मभस्मप्रभिन्ने
योऽहङ्कारेण सद्मन्यनवरतभिया स्वात्मकारागृहाभे ।
मन्वानो बन्धुबन्धं सृजति पुनरिमं बान्धवं मृग्यतीत्थं
तन्वानो जालमालामलमिह विवशो ब्रह्म सोऽन्वेषते च ॥
संसारो नेध्मजिह्वान्न ललितसलिलाद्वायुतो भूमितो ना-
ध्माताकाशान्न सूर्यादनल इव दिवा दीप्यमानान्न वा च ।
नाकर्षान्नाथ घर्षान्न जलदतडितः केतुतो न ग्रहेभ्यो
नूनं स ब्रह्मतर्षात् सततततराच्छाश्वतो बृंहतीह ॥' इति ।

अत एव परब्रह्मतत्त्वनिरूपणे –

'न चान्तर्न बहिर्यस्य न पूर्वं नापि चापरम् ।
पूर्वापरं बहिश्चान्तर्जगतो यो जगच्च यः ॥'

इति श्रीमद्भागवतवचनं (१०/९/१३) वैशिष्ट्यपूर्णम् । कारणमयं परमात्माऽतो **यथार्थतो वासुदेव इति प्रसिद्धः ।** तदुक्तं विष्णुपुराणे (१/२/१२) यथा –

'सर्वत्रासौ समस्तश्च वसत्यत्रेति वै यतः ।
ततः स वासुदेवेऽपि विद्वद्भिः परिपठ्यते ।।' इति ।

अतः परब्रह्माभिधेयः पुरुषोत्तमः सर्वेश्वरः श्रीकृष्णो हि जनानां विशेषतो भक्तजनानां निवासोऽन्तिमनिवासस्थानं भवति । तदुक्तं भगवद्गीतायां (१५/६) श्रीमुखेन यथा –

'न तद्भासयते सूर्यो न शशाङ्को न पावकः ।
यद्गत्वा न निवर्त्तन्ते तद्धाम परमं मम ।।' इति ।

श्रीमद्भागवते (९/४/६८) चाप्युक्तं तेनैव दुर्वाससे यथा –

'साधवो हृदयं मह्यं साधूनां हृदयं त्वहम् ।
मदन्यत्ते न जानन्ति नाहं तेभ्यो मनागपि ।।' इति ।

जननिवासः पुरुषोत्तमः सर्वेश्वरो निराकारो निर्गुणः अजो नित्यः शाश्वतः सूक्ष्मातिसूक्ष्मः पुराणो विभुश्चेत्यादिस्वरूपविशिष्ट इति श्रुतिस्मृत्यादयः प्रवदन्ति । तद्यथा कृष्णयजुर्वेदीयकठोपनिषदि (१/२/२०) –

'अणारणीयान् महतो महीयानात्माऽस्य जन्तोर्निहितो गुहायाम् ।'

इति । कृष्णयजुर्वेदीयश्वेताश्वतरे (३/२०) किञ्चिद्विकृतपाठः । तथा च तत्रैव (३/११) श्रूयते –

'सर्वाननशिरोग्रीवः सर्वभूतगुहाशयः ।
सर्वव्यापी स भगवांस्तस्मात् सर्वगतः शिवः ।।' इति

उक्तञ्च अथर्ववेदीयमुण्डकोपनिषदि (२/१/२) –

'दिव्यो ह्यमूर्त्तः पुरुषः सबाह्याभ्यन्तरो ह्यजः ।
अप्राणो ह्यमनाः शुभ्रो ह्यक्षरात् परतः परः ।।' इति ।

उक्तञ्च बृहदारण्यके (३/८/८, ४/४/२२, २५) –

'एतद्वै तदक्षरं ××××× अस्थूलमनण्वह्रस्वमदीर्घमलोहितमस्नेहमच्छायमतमोऽवाय्वनाकाशमसङ्गमरसमगन्धमचक्षुष्कमश्रोत्रमवागमनोऽतेजस्कमप्राणममुखममात्रमनन्तरमबाह्यं न तदश्नाति किञ्चन न तदश्नाति कश्चन ।।, स वा एष महानज आत्मा योऽयं विज्ञानमयः प्राणेषु य एषोऽन्तर्हृदय आकाशस्तस्मिञ्छेते सर्वस्य वशी सर्वस्येशानः सर्वस्याधिपतिः स न साधुना

कर्मणा भूयान्नो एवासाधुना कनीयानेष सर्वेश्वर एष भूताधिपतिरेष भूतपाल एष सेतुर्विधरण एषां लोकानामसंभेदाय ... ॥, स वा एष महानज आत्माऽजरोऽमरोऽमृतोऽभयो ब्रह्म ॥' इति । यथा वा श्वेताश्वतरे (३/१९) –

'अपाणिपादो जवनो ग्रहीता पश्यत्यचक्षुः स शृणोत्यकर्णः ।
स वेत्ति वेद्यं न च तस्यास्ति वेत्ता तमाहुरग्र्यं पुरुषं महान्तम् ॥' इति ।

निर्गुणोऽपि स परमात्मा भूतानुकम्पया सगुणो भवति । भगवान् श्रीकृष्णो हि तदेवोभयरूपम् । अस्य सगुणनिर्गुणब्रह्मणः स्वरूपमुपदिशन्नाह आद्याचार्यवर्यः श्रीनिम्बार्कमहामुनीन्द्रो वेदान्तकामधेनुदशश्लोक्याम् (४) –

'स्वभावतोऽपास्तसमस्तदोषमशेषकल्याणगुणैकराशिम् ।
व्यूहाङ्गिनं ब्रह्म परं वरेण्यं ध्यायेम कृष्णं कमलेक्षणं हरिम् ॥' इति ।

प्रेक्षावच्छिरोमणिस्वामिश्रीधनञ्जयदासकाठियाबाबाप्रणीते तत्त्वदीपिकाख्ये वङ्गभाषानिबद्धे वेदान्तकामधेनुदशश्लोकीटीकाग्रन्थे परब्रह्मणः स्वरूपं यत् आलोचितं तस्य भावानुवादोऽत्र उपस्थाप्यते –

श्रीसर्वेश्वरो भगवान् ज्ञानानन्दमयस्वरूपेण सर्वदा विराजते । तस्मिन् पुरुषोत्तमे अविद्यादिदोषो नास्ति । यथा स्वप्रकाशस्वरूपे सूर्ये अन्धकारादिर्न भवति तथा स्वयं प्रकाशमाने श्रीकृष्णे अज्ञानादिरूपोऽन्धकारो न वर्त्तते । अत एव स स्वभावतः सर्वप्रकारदोषरहितो विद्यते । अतः श्रीमद्भागवते आदौ भणितं – 'धाम्ना स्वेन सदा निरस्तकुहकम् ...' इति । पातञ्जलयोगदर्शने ईश्वरस्वरूपं निरूप्यते – 'क्लेशकर्मविपाकाशयैरपरामृष्टः पुरुषविशेष ईश्वरः।' अर्थात् अविद्या-अस्मिता-राग-द्वेष-अभिनिवेशरूपः पञ्चविधः क्लेशः, धर्म-अधर्मरूपं द्विविधं कर्म, कर्मफलजन्य आयु-सुखदुःखभोगः, तदनुरूपवासना च यस्मिन्न विद्यन्ते स हि ईश्वरः । श्रुतिरपि 'आत्मा अपहतपाप्मा विजरो विमृत्युर्विशोकः' (छान्दो.८/७/३, ८/१/५) निष्कलं निष्क्रियं शान्तं निरवद्यं निरञ्जनम्' (श्वेता. ६/१९) इत्यादिवाक्यैरेतदेव उपदिशति ।

अत्रेदं शङ्क्यते – 'अयमात्मा ब्रह्म' 'तत्त्वमसि' इत्यादिवाक्यैः श्रुतिः जीवो ब्रह्मेति निगदति । यथा जीवस्य अविद्यादिक्लेशः, सुखदुःखादिभोगश्च तथा ब्रह्मणो भवेत्, सुतरां ब्रह्म समस्तदोषरहितं न स्यात् ।

अस्य समाधानं तु 'हरेरधीनम्' इति वाक्यस्य व्याख्यायां सन्निवेशितमस्तीति तत्र द्रष्टव्यम् ।

भगवान् कल्याणगुणगणनिलयो विद्यते । ज्ञान-श्री-शक्ति-बल-यश-ऐश्वर्य-वैराग्य-तेज-वीर्य-सौशील्य-वात्सल्य-आर्जव-सौहार्द्य-करुणा-सौम्यत्व-धैर्य-स्थैर्य-दया-उदारता-वदान्यता-माधुर्य-मृदुताप्रभृत्यनन्त-कल्याणमयमहागुणाः तथा च जगज्जन्मादिकारणत्व-सर्वेश्वरत्व-मोक्षप्रदत्व-विश्वाधारत्व-सर्वशक्तिमत्त्व-सर्वज्ञत्वप्रभृत्यनन्तकल्याणमयधर्माः भगवति परमेश्वरे श्रीकृष्णे सततं परिपूर्णभावेन विद्यन्ते,

'पराऽस्य शक्तिर्विविधैव श्रूयते स्वाभाविकी ज्ञानबलक्रिया च ।'

इति श्वेताश्वतरश्रुतेः (६/८) । उक्तञ्च विष्णुपुराणे (३/५/७९, ६/५/१३) –

'ज्ञानशक्तिबलैश्वर्यतेजोवीर्याण्यशेषतः ।
भगवच्छब्दवाच्यानि विना हेयैर्गुणादिभिः ॥
ऐश्वर्यस्य समग्रस्य वीर्यस्य यशसः श्रियः ।
ज्ञानवैराग्ययोश्चैव षण्णां भग इतीङ्गना ॥' इति ।

उक्तञ्च ब्रह्मसूत्रे (१/२/२) –

'विवक्षितगुणोपपत्तेश्च ॥'' इति ।

अत्र श्रीनिम्बार्कभाष्यं यथा –

'मनोमयः प्राणशरीरो भारूपः सत्यसङ्कल्पः' इत्यादीनां (छान्दो.३/१४/२) विवक्षितानां मनोमयत्वसत्यसङ्कल्पत्वादीनां गुणानां ब्रह्मण्येवोपत्तेश्च ॥' इति ।

श्रीश्रीनिवासाचार्यभाष्यं च यथा – 'मनोमयः प्राणशरीरो भारूपः सत्यसङ्कल्प आकाशात्मा सर्वकामः सर्वगन्धः सर्वरसः सर्वमिद-मभ्यान्तोऽवाक्यनादरः ।' इत्यादिना ब्रह्मासाधारणधर्मत्वेन वक्तुमिष्टा विवक्षितास्तेषां सत्यसङ्कल्प इत्यादीनां गुणानां ब्रह्मण्येवोपत्तेश्च पूर्ववाक्ये ब्रह्मपरिग्रह एव । सर्वमिदं रसपर्यन्तश्चेतनाचेतनात्मकमङ्गीकृतवानित्यभ्यात्तो गाम्भीर्यातिशयात्तुष्णीमासीनः अवाकी अनादर आदरनिरपेक्षः ।' इति ।

कमलारमणः श्रीकृष्णो हि एतत्सकलकल्याणगुणाधार इति हेतोस्तत्र वैरभावो भवतु मित्रभावो भयभावः स्नेहभावः कामादिभावो वा तस्मिन् श्रीकृष्णे स्वचित्तसमाधानात् जीवः परमकल्याणमेव प्राप्नोति । श्रीमद्भागवत (७/१/२९, ३०) एतस्य दृष्टान्तो यथा –

'कामाद्द्वेषाद्भयात् स्नेहाद्यथा भक्त्येश्वरे मनः ।
आवेश्य तदघं हित्वा बहवस्तद्गतिं गताः ॥
गोप्यः कामाद्भयात् कंसो द्वेषाच्चैद्यादयो नृपाः ।
सम्बन्धाद्वृष्णयः स्नेहाद्यूयं भक्त्या वयं विभो ॥' इति ।

श्रीकृष्णो हि परब्रह्म इत्युक्तम् । अतः किं तावत् ब्रह्मस्वरूपमिति ज्ञातव्यमेव । श्रीनिम्बार्काचार्यो ब्रह्मणः स्वरूपविषये श्रुतिस्मृतिब्रह्मसूत्रानुसारेण सिद्धान्तं प्रदर्शयति –

१) ब्रह्म सच्चिदानन्दस्वरूपम् । अनेन स्वरूपेण तत् स्थूलसूक्ष्म-ह्रस्वदीर्घकर्तृत्वादिसर्वप्रकारधर्मवर्जितम् । अतस्तत् एकम् अद्वितीयं निर्गुणम् अक्षरं तुरीयस्वरूपम् ।

२) तदेव सच्चिदानन्दस्वरूपं निर्गुणम् अक्षरं तुरीयस्वरूपं ब्रह्म हि अचिन्त्यविचित्रसंस्थानसम्पन्नस्य अनन्तनामरूपविशिष्टस्य अस्य जगतः सृष्टिस्थितिलयकर्तृ, निमित्तोपादानोभयकारणम् । सुतरां स परमात्मा सर्वज्ञः सर्वशक्तिः सर्वनियन्ता सर्वव्यापी सर्वरूपी । अनेन एतस्य ईश्वरसंज्ञा भवति ।

३) ब्रह्म हि स्वयं स्वीयस्वरूपगतं चेतनमनन्तरूपेण प्रसार्य स्वीयस्वरूपात् प्रकाशितेषु अभिन्नेषु च अस्य अनन्तस्य जगतः बृहद्-बृहत्तर-बृहत्तम-क्षुद्र-क्षुद्रतर-क्षुद्रतमेषु अंशेषु पृथक्पृथग्रूपेण प्रविष्टं वर्त्तते । एतेषु पृथक्पृथग्रूपेषु तस्य चिदंशो हि जीव इति आख्यातं भवति ।

४) ब्रह्म यैः अनन्तनामरूपैः प्रकाशितं, यत्र प्रत्यंशं च तत् भोक्तृ-जीवरूपेण प्रविष्टं वर्त्तते, तस्य नाम हि जगत् । एतच्चतुर्विधरूपेण ब्रह्म पूर्णं विराजते । ब्रह्मणः एतच्चतुर्विधरूपविषये श्रुतिब्रह्मसूत्रादिप्रमाणमत्र प्रस्तूयते – अक्षरनिर्गुणब्रह्मस्वरूपे प्रमाणं यथा तैत्तिरीयश्रुतौ (२/१, ३/६, २/७) –

'सत्यं ज्ञानमनन्तं ब्रह्म ॥, आनन्दो ब्रह्मेति व्यजानात् ॥, रसो वै सः, रसं ह्येवायं लब्ध्वा आनन्दी भवति ॥' इति ।
उक्तञ्च बृहदारण्यकश्रुतौ (३/९/२८) – 'विज्ञानमानन्दं ब्रह्म ।' इति ।
उक्तञ्च छान्दोग्यश्रुतौ (७/२३/१) – 'भूमैव सुखम् ।' इति ।
सुखम् आनन्दः । वेदव्यासश्चापि ब्रह्म आनन्दमयमिति ब्रह्मसूत्रे (१/१/१३) सूत्रयति – 'आनन्दमयोऽभ्यासात् ॥' इति । अतः परं चतुर्दशसूत्रादारभ्य विंशतितमसूत्रं यावत् ब्रह्म श्रुत्युक्तमानन्दमयशब्दवाच्य-मित्यपि वेदव्यासः प्रतिपादयति ।

ब्रह्म चिन्मयमर्थात् ज्ञानस्वरूपं, न तु जडम्,एतत् पूर्वोक्त 'सत्यं ज्ञानमनन्तम्' इत्याश्रुतिषु उपदिष्टम् । अस्य चिच्छक्तेः नामान्तरम् ईक्षणशक्तिः । एतदेव भगवान् वेदव्यासो ब्रह्मसूत्रे (१/१/५) सूत्रयति – 'इक्षतेर्नाशब्दम् ॥' इति । अत्र श्रीनिम्बार्कभाष्यं यथा –

'सांख्याभिमतमचेतनं प्रधानं तु अशब्दं श्रुतिप्रमाणवर्जितम्, अतो नैव जगत्कारणम् ; जगत्कर्त्तुश्चेतनधर्मस्येक्षणस्य श्रवणात् ॥' इति ।
श्रीश्रीनिवासाचार्यकृतं वेदान्तकौस्तुभभाष्यं च यथा – '**एवं तावद्बृहद्गुण-शक्तिस्वरूपं सर्वज्ञं सर्ववेदैकवेद्यं ब्रह्मैव जगज्जन्मादिकारणमित्युक्तम् । इदानीं न ब्रह्म जगत्कारणमननुरूपत्वात्, त्रिगुणमचेतनम्प्रधानं कार्यानुरूपत्वाज्जगत्-कारणमस्ति हीति वदन्तः साङ्ख्याः 'सदेव सौम्येदमग्र आसीदि'त्यादीनि वेदान्तवाक्यान्यपि तत्रैव योजयन्ति, तन्मतं निराकरोति भगवान् सूत्रकारः ।**

आनुमानिकम्प्रधानं जगज्जन्मादिकारणं भवितुं नार्हति, कस्मात् ? अशब्दं हि तत्, नास्ति शब्दः श्रुतिः प्रमाणं यत्र तदशब्दम् । हेतुगर्भं विशेषणमिदम् । ननु 'सदेव सौम्येदमग्र आसीदि'ति छान्दोग्ये सच्छब्देन प्रधानमभिप्रेतं भवति, कथमुच्यतेऽशब्दमित्यत्राह ईक्षतेरिति । 'सदेव सौम्येदमग्र आसीदेकमेवाद्वितीयमि'त्युपक्रम्य, 'तदैक्षत बहु स्यां प्रजायेये'ति जगत्कर्तृरीक्षणश्रवणात् । ऐतरेयेऽपि तथा श्रूयते – 'आत्मा वा इदमेक एवाग्र आसीन्नान्यत्किञ्चन मिषत्स ईक्षत लोकान्नु सृजा इति, स इमांल्लोकानसृजत' इति । अत्र धातुवाचक ईक्षतिशब्दः धात्वर्थभूतेक्षणपरो लक्षणया बोध्यः ।

ईक्षणं पर्यालोचनमध्यवसायः । तच्चाचेतनस्य प्रधानस्य नोपपद्यते, चेतनधर्मत्वात् । अत ईक्षणहीनं प्रधानं श्रुत्या नोच्यतेऽतो युक्तमुक्तं भगवताऽशब्दमिति, तस्मान्न तज्जगत्कारणं वेदवेद्यं चेत्यर्थः । न च सत्त्वगुणमाश्रित्य प्रधानस्य ज्ञानशक्तिमत्त्वमत ईक्षणमुपपद्यत इति वाच्यम् । जडस्य जडगुणस्य च ज्ञानत्वासम्भवात्, ज्ञानवत्त्वासम्भवाच्च । न च पुरुषसंसर्गात्तथोपपत्तिरिति वाच्यम् । लाघवतया नित्यसिद्धज्ञाने पूर्वोक्ते ब्रह्मणि वेदान्तवेद्ये जगज्जन्मादिकारणे सति परसङ्गमापतितज्ञानाश्रयणस्य गौरवात्, तुच्छत्वाच्च । किञ्च साम्यावस्थायां तस्य गुणवत्त्वाभावाच्चेत्यलं विस्तरेण । अतो जगज्जन्मादिकार्यानुरूपं कारणं सच्छब्दवाच्यमीक्षणक्षमं ब्रह्मैव स्वाभाविकाचिन्त्यानन्तशक्तिमत्त्वात्, 'परास्य शक्तिर्विविधैव श्रूयते स्वाभाविकी ज्ञानबलक्रिया चे'त्यादिश्रुतेः ॥' इति ।

एतद्यावत् ब्रह्मणः अक्षरनिर्गुणस्वरूपविषये प्रमाणं प्रदर्शितम् ।

ईश्वरस्वरूपं श्रुतिषु समुपदिष्टम् । तद्यथा तैत्तिरीयश्रुतौ (३/१/) – 'यतो वा इमानि भूतानि जायन्ते, येन जातानि जीवन्ति, यत्प्रत्यन्त्यभिसंविशन्ति, ×× ×× तद् ब्रह्म ।' इति । अनया श्रुत्या ईश्वरः अचिन्त्यविचित्रसंस्थान-सम्पन्नस्य जगतः सृष्टिस्थितिलयकर्त्ता भवतीति हेतोः स एव सर्वज्ञः सर्वशक्तिः सर्वनियन्ता इत्याद्यभिधीयते । उक्तञ्च श्वेताश्वतरश्रुतौ (६/१६) –

'स विश्वकृद्विश्वविदात्मयोनिर्ज्ञः कालकालो गुणी सर्वविद् यः ।
प्रधानक्षेत्रज्ञपतिर्गुणेशः संसारमोक्षस्थितिबन्धहेतुः ॥' इति ।

एवं जीवसंज्ञा जगत्संज्ञा चोभे द्रष्टव्ये । ब्रह्मशब्दाभिधेयः परमात्मा जगतो निमित्तोपादनोभयकारणम् । ब्रह्मभिन्नं द्वितीयं वस्तु अन्यत्किञ्चिन्नास्ति । तदुक्तं कठोपनिषदि (२/१/११) बृहदारण्यकोपनिषदि (४/४/१९) च –

'नेह नानास्ति किञ्चन ।' इति ।

उक्तञ्च छान्दोग्यश्रुतौ (७/२७/१) –

'यत्र नान्यत्पश्यति नान्यच्छृणोति नान्यद्विजानाति स भूमा ।' इति ।

अपि च श्वेताश्वतरे (३/९) – 'यस्मात्परं नापरमस्ति किञ्चित् ।' इति ।

उक्तञ्च श्रीमद्भागवते (२/९/३२) –

'अहमेवासमेवाग्रे नान्यद्यत्सदसत्परम् ।
पश्चादहं यदेतच्च योऽवशिष्येत सोऽस्म्यहम् ॥' इति ।

उक्तञ्च भगवद्गीतायाम् (१०/३९, ११/३७) –

'यच्चापि सर्वभूतानां बीजं तदहमर्जुन ।
न तदस्ति विना यत्स्यान्मया भूतं चराचरम् ॥
अनन्त देवेश जगन्निवास त्वमक्षरं सदसत्तत् परं यत् ।' इति ।

ब्रह्म स्वयं हि निमित्तकारणं भूत्वा उपादानरूपिणं स्वात्मानं विशेषरूपेण सृजति इत्यनेन एतत् उच्यते यत् सर्वज्ञं सर्वशक्ति ब्रह्म स्वशक्तिविक्षेपपूर्वकम् आत्मानं जगदाकारेण परिणमति अर्थात् स्वीयाविकृतिरूपेण भूत्वापि स्वयं जगद्रूपेण परिणामं प्राप्नोति । तदुक्तं तैत्तिरीयश्रुतौ (२/७) – 'तदात्मानं स्वयमकुरुत' इति । 'आत्मकृतेः परिणामात् ॥' इति ब्रह्मसूत्र(१/४/२६) व्याख्याने भगवता श्रीनिम्बार्काचार्येणापि एतदेव विवृतम् । तद्यथा – 'सर्वज्ञं सर्वशक्ति ब्रह्म स्वशक्तिविक्षेपेण जगदाकारं स्वात्मानं परिणमय्य अव्याकृतेन स्वरूपेण शक्तिमता परिणतमेव भवति ॥' इति ।

ब्रह्म अनन्तजगदाकारेण परिणमितमर्थात् प्रकाशितं भूत्वा जगतः प्रत्येकम् अंशे जीवरूपेण ईश्वररूपेण च विद्यमानमस्ति । तदेव च जीवरूपेण अविद्याग्रस्तं भूत्वा भोग्यविषयसमूहं भुङ्क्ते । अतो जीवरूपेण बद्धं भवति अथ च ईश्वररूपेण जीवसमूहस्य तथा च जगतो भरणं नियमनञ्च करोति । बद्धजीवो यदा उपासनया ईश्वरं जानाति तदाऽयं सर्वविधबन्धनात् मुक्तो भवति । श्रूयत एतद्यथा श्वेताश्वतरोपनिषदि (१/८) –

'संयुक्तमेतत् क्षरमक्षरञ्च व्यक्ताव्यक्तं भरते विश्वमीशः ।
अनीशश्चात्मा बध्यते भोक्तृभावाज्ज्ञात्वा देवं मुच्यते सर्वपाशैः ॥' इति ।

अत एव ब्रह्म द्रष्टृ अर्थात् ईक्षणशक्तिविशिष्टम् । तच्चापि दृश्यस्थानीयम् । सुतरां तत् एकम् अविकृतं सदपि स्वात्मानम् अनन्तरूपेण पश्यति इत्यपि श्रुत्युपदेशो वरीवर्त्ति । विशेषतो बृहदारण्यकोपनिषदि द्वितीयाध्याये प्रथमब्राह्मणे 'ब्रह्म सत्यस्य सत्यम्' इत्याद्युपदेशानन्तरं तृतीयब्राह्मणे 'द्वे वाव ब्रह्मणो रूपे

मूर्त्तञ्चैवामूर्त्तञ्च' इत्याद्यभिधाय एतस्माद्रूपद्वयाद्भिन्नं तदतीतरूपं ब्रह्मणः अस्तीति निर्देष्टुमुपदिश्यते षष्ठवाक्ये यथा – 'अद्यात आदेशो नेति नेति ; न ह्येतस्मादिति नेत्यन्यत् परमस्त्यथ नामधेयं सत्यस्य सत्यमिति । प्राणा वै सत्यं तेषामेष सत्यम् ।' इति । एतत्सर्वं प्रपञ्चितं ब्रह्मसूत्रे (३/२/२२) –

'प्रकृतैतावत्त्वं हि प्रतिषेधति ततो ब्रवीति च भूयः ॥' इति ।

ब्रह्मणः ईक्षणम् अर्थात् दर्शनं द्विविधम् । रूपसकलस्य युगपत् समग्रभावेन दर्शनं प्रथमम् । एतद्रूपदर्शनकारी ईश्वरः । अथ च रूपसकलस्य परपरभावेन दर्शनं द्वितीयप्रकारकम् । एतद्रूपदर्शनकारी जीवो भवति । ब्रह्मकर्तृकैतदीक्षणस्य विषयरूपेण विद्यमानम् एतद्रूपसकलं जगत् ।

ईक्षणशक्तेः प्रकाशाभावावस्थां परिलक्ष्य 'सदेव सौम्येदमग्र आसीत्' इति छान्दोग्यश्रुत्या (६/२/१) ब्रह्म 'सत् इति कथ्यते । अयं हि ब्रह्मणः अक्षरपादः । ब्रह्मण एततूस्वरूपं केनचित्प्रकारेण अपि निर्देष्टुं न शक्यते । बह्म अस्ति इति तु 'सत्' शब्देन उच्यते । ब्रह्मणः अयम् अक्षरपादः अक्षरब्रह्म निर्गुणब्रह्म निर्विशेषब्रह्म चेति कथ्यते । अत एव अक्षरः ईश्वरः जीवः जगत् चेति चतुष्पाद्विशिष्टं ब्रह्मस्वरूपम् ।

सर्वभूतगुहाशयस्य ब्रह्मणो निर्विशेषस्वरूपं श्रुतिषु समुपदिष्टम् । तद्यथा कठोपनिषदि (१/३/१५) –

'अशब्दमस्पर्शमरूपमव्ययं तथाऽरसं नित्यमगन्धवच्च यत् ।

अनाद्यनन्तं महतः परं ध्रुवं निचाय्य तन्मृत्युमुखात्प्रमुच्यते ॥'इति ।

प्रत्यक्षीभूतमथवा अनुमितं किञ्चिद्वस्तु एतेन ब्रह्मणा सह तुलनीयं नास्ति । अत एव बृहदारण्यकोपनिषदि (४/४/२२) श्रूयते –

'स एष नेति नेत्यात्माऽगृह्यो न हि गृह्यतेऽशीर्यो न हि शीर्यतेऽसङ्गो न हि सज्यतेऽसितो न व्यथते न रिष्यति ।' इति । वस्तुतः तत् नास्तीति न, तत् सत् । अत एवैतस्य ब्रह्मणः स्वरूपमुपदिशन्ती तैत्तिरीयश्रुतिः कथयति -- 'सत्यं ज्ञानमनन्तं ब्रह्म ।', 'आनन्दो ब्रह्मेति (भृगुः) व्यजानत्॥' चेति ।

अनन्तरूपविशिष्टस्य अस्य आनन्दस्य युगपदनुभवकर्तृरूपं हि अस्य ब्रह्मणो द्वितीयपादः अर्थात् ईश्वरपादः । ईश्वररूपेऽस्मिन् न काचित् भेदबुद्धिः ।

एतत् ब्रह्म हि नित्यं सर्वज्ञम् अपरिवर्त्तनशीलम् अपरिच्छिन्नम् इन्द्रियमनोबुद्धीनाम् अगोचरम् । अत एव ईश्वरोऽपि अरूपी अर्थात् अमूर्त्तः । ब्रह्मणः आनन्दांशात् प्रकाशितं जागतिकं रूपसकलं तस्य चिदंशात् पृथग्रूपेण वर्ण्यते चेत् तत् जडजगत् कथ्यते । आनन्दांशसम्भूतस्य जगतः दृश्यस्थानीयभिन्नभिन्नमंशं परपरभावेन आकलयति या ईक्षणशक्तिः, दृश्यवर्गात् तस्याः पृथग्भाववर्णनेन स जीवो भवति । एवम् अक्षरः ईश्वरः जीवः जगच्चेति चतुष्पादविशिष्टं ब्रह्म । श्रुतिप्रतिपादितमेतत् स्मर्यते विष्णुपुराणे (६/७/४७) –

'आश्रयश्चेतसो ब्रह्म द्विधा तच्च स्वभावतः ।
भूप ! मूर्त्तममूर्त्तञ्च परञ्चापरमेव च ॥' इति ।

अत्र वेदव्यासः 'स्वभावतः' इति विवेचनानुरोधेन ब्रह्मणो द्विरूपतां प्रकाशयति । स्वभावः परिवर्त्तितो न भवति, अत एव नित्यः । श्रुतौ अपि ब्रह्म चतुष्पादविशिष्टमित्युक्तम् । तद्यथा – 'पादोऽस्य विश्वाभूतानि त्रिपादस्यामृतं दिवि ।' इति । उक्तञ्च श्वेताश्वतरश्रुतौ (१/७) –

'उद्गीतमेतत् परमन्तु ब्रह्म तस्मिंस्त्रयं सुप्रतिष्ठाक्षरञ्च ।
अत्रान्तरं ब्रह्मविदो विदित्वा लीना ब्रह्मणि तत्परा योनिमुक्ताः ॥' इति ।

एतेषु श्रुतिवचनेषु ब्रह्मणः अक्षरपादातिरिक्तापरपादत्रितयस्य नामोल्लेखो नास्ति । श्वेताश्वतरश्रुतौ (१/९) तु एतेषां पादानां विवरणं लभ्यते । तद्यथा –

'ज्ञाज्ञौ द्वावजावीशनीशावजा ह्येका भोक्तृभोग्यार्थयुक्ता ।
अनन्तश्चात्मा विश्वरूपो ह्यकर्त्ता त्रयं यदा विन्दते ब्रह्ममेतत् ॥' इति।

अर्थात् ज्ञः सर्वज्ञः ईश्वरः सर्वनियन्ता, अज्ञः असर्वज्ञः विशेषज्ञः अल्पज्ञः अनीश्वरः ईश्वराधीनः जीवः, उभौ अजौ जन्मरहितौ नित्यौ, भोक्तुः जीवस्य भोग्यार्थप्रदायिनी प्रकृतिरपि जन्मरहिता अनादिः नित्या । ब्रह्मणः एतत् रूपत्रयं यदा जीवात्मा प्राप्नोति तदा सोऽपि अनन्तः विश्वरूपः अकर्त्ता च भवति । भोक्तृभोग्यनियन्तृत्वेन ब्रह्मणः त्रिरूपता चापि तत्रैव (१/१२) श्रूयते –

'भोक्ता भोग्यं प्रेरितारञ्च मत्वा सर्वं प्रोक्तं त्रिविधं ब्रह्ममेतत् ॥' इति ।

एवं ब्रह्म चतुर्विधरूपि सदपि सर्वदा नित्यं निष्कलं पूर्णम् । एतत् प्रवदन्ती बृहदारण्यकश्रुतिः (५/१/१) उपदिशति –

'ॐपूर्णमदः पूर्णमिदं पूर्णात्पूर्णमुदच्यते ।
पूर्णस्य पूर्णमादाय पूर्णमेवावशिष्यते ॥' इति ।

ब्रह्म निर्गुणमपि सगुणमित्यपि श्रुतिस्मृत्यादिशास्त्रेषु उपदिष्टम् । ब्रह्म निर्गुणमिति उक्तं ब्रह्मसूत्रे (३/२/२३) – 'तदव्यक्तमाह हि॥' इति । ब्रह्म चापि सगुणमिति प्रतिपादयन् वेदव्यासो ब्रह्मसूत्रे (२/१/२९) सूत्रयति – 'सर्वोपेता च सा तद्दर्शनात् ॥' इति । अत्र श्रीनिम्बार्कभाष्यं यथा – 'पराऽस्य शक्तिर्विविधैव श्रूयते स्वाभाविकी ज्ञानबलक्रिया चे'त्यादिश्रुतेः सा देवता सर्वशक्त्युपेता सर्वं कर्त्तुं समर्था भवति ॥' इति । सूत्रान्तरे चापि ब्रह्मणः सगुणनिर्गुणोभयलिङ्गत्वं प्रतिपादितं वेदव्यासेन ब्रह्मसूत्रे (३/२/११) यथा –

'न स्थानतोऽपि परस्योभयलिङ्गं सर्वत्र हि ॥' इति ।

अत्र श्रीनिम्बार्कभाष्यं यथा – 'अकर्म्मवश्यत्वात्सर्वान्तर्वर्त्तिनोऽपि परमात्मनस्तत्र तत्र दोषा न सम्भवन्तीत्युपपादितमेव, स्थानतोऽपि दोषाः परस्य न यतः सर्वत्र ब्रह्मनिर्दोषत्वस्वाभाविकगुणात्मकत्वाभ्यां युक्तमाम्नातम् ॥' इति ।

श्रीश्रीनिवासाचार्यभाष्यञ्च – 'पूर्वत्र संसाराद्वैराग्योत्पादनाय जीवस्यावस्थाविशेषाः परस्य च ब्रह्मणः श्रीपुरुषोत्तमस्य स्वप्नसृष्टिकर्त्तृत्वसत्यसङ्कल्पत्वसुषुप्तिसुखहेतुत्वादयो गुणाश्च तस्मिन्ननुरागोत्पादनाय संक्षेपतो निरूपिताः । इदानीं परस्मिन्ननुरागजननाय तस्य स्वभावतोऽपास्तसमस्तदोषत्वं समस्तकल्याणगुणैकराशित्वञ्च प्रतिपादयितुं भगवानिदमाह –

किञ्जाग्रत्स्वप्नसुषुप्त्यादिषु स्थानेषु स्थितस्य जीवस्य ये तत्तत्स्थाननिबन्धना दोषास्ते तदन्तर्य्यामिणः परमात्मनोऽपि सन्ति, न वेति ? सन्देहे, पूर्वः पक्षः – यद्यपि प्रथमाध्याये 'सम्भोगप्राप्तिरिति चेन्न वैशेष्यादि'त्यादिषु शरीराभिमानिनः कर्म्मकर्त्तृर्जीवस्यैव ते दोषाः सन्ति, न त्वकर्म्मवश्यस्य परमात्मन इत्युक्तं, तथापि वह्निविदीप्तशरणसंसर्गात्तत्स्वामिनो यज्ञदत्तस्येव तत्र प्रविष्टस्य तन्मित्रस्य देवदत्तस्यापि वह्नितापप्राप्तिवत् परमात्मनोऽपि स्थानतो दोषाः सम्भवन्तीति । तत्र ब्रूमः – नेति । परस्य ब्रह्मणः स्वानन्दपूर्णस्य स्वांशभूतजीवनियमनाय कारुण्यवशात्स्वेच्छयैव

जीवान्तर्य्यामितया तत्तत्स्थानेषु प्रविष्टस्यापि तत्तत्स्थानप्रयुक्ता दोषा नैव सन्ति । हि यतः सर्वत्र श्रुतिस्मृतिषूभयलिङ्गं स्वभावतोऽपास्तसमस्तदोषत्व-स्वाभाविकगुणगणमन्दिरत्वलक्षणवत्परंब्रह्म निश्चीयते ।

'य आत्माऽपहतपाप्मा विजरो विमृत्युर्विशोको विजिघत्सोऽपिपासः सत्यकामः सत्यसङ्कल्पः, यः सर्वज्ञः सर्ववित्, यस्य ज्ञानमयं तपः, आनन्दं ब्रह्मणो विद्वान्, स्वाभाविकी ज्ञानबलक्रिया चे'त्याद्याः श्रुतयः।

'समस्तकल्याणगुणात्मकोऽसौ स्वशक्तिलेशोद्धृतभूतसर्गः ।
तेजोबलैश्वर्य्यमहावबोधः स्ववीर्य्यशक्त्यादिगुणैकराशिः ॥
परः पराणां सकला न यत्र क्लेशादयः सन्ति परावरेशे ॥'

इत्याद्याः स्मृतयश्च । इति ।

स्मृतावपि ब्रह्मणः सगुणनिर्गुणोभयरूपता प्रतिपादिता । तद्यथा महाभारते शान्तिपर्वणि भीष्मवचनम् (३३८/३) –

'स्तोत्रं जगौ स विश्वाय निर्गुणाय गुणात्मने ॥' इति ।

उक्तञ्च च भगवद्गीतायाम् (१३/१३,१४) –

'सर्वतःपाणिपादं तत्सर्वतोऽक्षिशिरोमुखम् ।
सर्वतःश्रुतिमल्लोके सर्वमावृत्य तिष्ठति ॥
सर्वेन्द्रियगुणाभासं सर्वेन्द्रियविवर्जितम् ।
असक्तं सर्वभृच्चैव निर्गुणं गुणभोक्तृ च ॥' इति ।

श्रीमद्भागवते (३/९/३९) स्वयं भगवता सृष्टिकर्त्रे ब्रह्मणे उक्तम् –

'प्रीतोऽहमस्तु भद्रं ते लोकानां विजयेच्छया ।
यदस्तौषीर्गुणमयं निर्गुणं माऽनुवर्णयन् ॥' इति ।

तत्रैव (३/३२/३६) च स सगुणनिर्गुणब्रह्मविषये मात्रे देवहूत्यै उपदिशति –

'आत्मतत्त्वावबोधेन वैराग्येण दृढेन च ।
ईयते भगवानेभिः सगुणो निर्गुणः स्वदृक् ॥' इति ।

देवकी मथुराधिपतेः उग्रसेनस्य सुपुत्री, कुख्यातस्य कंसासुरस्य भगिनी, देवप्रतिमस्य सत्त्वप्रधानस्य वसुदेवस्य सुशीला धर्मपत्नी ; द्वापरयुगे ततो जन्म जननमाविर्भावः परमात्मनः श्रीकृष्णस्य संघटितः । तदुक्तं ब्रह्मवैवर्त्तपुराणे

श्रीकृष्णजन्मखण्डे सप्तमेऽध्याये यथा –

'बभूव जलवृष्टिश्च निश्चेष्टा मथुरापुरी ।
घोरान्धकारनिविडा बभूव यामिनी मुने ! ॥ ६२ ॥
गतसप्तमुहूर्त्ते तु चाष्टमे समुपस्थिते ।
वेदातिरिक्तदुर्ज्ञेये सर्वोत्कृष्टे शुभे क्षणे ॥ ६३ ॥
शुभे ग्रहे दृष्टियुक्तेऽप्यदृष्टे चाशुभग्रहे ।
अर्द्धरात्रसमुत्पन्ने रोहिण्यामष्टमीतिथौ ॥ ६४ ॥
जयन्तीयोगसंयुक्ते चार्द्धचन्द्रोदये मुने ! ॥ ६५ ॥
एतस्मिन्नन्तरे तत्र पपात देवकी सती ॥ ७२ ॥
निःससार च वायुश्च देवकीजठरात्ततः ।
तत्रैव भगवान् कृष्णो दिव्यरूपं विधाय च ॥ ७३ ॥
हृत्पद्मकोशाद्देवक्या हरिराविर्बभूव ह ।
अतीव कमनीयश्च शरीरं सुमनोहरम् ॥ ७४ ॥' इति ।

श्रीमद्भागवते दशमस्कन्धेऽपि श्रीकृष्णभगवज्जन्म स्फुटीकृतम् । तद्यथा –

'प्रलम्बबकचाणूरतृणावर्त्तमहाशनैः ।
मुष्टिकारिष्टद्विविदपूतनाकेशिधेनुकैः ॥ २/१ ॥
अन्यैश्चासुरभूपालैर्बाणभौमादिभिर्युतः ।
यदूनां कदनं चक्रे बलीमागधसंशयः ॥ २/२ ॥
ते पीडिता निविविशुः कुरुपञ्चालकेकयान् ।
शाल्वान् विदर्भान्निषधान् विदेहान् कोसलानपि ॥ २/३ ॥
भगवानपि विश्वात्मा विदित्वा कंसजं भयम् ।
यदुनां निजनाथानां योगमायां समादिशत् ॥ २/६ ॥
देवक्या जठरे गर्भे शेषाख्यं धाम मामकम् ।
तत् संनिकृष्य रोहिण्या उदरे संनिवेशय ॥ २/८ ॥
भगवानपि विश्वात्मा भूतानामभयङ्करः ।
आविवेशांशभागे मनआनकदुन्दुभेः ॥ २/१६ ॥
अथ सर्वगुणोपेतः कालः परमशोभनः ।

यर्ह्येवाजनजन्मर्क्षे शान्तर्क्षग्रहतारकम् ॥ ३/१ ॥
मनांस्यासन् प्रसन्नानि साधूनामसुरद्रुहाम् ।
जायमानेऽजने तस्मिन् नेदुर्दुन्दुभयो दिवि ॥ ३/५ ॥
मुमुचुर्मुनयो देवाः सुमनांसि मुदान्विताः ।
मन्दं मन्दं जलधरा जगर्जुरनुसागरम् ॥ ३/७ ॥
निशीथे तम उद्भूते जायमाने जनार्द्दने ।
देवक्यां देवरूपिण्यां विष्णुः सर्वगुहाशयः ।
आविरासीद्यथा प्राच्यां दिशीन्दुरिव पुष्कलः ॥' ३/८ इति ।

श्रीकृष्णावतारोपक्रमोऽपि तत्रैव उक्तः । तद्यथा (१०/१/१७-२५) –

'भूमिर्दृप्तनृपव्याजदैत्यानीकशतायुतैः ।
आक्रान्ता भूरिभारेण ब्रह्माणं शरणं ययौ ॥
गौर्भूत्वाऽश्रुमुखी खिन्ना क्रन्दन्ती करुणं विभोः ।
उपस्थितान्तिके तस्मै व्यसनं स्वमवोचत ॥
ब्रह्मा तदुपधार्याथ सह देवैस्तया सह ।
जगाम सत्रिनयनस्तीरं क्षीरपयोनिधेः ॥
तत्र गत्वा जगन्नाथं देवदेवं वृषाकपिम् ।
पुरुषं पुरुषसूक्तेन उपतस्थे समाहितः ॥
गिरं समाधौ गगने समीरितां निशम्य वेधास्त्रिदशानुवाच ह ।
गां पौरुषीं मे शृणुतामराः पुनर्विधीयतामाशु तथैव मा चिरम् ॥
पुरैव पुंसावधृतो धराज्वरो भवद्भिरंशैर्यदुषूपजन्यताम् ।
स यावदुर्व्या भरमीश्वरेश्वरः स्वकालशक्त्या क्षपयंश्चरेद्भुवि ॥
वसुदेवगृहे साक्षाद्भगवान् पुरुषः परः ।
जनिष्यते तत्प्रियार्थं सम्भवन्तु सुरस्त्रियः ॥
वासुदेवकलानन्तः सहस्रवदनः स्वराट् ।
अग्रतो भविता देवो हरेः प्रियचिकीर्षया ॥
विष्णोर्माया भगवती यया सम्मोहितं जगत् ।
आदिष्टा प्रभुणांशेन कार्यार्थे सम्भविष्यति ॥' इति ।

वस्तुतो देवकीनन्दनो भगवान् श्रीकृष्णो निर्गुणः अजन्मा अव्यक्तो भूतात्मा भूतभावनः प्रकृतिप्रभुः विद्यते । जन्ममृत्युजरातिगोऽपि स स्वमायायाः गुणं स्वकृत्य जन्ममृत्युं लभते, मृत्युकारणञ्च भवतीत्युक्तं तत्रैव (७/१/६) –

'निर्गुणोऽपि ह्यजोऽव्यक्तो भगवान् प्रकृतेः परः ।
स्वमायागुणमाविश्य बाध्यबाधकतां गतः ॥' इति ।

महाभारते अनुशासनपर्वणि (१४९/११९) भीष्मेण 'देवकीनन्दन' इति भगवन्नामविशेषणमुक्तम् । अपि च तत्रैव तस्य देवकीनन्दनस्य श्रीकृष्णस्य सर्वव्यापित्वं भीष्मेणोपपादितम् । तद्यथा (१५८/३१) –

'ज्योतींषि शुक्लानि हि सर्वलोके त्रयो लोका लोकपालास्त्रयश्च ।
त्रयोऽग्नयो व्याहृतयश्च तिस्रः सर्वे देवा देवकीपुत्र एव ॥' इति।

जगत्यस्मिन् श्रीकृष्णभगवतस्तदेव जन्म आविर्भावः केवलं वादः प्रवादो वस्तुतः 'अजायमानो बहुधा विजायते ।' इति काण्व(३५/१९) मुद्गलोपनिषच्छ्रुति (३/१) वचनानुसारेण स जन्ममृत्युजरातिगो भवति । सर्वभूतगुहाशयस्य परमात्मनः श्रीकृष्णस्य जन्म परिपरिप्रकाशो वा धर्मस्थापनाधर्मोच्छेदनिमित्तं भवति । तदुक्तं भगवद्गीतायां (४/७,८) –

'यदा यदा हि धर्मस्य ग्लानिर्भवति भारत ! ।
अभ्युत्थानमधर्मस्य तदात्मानं सृजाम्यहम् ॥
परित्राणाय साधूनां विनाशाय च दुष्कृताम् ।
धर्मसंस्थापनार्थाय सम्भवामि युगे युगे ॥' इति ।

धर्माधर्मौ वैशेषिकन्यायशास्त्रोक्तचतुर्विंशतिगुणेष्वन्तर्भुक्तौ द्वौ गुणौ । उक्तं तद्यथा कारिकावल्याम् (३,४,५,१६१) –

'अथ गुणा रूपं रसो गन्धस्ततः परम् ॥
स्पर्शः संख्या परिमितिः पृथक्त्वं च ततः परम् ।
संयोगश्च विभागश्च परत्वं चापरत्वकम् ॥
बुद्धिः सुखं दुःखमिच्छा द्वेषो यत्नो गुरुत्वकम् ।
द्रवत्वं स्नेहसंस्कारावदृष्टं शब्द एव च ॥
धर्माधर्मावदृष्टं स्यात् ...... ॥' इति ।

धर्माधर्मौ द्वौ गुणावात्मसम्बन्धितौ क्रमानुसारं सुखदुःखयोर्विशिष्टकारणभूतौ वर्त्तेते । इमाविन्द्रियैरप्रत्यक्षीभूतावप्यनुमानसिद्धौ । पुनर्जन्मविचारद्वाराऽन्ये ।

धर्मस्य लक्षणमतीव वैशिष्ट्यपूर्णम् । धारणार्थक-धृङ्-धातोः औणादिकेन मन्-प्रत्ययेन धर्मशब्दो निष्पद्यते ।

'धारणाद्धर्ममित्याहुर्धर्मेण विधृताः प्रजाः ।
यः स्याद्धारणसंयुक्तः स धर्म इति निश्चयः ॥'

इति महाभारते शान्तिपर्वणि (१०९/१०) भीष्मोक्त्या चैतत् प्रमाणितम् । स चायं धर्मः श्रुतिप्रमाणकः । तदुक्तं मन्वर्थमुक्तावलीधृतहारीतेन (२/१) यथा –

'अथातो धर्मं व्याख्यास्यामः । श्रुतिप्रमाणको धर्मः । श्रुतिश्च द्विविधा, वैदिकी तान्त्रिकी च ।' इति । तद्धेतोस्तज्ज्ञानिनां स्मृतिशीलादीनां धर्मे प्रामाण्यं प्रतिपादयन् मनुराह (२/६) यथा –

'वेदोऽखिलो धर्ममूलं स्मृतिशीले च तद्विदाम् ।
आचारश्चैव साधूनामात्मनस्तुष्टिरेव च ॥' इति ।

धर्मानुष्ठाने संशये उपस्थिते वेदविदां हृदयाङ्गीकरणमेव धर्म इति ज्ञायते । कुल्लूको मन्वर्थमुक्तावल्याम् (२/६) एवं वक्तुं गर्गवचनमुद्धरति –

'वैकल्पिके आत्मतुष्टिः प्रमाणम् ।' इति ।

अत एव रागद्वेषादिशून्यहृदयैः सद्भिर्विपश्चिद्भिराचरितो यः स एव धर्म इति मनुनोक्तम् । तद्यथा (२/१) –

'विद्वद्भिः सेवितः सद्भिर्नित्यमद्वेषरागिभिः ।
हृदयेनाभ्यनुज्ञातो यो धर्मस्तं निबोधत ॥' इति ।

धर्मकर्मणि प्रेरणादानप्रसङ्गात् पूर्वमीमांसकैः प्रेरणामूलकता धर्मत्वेनाङ्गीक्रियते । तद्यथा जैमिनीसूत्रे (१/१/२) – 'चोदनालक्षणोऽर्थो धर्मः ।' इति । तेन वेदप्रमाणकं श्रेयःसाधनं ज्योतिष्टोमादिकर्मस्तजन्यापूर्वश्चैव धर्मः ॥ धर्मो लक्षणप्रमाणरहित इति पूर्वपक्षमतं निरस्य माधवाचार्येण जैमिनीयन्यायमालाविस्तरे अर्थस्य श्रेयःसाधनत्वं प्रतिपादयितुमनर्थोऽपास्तः । तदुक्तं यथा –

'मा भूच्चक्षुरादिगम्यो लौकिक आकारः । तथापि चोदनागम्यः

स्वर्गफलसाधनत्वादिलक्षण आकारोऽस्ति । 'तेन अर्थत्वे सति चोदनागम्यो धर्मः' इति लक्षणं भवति । 'अर्थो धर्मः' इत्युक्ते ब्रह्मणि चैत्यवन्दनादौ घटादौ चातिव्याप्तिः । तद्व्यवच्छेदाय 'चोदनागम्यः' इत्युक्तम् । तावत्येवोक्ते विधिगम्येऽनर्थफलत्वे नानर्थरूपे श्येनाद्यभिचारकर्मण्य-तिव्याप्तिः । तद्व्यवच्छेदाय 'अर्थः' इत्युक्तम् । यद्यपि श्येनस्य शत्रुबधः फलम्, न तु नरकः, तथापि तस्य बधस्य नरकहेतुत्वाद्बधद्वारा श्येनोऽनर्थः । न चैवमग्नीषोमीयपशुहिंसा अपि बधत्वेन नरकहेतुत्वं स्यादिति शङ्कनीयम् । तस्याः क्रत्वङ्गत्वेन क्रतुफलस्वर्गव्यतिरेकेण फलान्तराभावात् । यतश्चोदनागम्यत्वे सत्यर्थत्वं धर्मलक्षणम् । अत एव गम्ये धर्मे गमकं विधिवाक्यं प्रमाणम् । यद्यपि प्रत्यक्षानुमानयोरविषयो धर्मः, तथापि प्रसिद्धपदसमभिव्याहारेण व्युत्पत्तिः सम्भवति । तस्माल्लक्षणप्रमाणाभ्यामुपेतो धर्मः ।' इति ।

कृष्णयज्वाऽपि मीमांसापरिभाषायां (पृ.१) धर्मलक्षणं प्रतिपादयति – 'वेदबोधितेष्टसाधनताको धर्मः, यथा यागादिः ।' इति । परिभाषाप्रदर्शनावसरे वैशेषिकैस्तावदभ्युदयनिःश्रेयससिद्धिकारणं धर्म इति मन्यते । तदुक्तं वैशेषिकसूत्रे (१/१/२) यथा –

'यतोऽभ्युदयनिःश्रेयससिद्धिः स धर्मः ॥' इति ।

'विहितकर्मजन्यो विहितकर्मरूपश्च धर्मः ।' इति धर्मशास्त्रशब्दकोषे धर्मशब्दव्याख्याने अस्मद्गुरुचरणाः कुलमणिमिश्राः । आपस्तम्ब-गौतमधर्मसूत्रव्याख्याने(१/१/१)हरदत्तस्योक्तिरपि एवम् –

'कर्मजन्योऽभ्युदयनिःश्रेयसहेतुरपूर्वाख्य आत्मगुणो धर्मः ।' इति ।

वसिष्ठोक्तं धर्मलक्षणमपि सुरुचिरम् । तद्यथा (१/१,४,५,७) –

'अथातः पुरुषनिःश्रेयसार्थं धर्मजिज्ञासा ॥
श्रुतिस्मृतिविहितो धर्मः ॥
तदलाभे शिष्टाचारः प्रमाणम् ॥
अगृह्यमाणकारणो धर्मः ॥' इति ।

कदाचिदयं धर्मो विशेषणत्वेन व्यवह्रियते, कदाचिच्च धर्मस्य सर्वकारणत्वं स्वीक्रियते । तदुक्तं तैत्तिरीयारण्यकश्रुतौ (१०/६३) यथा –

'धर्मो विश्वस्य जगतः प्रतिष्ठा,
लोके धर्मिष्ठं प्रजा उपसर्पन्ति,
धर्मेण पापमपनुदति,
धर्मे सर्वं प्रतिष्ठितं, तस्माद्धर्मं परमं वदन्ति ॥' इति ।

'आचारप्रभवो धर्मो धर्मस्य प्रभुरच्युतः ॥'

इति महाभारतेऽनुशासनपर्वणि (१४९/१३७) धर्मस्याचारोत्पन्नत्वं प्रतिपाद्यते ।

'आचारः परमो धर्मः श्रुत्युक्तः स्मार्त एव च ।'

इति मनु (१/१०८) वचनाद्धर्मस्याचाररूपत्वमपि स्वीक्रियते । अदृष्टस्वर्गापवर्गसाधनप्रयोजनत्वेन शास्त्रैकगम्यस्य धर्मस्याचरणीयत्वं युक्ततममेव । रतिफलस्य लौकिकत्वेऽपि पत्न्युपगमनप्रसङ्गे –

'ऋतुकालाभिगामी स्यात् स्वदारनिरतः सदा ।'

इति मनु (३/४५) वचनानुरोधेन पितृ-ऋणापकरणहेतुभूतापत्योत्पादनोपायकस्य ऋतुकालगमननियमस्य धर्मान्तर्भुक्तत्वं नापलपितुं शक्यते ।

अयं धर्मः कदाचिदाकृतिविशेषत्वेन प्रथितः । तत्प्रसङ्गे –

'वृषो हि भगवान् धर्मः ।'

इति मनुना (८/१६) प्रतिपादितम् । महाभारतेऽपि तथा वृषाकृतिविशिष्ट एव धर्मः । न केवलं पौरुषेयेषु शास्त्रेष्वपि चापौरुषेये वेदेऽपि सः तथा प्रदर्शितः । तदुक्तं ऋग्वेदे (४/५८) शुक्लयजुर्वेदे (१७/९१) च यथा –

'चत्वारि शृङ्गा त्रयो अस्य पादा द्वे शीर्षे सप्त हस्तासो अस्य ।
त्रिधा बद्धो वृषभो रोरवीति महो देवो मर्त्यां आविवेश ॥' इति ।

तस्य च वृषभरूपस्य धर्मस्य यानि चत्वारि शृङ्गाणि, तानि मनुना (२/१२) प्रतिपादितानि । तद्यथा –

'वेदः स्मृतिः सदाचारः स्वस्य च प्रियमात्मनः ।
एतच्चतुर्विधं प्राहुः साक्षाद्धर्मस्य लक्षणम् ॥' इति ।

तत्रात्मतुष्टेर्वैलक्षण्येन चतुर्थत्वं स्पष्टीकृतमस्मद्गुरुचरणैः कुलमणिमिश्रैः 'धर्मप्रतिष्ठानम्' इति प्रबन्धे । तद्यथा –

'आत्मतुष्टेः श्रुत्यादीनां स्वगतविरोधसमाधायकत्वेऽपि उदासीनेषु तेषु श्रुतिस्मृतिसदाचारेषु तत्प्रातिकूल्यमन्तरेण स्वातन्त्र्यं सम्भवतीति तस्य चतुर्थं स्थानं युक्तम् ।' इति ।

पादत्रितये आचारव्यवहारप्रायश्चित्तकाण्डानामन्तर्भावः । यच्च,

'चतुष्पात् सकलो धर्मः'

इति मन्वादिभिः (१/८१) धर्मस्य चत्वारः पादाः प्रोक्तास्ते प्रविभागवचना इति ज्ञातव्यम् । तस्यैव धर्मवृषस्य शीर्षद्वयम्, आभ्युदयिकनैःश्रेयसिकरूपे प्रवृत्तिनिवृत्त्यात्मके सिद्धे । तदुक्तं मनुना (१२/८८ - ९०) यथा –

'सुखाभ्युदयिकं चैव नैःश्रेयसिकमेव च ।
प्रवृत्तं च निवृत्तं च द्विविधं कर्म वैदिकम् ॥
इह चामुत्र वा काम्यं प्रवृत्तं कर्म कीर्त्यते ।
निष्कामं ज्ञानपूर्वं तु निवृत्तमुपदिश्यते ॥
प्रवृत्तं कर्म संसेव्य देवानामेति साम्यताम् ।
निवृत्तं सेवमानस्तु भूतान्यत्येति पञ्च वै ॥ इति ।

श्रीमद्भागवतेऽप्युक्तमेतत् । तद्यथा (७/१५/४७) –

'प्रवृत्तं च निवृत्तं च द्विविधं कर्म वैदिकम् ।
आवर्त्तेत प्रवृत्तेन, निवृत्तेनाश्नुतेऽमृतम् ॥' इति ।

धर्मवृषभस्य हस्तसप्तकं धर्मस्य सप्त स्वगतभेदा भवन्ति । ते वर्णधर्मः, आश्रमधर्मः, वर्णाश्रमधर्मः, गुणधर्मः, निमित्तधर्मः, साधारणधर्मः, परमधर्मश्चेति । तत्रादितः पञ्च प्रवृत्तधर्मभेदा धर्मशास्त्रशब्दकोषधृत-भविष्यपुराणे प्रतिपादिताः । तद्यथा –

'वर्णधर्मः स्मृतस्त्वेक आश्रमाणामतः परम् ।
वर्णाश्रमस्तृतीयस्तु गौणो नैमित्तिकस्तथा ॥
वर्णस्तमेकमाश्रित्य यो धर्मः सम्प्रवर्त्तते ।
वर्णधर्मः स उक्तस्तु यथोपनयनं नृप ॥
यस्त्वाश्रमं समाश्रित्य अधिकारः प्रवर्त्तते ।
स खल्वाश्रमधर्मस्तु भिक्षादण्डादिको यथा ॥

वर्णत्वमाश्रमत्वं च योऽधिकृत्य प्रवर्त्तते ।
स वर्णाश्रमधर्मस्तु मौञ्जीया मेखला यथा ॥
यो गुणेन प्रवर्त्तेत गुणधर्मः स उच्यते ।
यथा मूर्द्धाभिषिक्तस्य प्रजानां परिपालनम् ॥
निमित्तमेकमाश्रित्य यो धर्मः सम्प्रवर्त्तते ।
नैमित्तिकः स विज्ञेयः प्रायश्चित्तविधिर्यथा ॥' इति ।

प्रवृत्तधर्मविभागे षष्ठः साधारणधर्मः । स एव मनुनोक्तो (१०/६३) यथा –

'अहिंसा सत्यमस्तेयं शौचमिन्द्रियनिग्रहः ।
एतं सामासिकं धर्मं चातुर्वर्ण्येऽब्रवीन्मनुः ॥' इति ।

याज्ञवल्क्यस्मृतौ (१/१२२, ३/६६), वसिष्ठस्मृतौ(१०/३०), महाभारते अनुशासनपर्वणि (२२/१९) स धर्मः स्पष्टीकृतः । सप्तमश्चात्मज्ञानरूपः सर्वोत्तमः । तदुक्तं मनुना (१२/८५) यथा –

'सर्वेषामपि चैतेषामात्मज्ञानं परं स्मृतम् ।
तद्ध्यग्र्यं सर्वविद्यानां प्राप्यते ह्यमृतं ततः ॥' इति ।

याज्ञवल्क्योऽप्याह (१/८) यथा –

'इज्याचारदमाहिंसादानस्वाध्यायकर्मणाम् ।
अयं तु परमो धर्मो यद्योगेनात्मदर्शनम् ॥' इति ।

वृषायमाणः स एव धर्मः शारीरिकवाचिकमानसिकत्वेन त्रिधा बद्धः । तदुक्तं मनुना (१२/३) यथा –

'शुभाशुभफलं कर्म मनोवाग्देहसम्भवम् ।
कर्मजा गतयो नृणामुत्तमाधममध्यमाः ॥' इति ।

स च धर्माचरणार्थं शब्दायते । तद्यथा वसिष्ठस्मृतौ (३०/१) –

'धर्मं चरत माऽधर्मं, सत्यं वदत माऽनृतम् ।
दीर्घं पश्यत मा ह्रस्वं, परं पश्यत माऽपरम् ॥' इति ।

महाभारते च युधिष्ठिरं प्रति वक्तृत्वेन यक्षरूपिणो धर्मस्य वचनं धर्मस्याकृतिज्ञापकम् । तद्यथा वनपर्वणि (३१४/११) –

'वरं वृणीष्व राजेन्द्र ! दाता ह्यस्मि तवानघ ।
ये हि मे पुरुषा भक्ता न तेषामस्ति दुर्गतिः ।।' इति ।

मनुस्मृतावपि सुरक्षितधर्मस्य सुरक्षकसहायकत्वेन स्वर्गगमने मित्रत्वेन च धर्मस्याकृतिमत्त्वं स्पष्टीकृतम् । तद्यथा (८/१५, १७) –

'धर्म एव हतो हन्ति धर्मो रक्षति रक्षितः ।
तस्माद्धर्मो न हन्तव्यो मा नो धर्मो हतोऽवधीत् ।।
एक एव सुहृद्धर्मो निधनेऽप्यनुयाति यः ।
शरीरेण समं नाशं सर्वमन्यद्धि गच्छति ।।' इति ।

वेदप्रमाणकोऽभ्युदयनिःश्रेयससाधनं धर्मः । स एव दैनन्दिनकर्त्तव्यबोधकः । शिष्टानामाचारोऽपि धर्मे प्रमाणम् । शिष्टा उक्ता यथा मनुना (१२/१०९) –

'धर्मेणाधिगतो यैस्तु वेदः सपरिबृंहणः ।
ते शिष्टा ब्राह्मणा ज्ञेयाः श्रुतिप्रत्यक्षहेतवः ।।' इति ।

वसिष्ठेनाप्युक्तं (६/४३) यथा –

'पारम्पर्यगतो येषां वेदः सपरिबृंहणः ।
ते शिष्टा ब्राह्मणा ज्ञेयाः श्रुतिप्रत्यक्षहेतवः ।।' इति ।
'शिष्टः पुनरकामात्मा ।।'

इति पुनश्च वसिष्ठ(१/६)वचनात्तेषां संसारभोगकामनाशून्यत्वं धर्मे प्रमाणरूपेण प्रतिपादितम् । तत्र कामनाग्रहणेन दुःखप्राप्तिरितिकृत्वा तस्या निराकरणमुक्तम्। तदुक्तं मनुना (२/९४) यथा –

'न जातु कामः कामानामुपभोगेन शाम्यति ।
हविषा कृष्णवर्त्मेव भूय एवाभिवर्द्धते ।।' इति ।

सैव कामना विद्याधिगमार्थं न तावन्निराकृता प्रत्युत प्रशंसिता । तदाह मनुर्यथा (२/२) –

'कामात्मता न प्रशस्ता न चैवेहास्त्यकामता ।
काम्यो हि वेदाधिगमः कर्मयोगश्च वैदिकः ।।' इति ।

वेदविदां शिष्टानां शीलमपि धर्मे प्रमाणम् । शीलं ब्रह्मण्यतादिरूपम् । तदुक्तं मन्वर्थमुक्तावलीधृत (मनु. २/६)हारीतेन यथा –

'ब्रह्मण्यता देवपितृभक्तता सौम्यता अपरोपतापिता अनसूयता मृदुता अपारुष्यं मैत्रता प्रियवादित्वं कृतज्ञता शरण्यता कारुण्यं प्रशान्तिश्चेति त्रयोदशविधं शीलम् ।' इति ।

महर्षिणा गौतमेन धर्मप्रमाणप्रसङ्गे देशजातिकुलधर्माणामुल्लेखः कृतः । तद्यथा गौतमधर्मसूत्रे (२/२/२०) –

'देशजातिकुलधर्माश्चाम्नायैरविरुद्धाः प्रमाणम् ॥' इति ।

वस्तुत अध्यात्मशास्त्रकारैर्विविधोपदेशमाध्यमेन प्रतिपादितोऽयं धर्मो नरैः नित्यमाचरणीयः । तद्द्वारा जगत्कल्याणं सम्भवतीति निश्चप्रचम् ।

धर्मस्य विरोधार्थबोधकोऽधर्मः । स च नञ्समाससिद्धः । तत्र निषेधो द्विविधः, पर्युदासः प्रसज्यप्रतिषेधश्च । तद्यथा –

'द्वौ तु नञौ समाख्यातौ पर्युदास-प्रसज्यकौ ।
पर्युदासः सदृग्ग्राही प्रसज्यस्तु निषेधकृत् ॥' इति ।

अत्र सदृगर्थे नञ् । अस्य नञः षट्प्रकारा गृह्यन्ते । तद्यथा –

'तत्सादृश्यमभावश्च तदन्यत्वं तदल्पता ।
अप्राशस्त्यं विरोधश्च नञर्थाः षट् प्रकीर्त्तिताः ॥' इति।

अत्रोदाहरणानि क्रमानुसारं यथा – अब्राह्मणः, अपापम्, अनश्वः, अनुदरा कन्या, अपशवो वाऽन्ये गोऽश्वेभ्यः, अधर्मश्चेति ।

अनिष्टसाधनमधर्मस्यास्य लक्षणम् । तदुक्तं मीमांसापरिभाषाकारेण कृष्णयज्वना (पृ.२) यथा –

'वेदबोधितानिष्टसाधनताकोऽधर्मः, यथा कलञ्जभक्षणादिः ।' 'श्येनेनाभिचरन् यजेत ।' इत्यादि तत्रोदाहरणम् । यद्यपि वेदबोधितश्येनयागस्य शत्रुबधः फलं न तु नरकस्तथापि स्वार्थसिद्ध्युद्देश्येन क्रियमाणस्य शत्रुबधस्य नरकहेतुत्वाद्बधद्वारा श्येनयागोऽनर्थः । तद्द्वाराऽधर्मसिद्धिः । सोऽयमधर्मो मनोवाक्कायजो दशलक्षणविशिष्टश्च । स्फुटीकृतमेतन्मनुना(१२/५-७) –

'परद्रव्येष्वभिध्यानं मनसाऽनिष्टचिन्तनम् ।
वितथाभिनिवेशश्च त्रिविधं कर्म मानसम् ॥
पारुष्यमनृतञ्चैव पैशुन्यञ्चापि सर्वशः ।

असम्बद्धप्रलापश्च वाङ्मयं स्याच्चतुर्विधम् ॥
अदन्तानामुपादानं हिंसा चैवाविधानतः ।
परदारोपसेवा च शारीरं त्रिविधं स्मृतम् ॥' इति ।

अधर्मस्य पञ्च शाखाः श्रीमद्भागवते नारदमुखेन व्यासेन प्रदर्शिताः । तद्यथा सप्तमस्कन्धे (१५/१२-१४) –

'विधर्मः परधर्मश्च आभास उपमा छलः ।
अधर्मशाखाः पञ्चेमा धर्मज्ञोऽधर्मवत् त्यजेत् ॥
धर्मबाधो विधर्मः स्यात् , परधर्मोऽन्यचोदितः ।
उपधर्मस्तु पाखण्डो दम्भो वा, शब्दभिच्छलः ॥
यस्त्विच्छया कृतः पुम्भिराभासो ह्याश्रमात् पृथक् ।
स्वभावविहितो धर्मः कस्य नेष्टः प्रशान्तये ॥' इति ।

अधर्माचरणादवश्यं शीघ्रञ्च विपर्ययो भवति । अत एव मनुष्यः शास्त्रविहितधर्ममनुतिष्ठन् पर्याप्तधनाद्यभावेनावसीदन्नपि कदाचिदधर्मं नाचरेत् । तदुक्तं मनुना (४/१७१-१७४) यथा –

'न सीदन्नपि धर्मेण मनोऽधर्मे निवेशयेत् ।
अधार्मिकाणां पापानामाशु पश्यन् विपर्ययम् ॥
नाधर्मश्चरितो लोके सद्यः फलति गौरिव ।
शनैरावर्त्तमानस्तु कर्त्तुर्मूलानि कृन्तति ॥
यदि नात्मनि पुत्रेषु न चेत्पुत्रेषु नप्तृषु ।
न त्वेव तु कृतोऽधर्मः कर्त्तुर्भवति निष्फलः ॥
अधर्मेणैधते तावत्ततो भद्राणि पश्यति ।
ततः सपत्नाञ्जयति समूलस्तु विनश्यति ॥' इति ।

अधर्मसत्ताप्राबल्येन महदनिष्टं भवतीति स्फुटीकृतं श्रीमद्भगवद्गीतायाम् (१/४१-४४) अर्जुनमुखेन –

'अधर्माभिभवात् कृष्ण ! प्रदुष्यन्ति कुलस्त्रियः ।
स्त्रीषु दुष्टासु वार्ष्णेय ! जायते वर्णसङ्करः ॥
सङ्करो नरकायैव कुलघ्नानां कुलस्य च ।

पतन्ति पितरो ह्येषां लुप्तपिण्डोदकक्रियाः ॥
दोषैरेतैः कुलघ्नानां वर्णसङ्करकारकैः ।
उत्साद्यन्ते जातिधर्माः कुलधर्माश्च शाश्वताः ॥
उत्सन्नकुलधर्माणां मनुष्याणां जनार्दन !।
नरके नियतं वासो भवतीत्यनुशुश्रुम ॥' इति ।

वेदस्मृतिशास्त्राणामसमस्तधर्मोपदेशकत्वे सति व्यवहारनिर्णये धर्मज्ञानार्थं ब्राह्मणाः शरणम् । ते च ब्राह्मणाः शिष्टा भवितव्याः । तदभावे दशावरा त्र्यवरा वा परिषदनुसरणीया । परितः सीदन्ति अस्यामिति परिषत् ।

'समज्या परिषद्गोष्ठी सभासमितिसंसदः ।
आस्थानी क्लीबमास्थानं स्त्रीनपुंसकयोः सदः ॥'

इत्यमरवचनात् (२/७/१५) सा विद्वज्जनसभा कथ्यते । तदभावेऽध्यात्मविदेकोऽपि धर्मप्रवक्ता स्यान्नत्वव्रता जातिमात्रोपजीविनः सहस्रसङ्ख्यकाः । तदुक्तं मनुना (१२/१०८-११४) यथा –

'अनाम्नातेषु धर्मेषु कथं स्यादिति चेद्भवेत् ।
यं शिष्टा ब्राह्मणा ब्रूयुः स धर्मः स्यादशङ्कितः ॥
धर्मेणाधिगतो यैस्तु वेदः सपरिबृंहणः ।
ते शिष्टा ब्राह्मणा ज्ञेयाः श्रुतिप्रत्यक्षहेतवः ॥
दशावरा वा परिषद्यं धर्मं परिकल्पयेत् ।
त्र्यवरा वाऽपि वृत्तस्था तं धर्मं न विचालयेत् ॥
त्रैविद्यो हेतुकस्तर्की नैरुक्तो धर्मपाठकः ।
त्रयश्चाश्रमिणः पूर्वे परिषत् स्याद्दशावरा ॥
ऋग्वेदविद्यजुर्विच्च सामवेदविदेव च ।
त्र्यवरा परिषज्ज्ञेया धर्मसंशयनिर्णये ॥
एकोऽपि वेदविद्धर्मं यं व्यवस्येद्द्विजोत्तमः ।
स विज्ञेयः परो धर्मो नाज्ञानामुदितोऽयुतैः ॥
अव्रतानाममन्त्राणां जातिमात्रोपजीविनाम् ।
सहस्रशः समेतानां परिषत्त्वं न विद्यते ॥' इति ।

वीरमित्रोदयकारो (याज्ञ. १/९) मित्रमिश्रो धर्मपाठकं प्रतिपादयति यथा –

'वेदविद्याव्रतस्नातः सत्यसन्धो जितेन्द्रियः ।
अनेकधर्मशास्त्रज्ञः प्रोच्यते धर्मपाठकः ॥' इति ।

याज्ञवल्क्यश्चतुरवरां परिषदं प्रस्तौति । तद्यथा (१/९) –

'चत्वारो वेदधर्मज्ञाः पर्षत् त्रैविद्यमेव वा ।
सा ब्रूते यं स धर्मः स्यादेको वाऽध्यात्मवित्तमः ॥' इति।

वसिष्ठो दशावरां परिषदं प्रतिपादयति । तद्यथा (३/२०) –

'चातुर्विद्यं विकल्पी च अङ्गविद्धर्मपाठकः ।
आश्रमस्थास्त्रयो मुख्याः पर्षदेषा दशावरा ॥' इति ।

गौतमोऽपि (३/१०/४८-५०) प्रतिपादयति यथा –

'अनाज्ञाते दशावरैः शिष्टैरुहविद्भिरलुब्धैः प्रशस्तं कार्यम् ॥
चत्वारश्चतुर्णां पारगा वेदानां प्रागुत्तमात् त्रय आश्रमिणः
पृथग्धर्मविदस्त्रय एतान् दशावरान् परिषदित्याचक्षते ॥
असम्भवे त्वेतेषां श्रोत्रियो वेदविच्छिष्टो विप्रतिपत्तौ यदाह ॥'इति।

एतेन सङ्ख्यान्तरमपि सूचितम् । तथा हि मित्रमिश्रधृतमङ्गिरोवचनम् –

'एकविंशतिसङ्ख्यातैर्मीमांसान्यायपारगैः ।
वेदार्थकुशलैश्चैव परिषत्त्वं प्रकल्पयेत् ॥' इति ।

पराशरोऽप्याह (८/१९-२२, ३५) यथा –

'चत्वारो वा त्रयो वाऽपि वेदवन्तोऽग्निहोत्रिणः ।
ब्राह्मणानां समर्था ये परिषत् सा विधीयते ॥
अनाहिताग्नयो येऽन्ये वेदवेदाङ्गपारगाः ।
पञ्च त्रयो वा धर्मज्ञाः परिषत् सा प्रकीर्त्तिता ॥
मुनीनामात्मविद्यानां द्विजानां यज्ञयाजिनाम् ।
वेदव्रतेषु स्नातानामेकोऽपि परिषद्भवेत् ॥
पञ्च पूर्वं मया प्रोक्तास्तेषां चासम्भवे त्रयः ।
स्ववृत्तिपरितुष्टा ये परिषत् सा प्रकीर्त्तिता ॥

चातुर्विद्यो विकल्पी च अङ्गविद्धर्मपाठकः ।
त्रयश्चाश्रमिणो मुख्याः पर्षदेषा दशावरा ॥' इति ।

परिषत्सदस्यरूपेण श्रोत्रियो ब्राह्मणः स्वीकर्त्तव्यः । ब्राह्मण इति कथनेन श्रुतिपुगसमुपदिष्टो ब्रह्मनिष्ठो बोद्धव्यः । तेषां शिष्टानां ब्राह्मणानामभावे तु धार्मिकः क्षत्रियो वैश्यो वा तत्र नियोजनीयः । मन्वर्थमुक्तावलीधृतं कात्यायनवचनमेवमनुशास्ति । तद्यथा (मनु. ८/२०) –

'यत्र विप्रो न विद्वान् स्यात् क्षत्रियं तत्र योजयेत् ।
वैश्यं वा धर्मशास्त्रज्ञं शूद्रं यत्नेन वर्जयेत् ॥' इति ।

द्विजानामभावे त्वत्र प्रोक्तसद्गुणयुक्तो दशमीमवस्थां गतः शूद्रोऽपि ग्राह्यः ।

परिषदनुशासनग्रहणेनाधर्मविनाश एव सम्भवति । तदुक्तं पराशरेण (८/१७, १८) यथा –

'यथाऽश्मनि स्थितं तोयं मारुतार्केण शुद्ध्यति ।
एवं परिषदादेशान्नाशयेत्तत्र दुष्कृतम् ॥
नैव गच्छति कर्त्तारं नैव गच्छति पर्षदम् ।
मारुतार्कादिसंयोगात्पापं नश्यति तोयवत् ॥' इति ।

अत एव यदुवरा गोपा व्रजस्थाः क्षत्रियवैश्यादयः पुरस्थाश्च परिषत् सभा सेवकरूपा धर्मप्रतिष्ठापने आज्ञावहा यस्य स यदुवरपरिषत् परमात्मा वासुदेवः श्रीकृष्ण इति प्रसिद्धम् ।

स परमात्मा भगवान् इच्छामात्रेण निरसनसमर्थोऽपि क्रीडार्थं स्वैः स्वकीयैर्दोर्भिः – 'भुजबाहू प्रवेष्टो दोः स्यात् ।'

इत्यमर (२/६/८०) वचनात् स्वासङ्ख्यबाहुतुल्यैरनुशासनैर्भक्तजनैरर्जुनादिभिर्वाऽधर्ममस्यन् क्षिपन् उच्छिन्दन् वर्त्तते । भगवतोऽनेकबाहुत्वं स्मर्यते महाभारते अनुशासनपर्वणि (१४९/९५) विष्णुसहस्रनामस्तोत्रे –

'चतुर्मूर्त्तिश्चतुर्बाहुश्चतुर्व्यूहश्चतुर्गतिः ।' इति ।

उक्तञ्च श्रीमद्भगवद्गीतायां विश्वरूपदर्शनयोगे (११/४६) –

'किरीटिनं गदिनं चक्रहस्तमिच्छामि त्वां द्रष्टुमहं तथैव ।
तेनैव रूपेण चतुर्भुजेन सहस्रबाहो भव विश्वमूर्त्ते ! ॥' इति ।

अधर्मसङ्घविनाशाय भगवता अर्जुन उद्बोधितः । तद्यथा तत्रैव (११/३३) –

'तस्मात्त्वमुत्तिष्ठ यशो लभस्व
जित्वा शत्रून् भुङ्क्ष्व राज्यं समृद्धम् ।
मयैवैते निहताः पूर्वमेव
निमित्तमात्रं भव सव्यसाचिन् ! ॥' इति ।

स्थिराः स्थावरा उद्भिदादयः कथ्यन्ते । अविद्यावन्तो मूढा यथाकर्म यथाश्रुतं फलं लभन्ते । तत्र शारीरकर्मदोषेण स्थावरत्वं प्राप्यते । तदुक्तं मनुना यथा (१२/९) –

'शरीरजैः कर्मदोषैर्याति स्थावरतां नरः ।' इति ।

कदाचिन्मानसकर्मदोषेणापि तत्फलं मिलति । तदुक्तं यथा –

'गुरुं हुंकृत्य त्वंकृत्य विप्रं निर्जित्य वादतः ।
श्मशाने जायते वृक्षः कङ्कगृध्रोपसेवितः ॥' इति ।

चरा जङ्गमा मनुष्यादयो भवन्ति । एतेषां स्थावरजङ्गमानां वृजिनम् –

'अस्त्री पङ्कं पुमान् पाप्मा पापं किल्विषकल्मषम् ।
कलुषं वृजिनैनोघमंहो दुरितदुष्कृतम् ॥'

इत्यमर (१/४/२३)वचनात् पापम् । जायमानो ह वै पुरुष इन्द्रियादिरुपपापैः सञ्जायते । इन्द्रियासक्तिरेव तत्र तत्त्वतः पापम् । स परमात्मा पापं विनाशयति । मनुष्यादयः परमेश्वरस्य ध्यानधारणापूजार्चनाद्वारा पापमुक्ता भवन्ति । परमात्मनः सान्निध्यलाभात् स्थावराणां पापनाशो भवतीति ज्ञायते । उदाहरणमत्र श्रीरामावतारेऽहल्योद्धारणम्, यथा वाल्मिकीयरामायणे बालकाण्डे(४९/१६)–

'सा हि गौतमवाक्येन दुर्निरीक्ष्या बभूव ह ।
त्रयाणामपि लोकानां यावद्रामस्य दर्शनम् ।
शापस्यान्तमुपागम्य तेषां दर्शनमागता ॥' इति ।

उक्तञ्च ब्रह्मवैवर्त्तपुराणे श्रीकृष्णजन्मखण्डे (६२/६-८) –

'दृष्ट्वा पाषाणरूपां च रामो वर्त्मनि कामिनीम् ।
विश्वामित्रं च प्रपच्छ कारणं जगदीश्वरः ॥
रामस्य वचनं श्रुत्वा विश्वामित्रो महातपाः ।

उवाच तत्र धर्मिष्ठो रहस्यं सर्वमेव च ॥
कारणं तन्मुखाच्छ्रुत्वा रामो भुवनपावनः ।
पस्पर्श पादाङ्गुलिना सा बभूव च पद्मिनी ॥' इति ।

श्रीकृष्णावतारे भगवता नलकूबरमणिग्रीवनामकयोः यमलार्जुनयोर्मोचनं कृतम्। तद्यथा श्रीमद्भागवते दशमस्कन्धे (१०/२४, २६-२८) –

'ऋषेर्भागवतमुख्यस्य सत्यं कर्तुं वचो हरिः ।
जगाम शनकैस्तत्र यत्रास्तां यमलार्जुनौ ॥
इत्यन्तरेणार्जुनयोः कृष्णस्तु यमयोर्ययौ ।
आत्मनिर्वेशमात्रेण तिर्यग्गतमुलूखलम् ॥
बालेन निष्कर्षयतान्वगुलूखलं तद्-
दामोदरेण तरसोत्कलिताङ्घ्रिबन्धौ ।
निष्पेततुः परमविक्रमितातिवेप-
स्कन्धप्रवालविटपौ कृतचण्डशब्दौ ॥
तत्र श्रिया परमया ककुभः स्फुरन्तौ
सिद्धावुपेत्य कुजयोरिव जातवेदाः ।
कृष्णं प्रणम्य शिरसाऽखिललोकनाथं
बद्धाञ्जली विरजसाविदमूचतुः स्म ॥' इति ।

इत्थम्भूतो विशेषतो गोलोकवृन्दावनस्थानां सर्वेषां स्थावरजङ्गमानां संसारदुःखहन्ता स भगवान् विद्यते । अपि च स्थिरात्मकं चरात्मकं च यद्वृजिनं तस्य यथाकालं विनाशकारी भगवान् भवति । कर्त्तर्येव फलदायकं स्वल्पं पापं स्थिरात्मकं भवति । पापं चरात्मकं भवति तदा यदा तत् बहु सञ्चरितं च जायते । उदाहरणं यथोक्तं मनुना (८/३१७) –

'अन्नादे भ्रूणहा मार्ष्टि पत्यौ भार्याऽपचारिणी ।
गुरौ शिष्यश्च याज्यश्च स्तेनो राजनि किल्विषम् ॥' इति ।

संसर्गजा दोषगुणा भवन्तीति स्मृतेः साक्षात्पापकृद्भिः सह संसर्गात् पापं सञ्चरतीति मनुनोक्तं महापातकनिर्णये । तद्यथा (११/५४) –

'ब्रह्महत्या सुरापानं स्तेयं गुर्वङ्गनागमः ।
महान्ति पातकान्याहुः संसर्गश्चापि तैः सह ॥' इति ।

संसर्गात् सञ्चरितं पापमपि कालापेक्ष्यं भवति । तदुक्तं मनुना (११/१८०) –

'सम्वत्सरेण पतति पतितेन सहाचरन् ।
याजनाध्यापनाद्यौनान्न तु यानासनाशनात् ॥' इति ।

यानासनाशनमाध्यमेन सद्यः पतनं भवति । एतानि सर्वाणि दुरितानि प्रायश्चित्तैः क्षीयन्ते । प्रायश्चित्तं च निरुक्तमङ्गिरसा (उत्त. ४/१) यथा –

'प्रायो नाम तपः प्रोक्तं चित्तं निश्चय उच्यते ।
तपो निश्चयसंयुक्तं प्रायश्चित्तमिति स्मृतम् ॥' इति ।

तपोनिश्चय इति कथनेनात्र भगवतः श्रीकृष्णस्य मननिदिध्यासनादीनां साधनानामाचरणं बोद्धव्यम् । अत एवोक्तं विष्णुपुराणे(२/६/३७, ४३) –

'प्रायश्चित्तान्यशेषाणि तपःकर्मात्मकानि वै ।
यानि तेषामशेषाणां कृष्णानुस्मरणं परम् ॥
तस्मादहर्निशं विष्णुं संस्मरन् पुरुषो मुने ! ।
न याति नरकं शुद्धः सङ्क्षीणाखिलपातकः ॥' इति ।

अनेन भावेन अशेषकल्याणगुणैकराशेः भगवतः परब्रह्मणः श्रीकृष्णस्य स्थिरचरवृजिनघ्नत्वं जातमेव ।

परमात्मा भगवान् श्रीकृष्णः सुस्मितश्रीमुखेन सुष्ठु स्मितं दरहसितं श्रीयुक्तं सुशोभितं मुखं यत् तेन व्रजपुरस्य गोपपुरस्य वनितानां

'स्त्री योषिदबला योषा नारी सीमन्तिनी वधूः ।
प्रतीपदर्शिनी वामा वनिता महिला तथा ॥'

इत्यमर(२/६/२)वचनात् सुन्दरीणां कामदेवं कामे दीव्यतीति कामदेवः 'कर्त्तुर्दृष्टान्तात् क्रियाया ग्रहणमि'तिसिद्धान्तात् कामभावस्तं मन्मथभावं वर्द्धयन् उत्पादयन् वा जयति अथवा कामश्चासौ दीव्यति विजिगीषति संसारमिति कामदेवस्तं भोगद्वारा मोक्षप्रदोऽयं सर्वोत्कर्षेण विद्यत इति भावः । व्रजपुरवनितानां कामभाव उपन्यस्तः श्रीमद्भागवते (१०/३०/२-३) यथा –

'गत्यानुरागस्मितविभ्रमेक्षितै-
र्मनोरमालापविहारविभ्रमैः ।

आक्षिप्तचित्ताः प्रमदा रमापते-
स्तास्ता विचेष्टा जगृहुस्तदात्मिकाः ॥
गतिस्मितप्रेक्षणभाषणादिषु
प्रियाः प्रियस्य प्रतिरुढमूर्त्तयः ।
असावहं त्वित्यबलास्तदात्मिका
न्यवेदिषुः कृष्णविहारविभ्रमाः ॥' इति ।

काम एव कामना । सा च भोक्तृजीवमनसश्चेष्टारूपा । अकामस्य क्रियाभावकारणात् काम एव आद्रियते । स च कामः अज्ञानतमोविनाशानुकूलो भवेच्चेत् नूनं साधुफलमेव । तदुक्तं विष्णुपुराणे –

'मन एव मनुष्याणां कारणं बन्धमोक्षयोः ।
बन्धाय विषयासङ्गि मुक्त्यै निर्विषयं मनः ॥' इति ।

परब्रह्मणः सान्निध्यलाभाय धर्माविरुद्धः कामो युज्यते । अतो व्रजवनिताभिः सह भगवतः सर्वेश्वरस्य श्रीकृष्णस्य जागतिकलीलेयं निवृत्तिधर्मपरका । श्रीधरस्वामिपादैः श्रीमद्भागवतभावार्थदीपिकायां स्फुटीकृतमेतत् । तद्यथा (१०/२९/१) –

'ननु विपरीतमिदम्, परदारविनोदेन कन्दर्पजेतृत्वप्रतीतेः । मैवम् । योगमायामुपाश्रितः (१०/२९/१), आत्मारामोऽप्यरीरमत् (१०/२९/४२), साक्षन्मन्मथमन्मथः (१०/३२/२), आत्मन्यवरुद्धसौरत (१०/३३/२६) इत्यादिषु स्वातन्त्र्याभिधानात् । तस्माद्रासक्रीडाविडम्बनं कामविजय-ख्यापनायेत्येव तत्त्वम् ।' इति ।

पुरा त्रेतायुगे दण्डकारण्यवासिनः ऋषयः श्रीगोपालोपासका आसन् । पितृसत्यपालनावसरे दण्डकारण्यमागतस्य श्रीरामचन्द्रस्य परमसुन्दर-विग्रहावलोकनेन मुग्धास्ते तं भोक्तुमैच्छन् । श्रीसर्वेश्वररमणार्थमाकाङ्क्षितं तेषां मनोभावं पूरयितुं भगवान् श्रीरामः तेभ्यो वरं दत्तवान् । फलतस्ताः द्वापरयुगे श्रीकृष्णप्रेममग्ना गोपाङ्गना जाताः । प्रतिपादितमेतत् पद्मपुराणे यथा –

'पुरा महर्षयः सर्वे दण्डकारण्यवासिनः ।
रामं दृष्ट्वा हरिं तत्र भोक्तुमैच्छन् सुविग्रहम् ॥

ते सर्वे स्त्रीत्वमापन्नाः समुद्भूताश्च गोकुले ।
हरिं सम्प्राप्य कामेन ततो मुक्ता भवार्णवात् ॥' इति ।

एवं सर्वेश्वरो भगवान् श्रीकृष्णः सर्वोत्कर्षेण जयति विराजत इति भावः । परब्रह्मणः सुमहत्त्वमुक्तं पूर्वाचार्यैः श्रीकृष्णस्तवराजे –

'किञ्च किञ्चिदिह विद्यते नहि त्वां विनाऽण्वपि तथाऽखिलेश्वर ।
नेति नेति च निषेधिताश्रयस्तद्विशेषविषयोऽपि सम्मतः ॥' इति ।

सर्वमेतदभिलक्ष्य भगवान् मनुः(१२/१२२) उपदिशति –

'प्रशासितारं सर्वेषामणीयांसमणोरपि ।
रुक्माभं स्वप्नधीगम्यं विद्यात्तं पुरुषं परम् ॥' इति ।

'सर्वं खल्विदं ब्रह्म, अयमात्मा ब्रह्म, तत्त्वमसि, तदेतत्पदनीयमस्य सर्वस्य यदयं आत्मा' चेत्यादिश्रुतिपुंगः पुंगलमहत्त्वज्ञापनपरको ब्रह्मज्ञाने प्रवृत्तिजागरणाय च नित्यं वरीवर्त्ति ।

कर्मफलस्य सान्तत्वसातिशयत्वनिश्चयः, 'तद्यथेह कर्मचितो लोकः क्षीयत एवमेवामुत्र पुण्यचितो लोकः' इति श्रुतेः, 'आब्रह्मभुवनाल्लोका पुनरावर्तिनोऽर्जुन !' इति स्मृतेश्च । ब्रह्मज्ञानस्य तु निरतिशयानन्तफलकत्व-निश्चयः, 'तमेव विदित्वातिमृत्युमेति नान्यः पन्था विद्यतेऽयनाय, यस्तमात्मानम् अनुविद्य विजानाति स सर्वांश्च लोकानाप्नोति सर्वांश्च कामान्, ज्ञानवान् मां प्रपद्यते' इत्यादिश्रुतिस्मृतिभ्यः । 'यो वा एतदक्षरं गार्ग्यविदित्वाऽस्माल्लोकात् प्रैति स कृपणः(बृहदा. ३/८/१०), 'असुर्या नाम ते लोका अन्धेन तमसावृताः । तांस्ते प्रेत्याभिगच्छन्ति ये के चात्महनो जनाः (ईश. ३) चेत्यादिमन्त्रवर्णेभ्यः अनात्मविदः कृपणत्व-आत्मघ्नत्वादियोगनिन्दाश्रवणात् ब्रह्म एव जिज्ञास्यम् । स च जगज्जन्मादिहेतुर्जगदभिन्नाभिन्नः सर्ववेदैकवेद्यः समस्तकल्याणगुणार्णवः स्वभावतोपास्तसमस्तदोषः परब्रह्मजगन्नाथनारायणवासुदेवमुकुन्दादि-शब्दाभिधेयः सर्वेश्वरः श्रीकृष्ण इति निरूपितम् । अतस्तत्प्राप्त्युपायभूतसाधनानि विधीयन्ते । तानि च कर्म-ज्ञान-भक्ति-प्रपत्ति-गुर्वाज्ञानोवृत्तियोगभेदात् पञ्चविधानि । कर्मयोग नाम सदाचारसेवनम् । ज्ञानयोगः शास्त्रज्ञानाहरणम् । भक्तियोगो नामाहरहो जपादिना ईश्वरानुचिन्तनम् । प्रपत्तिः शरणागतिः ।

गुर्वाज्ञानवृत्तिः श्रोत्रियस्य ब्रह्मनिष्ठस्य गुरोराज्ञानुपालनम् । एतद्द्वयं विवृतं वेदान्तरत्नमञ्जूषाकारैः (श्लोक ८) श्रीपुरुषोत्तमाचार्यपादैर्यथा – 'प्रपत्तियोगो नाम शास्त्रोक्तज्ञानादिसर्वसाधनेषु स्वस्यासामर्थ्यमाकलय्य सदाचारोपदिष्टमार्गेण करुणावरुणालये रमाकान्ते भगवति श्रीवासुदेवे आत्मभारनिक्षेपणरूपः । गुर्वाज्ञानवृत्तियोगो नाम प्रपत्तेरङ्गानामपि कालादिप्रतिबन्धकबाहुल्येनानुष्ठाना-द्यसक्तेरसम्भवम् आत्मनि विचार्य श्रीगुरुमेव मोक्षाद्युपायं फलं च मत्वा तच्चरणारविन्दयोः सर्वात्मभावेनात्मभारं समर्प्याज्ञबालवत् तदुक्तमात्राचरणम् ।' इति । प्रपत्तिस्तु 'आनुकूल्यस्य संकल्प' इत्यादिस्मृतेः षड्विधा । अत्र प्रपत्तियोगो गुर्वाज्ञानुवृत्तियोगश्चेति द्वौ मुख्यभूतावित्यहं प्रत्येमि । कर्मज्ञानभक्तियोगाश्च गौणरूपेणावतिष्ठन्त इति । वासुदेवः सर्वमितिज्ञानं प्रपत्तिरूपम् । कर्म ज्ञानं भक्तिश्चेति त्रितयं प्रपत्तिं प्रति साधनम् । एवं साधनेष्वपि मुख्यामुख्यविवेकः कर्त्तव्यः । परिशेषे इदमेव वक्तुं युज्यते यत् आत्महन्ता मा भवेयमिति मनसि निधाय प्रस्तुतपद्यमिदं मङ्गलाचरणरूपेण उच्चारितम् ।

अत्र छन्दो मालिनी । तल्लक्षणं यथा –

'ननमयययुतेयं मालिनी भोगिलोके ।'

इति वृत्तरत्नाकरे (३/८४) केदारभट्टः । प्रेमभक्तिपरिपूरितं हृदयं कुसुमसमं कोमलम् । कुसुमानां माला यथा मनोहारिणी तथैव छन्दसां मध्ये मालिनी । वैष्णवैः प्रेमभक्ती कोमलरसत्वेन मते । तदर्थं कोमलच्छन्दत्वेनात्र ग्रन्थारम्भे मालिनी मता ।

अत्र प्रेयोगुणः । 'प्रेयः प्रियतराख्यानं चाटूक्तौ यद् विधीयते ।' इति प्रतापरुद्रीये गुणप्रकरणे विद्यानाथोक्तेः । अयमेव प्रेयोऽलङ्कारो भावालङ्कारो वेति वदन्ति । अत्र च माधुर्यमपि गुणः, 'पृथक्पदत्वं माधुर्यमि'ति विद्यानाथोक्तेः । अत्र प्रसादोऽपि गुणः, 'प्रसिद्धार्थपदत्वं प्रसादः' इति तस्यैव वचनात् । 'शब्दार्थयोः स्वच्छता प्रसादः' इति ध्वन्यालोके आनन्दवर्द्धनः ।

'प्रसादे सर्वदुःखानां हानिरस्योपजायते ।
प्रसन्नचेतसो ह्याशु बुद्धिः पर्यवतिष्ठते ॥'

इति भगवद्गीतायां (२/६५) श्रीमुखोक्तिः ।

अत्र वैदर्भीरीतिः । 'ललितवर्णसन्धिसमासानां प्रयोगे वैदर्भीरीतिरि'ति जन्मजातवेदान्तिनो हिमांशुपादाः । उक्तञ्च प्रतापरुद्रीये काव्यप्रकरणे –

'बन्धपारुष्यरहिता शब्दकाठिन्यवर्जिता ।
नातिदीर्घसमासा च वैदर्भीरीतिरिष्यते ॥' इति ।

'कोमलसन्दर्भा वैदर्भी' इति सारस्वतप्रक्रियाधुरिणः कैलासपतित्रिपाठिनः ।

अत्र 'न'कारस्य बहुवारमावृत्तौ वृत्त्यनुप्रासः । एवञ्च 'ज'कारस्य, तथा च 'य'कारस्य । वृत्त्यनुप्रासलक्षणं यथा साहित्यदर्पणे (१०/५) –

'अनेकस्यैकधा साम्यमसकृद्वाप्यनेकधा ।
एकस्य सकृदप्येव वृत्त्यनुप्रास उच्यते ॥' इति ।

वृत्तिश्चात्र कैशिकी । सा च शृङ्गारे । सोऽपि माधुर्यमिति वैष्णवानां मते ।

अत्र सर्वेश्वरश्रीकृष्णविषया रतिर्ध्वन्यते,

'स्थायीभावो रतिः श्यामवर्णोऽयं विष्णुदैवतः ।'

इति साहित्यदर्पणोक्तेः (३/१८९) । स्थेयान् प्रयत्नरूप उत्साहोऽपि । भगवतः सौन्दर्यातिशयत्वञ्च । अतोऽत्र भावध्वनिः । माधुर्यप्रसादयोर्मेलनात् नरसिंहवज्जीवनयात्रा सफलीभवतीति ग्रन्थकारस्य आशयः ।

'विभानुभावसञ्चारिसंयोगाद्रसनिष्पत्तिरि'ति भरतसूत्रं नाट्यशास्त्रे । उत्पत्तिः अनुमितिः भुक्तिः अभिव्यक्तिश्चेति निष्पत्तिपदस्यार्थः । चर्वणा इति सर्वेषां मते निष्पत्तिपदस्यार्थः । रसचर्वणा तु प्राक्तनपुण्यशालिनामेव भवति । तदुक्तं –

'पाठ्यादथ ध्रुवागानात्ततः सम्पूरिते रसे ।
तदास्वादभरैकाग्रो हृष्यत्यन्तर्मुखः क्षणम् ॥
ततो निर्विषयस्यस्य स्वरूपावस्थितो निजः ।
व्यज्यते ह्लादनिष्पन्दो येन तृप्यन्ति योगिनः ॥'

इति व्यक्तिविवेके रसप्रकरणे । विभावो रसः, अनुभावोऽपि रसः, व्यभिचारिभावोऽपि रसः, सात्त्विकभावश्चापि रसः । एतेषां सङ्करेऽपि रसः । रसनात् रस इति व्युत्पत्तेर्विभावादीनां सर्वेषां रसत्वम् । अस्मिन् पद्ये भगवान् श्रीकृष्ण आलम्बनोद्दीपनभेदेन द्विधा भवति । तं विलोक्य नायिकानिष्ठा रतिर्जायते । रतिश्च अनादिवासनारूपा संस्कारनामधेया । सा च विभावादिकं

तत्र तावदेकदा यमुनां गन्तुकामा राधा रामाः समाहूतवती –

प्राप्य उन्मिषति । यथा बालकः स्वोत्साहं स्वदते तथैव नायिकाऽत्र स्वरतिं प्राक्तनकालीनां सूक्ष्मरूपेण हृदयेऽन्तर्लीनामास्वादयति । यदुक्तम् –

'क्रीडतां मृण्मयैर्यद्वद्बालानां द्विरदादिभिः ।
स्वोत्साहं स्वदते तद्वच्छ्रोतॄणामर्जुनादिभिः ॥
शब्दोपहितरूपांस्तान् बुद्धेर्विषयतां गतान् ।
प्रत्यक्षानिव कंसादीन् साधनत्वेन मन्यते ॥'

इति वाक्यपदीये (३/७/५) । काव्यनिष्ठा रतिस्त्वत्र परदेवता श्रीकृष्णविषया भवति । 'जयति जननिवास' इत्यत्र कविकर्म, ब्रह्म सर्वत्र व्यापकमिति ज्ञानं, तस्मिन्निष्ठा भक्तिः, तस्मै सर्वथा समर्पणं प्रपत्तिः, सर्वदेवमयस्य गुरोरादेशानुसारेण व्यवहर्तव्यश्चेति भगवत्प्राप्त्युपायभूतपञ्चनिकायशास्त्रमिदं श्रीनिम्बार्काचार्यचारितम् ॥ १ ॥

तत्र तावदिति वाक्यालङ्कारे । यमुना यमराजस्य भगिनी । 'यम – उपरमे' इति धातोः 'अर्जीयमिशीङ्भ्यश्च' इति सूत्रेण उनन् – टाप्प्रत्ययाभ्यां यमुना निष्पद्यते । एषा नदीरूपा । सा च लीलावतारिणः श्रीकृष्णस्य लीलाशक्तिष्वन्यतमा कृष्णप्रियाधिकासु मूर्द्धन्यभूता । यमुना इति उद्दीपनविभावरूपम् । तत्र गमनम् अभिसरणम् । अभिसारानुकूलस्थानान्युक्तानि विश्वनाथेन साहित्यदर्पणे (३/९४) –

'क्षेत्रं वाटी भग्नदेवालयो दूतीगृहं वनम् ।
मालामञ्चं श्मशानञ्च नद्यादीनां तटी तथा ॥
एवं कृताभिसाराणां पुंश्चलीनां विनोदने ।
स्थानान्यष्टौ तथा ध्वान्तच्छन्नेषु क्वचिदाश्रयः ॥' इति ।

रमयन्ति पुरुषानिति रामा रमणीया मनोरमाः सौन्दर्यवत्यः सुन्दर्यो वा । तासां शोभका धर्मा विश्वनाथेन प्रोक्ताः । तद्यथा साहित्यदर्पणे (३/१०३) –

'अलङ्कारास्तत्र भावहावहेलास्त्रयोऽङ्गजाः ।
शोभा कान्तिश्च दीप्तिश्च माधुर्यञ्च प्रगल्भता ॥
औदार्यं धैर्यमित्येते सप्तैव स्युरयत्नजाः ।

लीलाविलासौ विच्छित्तिर्विव्वोकः किलकिञ्चितम् ॥
मोट्टायितं कुट्टमितं विभ्रमो ललितं मदः ।
विहृतं तपनं मौग्ध्यं विक्षेपश्च कुतुहलम् ॥
हसितं चकितं केलिरित्यष्टादशसंख्यका: ।
स्वभावजाश्च ×× ×× ×× ×× ॥' इति ।

समाहूतवती इत्यत्र राधा कर्त्री । रामा इति कर्म । समाह्वानं क्रिया । राधा इति वैदिकप्रयुक्तशब्दः । स च ऋग्वेदे प्रथममण्डले श्रूयते । भगवतः परब्रह्मणः शक्तिस्त्रिविधा – अन्तरङ्गा, तटस्था, बहिरङ्गा च । अन्तरङ्गा पुनस्त्रिविधा – सन्धिनी, संवित्, ह्लादिनी च । तटस्था जीवशक्तिः । बहिरङ्गा माया पृष्ठभागस्था शक्तिः । राधा हि ह्लादिनीशक्तिः । जगज्जननकार्यराधनार्थमेषा कारणम्, 'राध = साध = संसिद्धौ' इत्यक्तेः । राधा एव जगन्माता । तदुक्तं नारदपञ्चरात्रे (२/६/७,२५) –

'श्रीकृष्णो जगतां तातो जगन्माता च राधिका ।
सृष्टिकाले च सा देवी मूलप्रकृतिरीश्वरी ।
माता भवेन्महाविष्णोः स एव च महान् विराट् ॥' इति ।

बृहद्गौतमीयतन्त्रानुसारमेषा कृष्णमयी सर्वलक्ष्मीमयी सर्वकान्तिः परा सम्मोहिनी महाभावस्वरूपा परदेवता । ऐश्वर्याधिष्ठात्री इयं महादेवी –

'रासे सम्भूय गोलोके सा दधाव हरेः पुरः ।
तेन राधा समाख्याता पुराविद्भिर्द्विजोत्तम ॥'

इति ब्रह्मवैवर्त्तपुराणब्रह्मखण्ड(५/२६)सौतिवचनात् लीलावतारिणः श्रीकृष्णस्य प्राणवल्लभा । गोलोके श्रीकृष्णराससङ्गिनी इयं श्रीराधा । तदुक्तं जयदेवेन गीतगोविन्दे –

'रासे हरिमिह विहितविलासं स्मरति मनो मम कृतपरिहासम् ।' इति।

श्रीराधा शब्दब्रह्मप्रवर्त्तिका । शब्दब्रह्मणि निष्ठायां जातायां हि परब्रह्मोपलब्धिः,

'द्वे ब्रह्मणी वेदितव्ये शब्दब्रह्म परश्च यत् ।
शब्दब्रह्मणि निष्णातः परं ब्रह्माधिगच्छति ॥'

इति त्रिपुरतापिनीश्रुतेः (५/१७) । व्याकरणशास्त्रागमयोर्मते शब्दब्रह्मैव सृष्टिकारणम् । श्रीराधाचरणकमलविराजितनूपुरजनितकलरवः शब्दब्रह्म । अतो राधा श्रुतेरधिष्ठात्रीदेवी । तदेव शब्दब्रह्म हि सर्वश्रेष्ठमुदात्ततत्त्वम् । तदुक्तं –

'श्रीराधापदकमल तें नूपुर कलरव होय ।
निर्विकार व्यापक भयों शब्दब्रह्म कहि सोय ॥' इति ।

श्रीराधा पृथुप्रेम्णा माधुर्यवैदग्ध्यादिपराकाष्ठाप्राप्ता ।

श्रीराधाविर्भावप्रसङ्गे ब्रह्मवैवर्त्तपुराणस्य कथेयमतीववैशिष्ट्यपूर्णा । तद्यथा श्रीकृष्णजन्मखण्डे (२/५-८, १३-१५) –

'श्रीदाम्नः कलहश्चैव बभूव राधया सह ।
श्रीदामा शङ्खचूडश्च शापात्तस्या बभूव ह ॥
राधां शशाप श्रीदामा याहि योनिं च मानवीम् ।
व्रजे व्रजाङ्गना भूत्वा विचरस्व महीतले ।
भीता श्रीदामशापात् सा श्रीकृष्णं समुवाच ह ॥
गोपीरूपा भविष्यामि श्रीदामा मां शशाप ह ॥
कमुपायं करिष्यामि वद मां भयभञ्जन ।
त्वया विना कथमहं धरिष्यामि स्वजीवनम् ॥

××××× ××××× ×××××

कृष्णस्तद्वचनं श्रुत्वा बोधयामास सुन्दरीम् ।
वक्षसि प्रेयसीं कृत्वा चकार निर्भयां च ताम् ॥
महीतलं गमिष्यामि वाराहे च वरानने ।
मया सार्धं भूगमनं जन्म तेऽपि निरूपितम् ॥
व्रजं गत्वा व्रजे देवि विहरिष्यामि कानने ।
मम प्राणाधिका त्वं च भयं किं ते मयि स्थिते ॥' इति ।

सा राधानाम्नी गोपाङ्गना रामाः 'सुन्दरी रमणी रामा ।' इति अमर (२/६/४) वचनात् रमणीयाः गोपाङ्गनाः गोपसुन्दरीः समाहूतवती । किमर्थं तदाह्वानम् ?

'प्रयोजनमनुद्दिश्य न मन्दोऽपि प्रवर्त्तते ।'

इत्यभियुक्तवचननात् सति साधारणप्रयोजने जलरूपामृताहरणच्छलेन जलक्रीडा विशिष्टप्रयोजनमत्रेति ज्ञातव्यम् । विशेषविवेचन्तु 'द्वैताद्वैतवेदान्ते श्रीराधा',

'राधारसश्चे'ति प्रबन्धद्वये द्रष्टव्यं विपश्चिद्भिः ।

अकामो निष्कामो निर्गुणो जननिवासो बहु भवितुम् अकामयत् । अनेन क्रमेण सृष्टिर्जाता । तदुक्तं छान्दोग्यश्रुतौ (६/३/२,३) –

'सेयं देवतैक्षत हन्ताहमिमास्तिस्रो देवता अनेन जीवेनात्मनानुप्रविश्य नामरूपे व्याकरवाणीति ॥ तासां त्रिवृतं त्रिवृतमेकैकां करवाणीति सेयं देवतेमास्तिस्रो देवता अनेनैव जीवेनात्मनानुप्रविश्य नामरूपे व्याकरोत् ॥' इति। तत् सृष्ट्वा तदेवानुप्रविष्टः पुरुषोत्तमो 'जक्षन् क्रीडन् रममाणः' विराजत इत्यपि तत्रैव (८/१२/३) श्रूयते । समाहूता रामाः परब्रह्मणः श्रीकृष्णस्य कृते श्रीराधानुसारिण्यो लीलासङ्गिन्यः । अत एव श्रीराधा प्रमुखा । परोढा व्रजदेव्य एताः शोभासाद्गुण्यवैभवैः सकलकलाललामभूताः । एताश्च त्रिधा – साधनपरा, देवी, नित्यप्रिया चेति भेदात् । साधनपरा द्विविधा – यौथिकी, अयौथिकी च । यौथिकी चापि द्विविधा – मुनिचरी, श्रुतिचरी च । परब्रह्मणः कृपाकटाक्षकारणात् लीलाविहारोत्सुकाः मुग्धाः दण्डकारण्यवासिनो मुनयः परवर्त्तिनि द्वापरयुगे व्रजभूखण्डे गोपीरूपेण आविर्भूता । एता मुनिचरीसंज्ञका भवन्ति । बृहद्वामनपुराण-पद्मपुराणयोर्मते प्रतीयते यत् – श्रुतिगणो गोपीनामसमोर्ध्वसौभाग्यं वीक्ष्य सश्रद्धं तपश्चरित्वा व्रजे प्रेमसम्पद्युक्तगोपीरूपेण अवतीर्णाः । एता गोप्यः श्रुतिचरीसंज्ञका भवन्ति ।

व्रजे गोपीरूपेण जाता देवकन्या देवीसंज्ञका भवन्ति ।

व्रजे च नित्यप्रिया नित्यसिद्धा अनुत्तमा गोपी भवति श्रीराधा । श्रीनिम्बार्कसम्प्रदायदर्शने श्रीराधा श्रीकृष्णस्य स्वकीया नायिका भवति । ब्रह्मवैवर्त्तपुराण-गर्गसंहितादिषु तथ्यमिदमुपन्यस्तम् । परोढा गोप्योऽपि भगवतः श्रीकृष्णस्य कान्ता विद्यन्ते । यद्यपि –

'परोढां वर्जयित्वाऽत्र वेश्याञ्चाननुरागिणीम् ।
आलम्बनं नायिकाः स्युर्दक्षिणाद्याश्च नायकाः ॥'

इति विश्वनाथेन साहित्यदर्पणे (३/१८९) प्रोक्तं तथापि गोपीनां कान्तास्वरूपसन्देहस्य अवकाशो नास्ति । अन्ततोगत्वा इदमेव वक्तुं युज्यते यत् इयं श्रीराधा महाभावस्वरूपा मञ्जुलवञ्जुलपुञ्जे कुञ्जे घनाङ्गसंलीना

कर्पूरमञ्जरि ! कलावति ! चन्द्ररेखे !
मुग्धानने ! सुमुखि ! सुन्दरि ! कम्बुकण्ठि ! ।
आगच्छताम्बुहरणाय गृहीतकुम्भाः
सम्भूय मन्दपवनां यमुनां व्रजामः ॥ २ ॥

तडिदम्वरशोभिता सततं बाधां तिरयति ।

राधा मनोरमाः क्रीडाशीलाः संवेदनावतीः सम्यक् प्रेम्णा आह्वयति आमन्त्रयति इत्यर्थः । सौन्दर्यशीलानां मध्ये ताश्च भवन्ति 'कर्पूरमञ्जरी' इत्यादयः । हे सङ्गिन्यः ! भवत्यो गृहीतकुम्भाः,

'कुम्भो वेश्यापतौ घटे ।'

इति हैम (२/३१०) वचनात् घटा गृहीता याभिस्ता अम्बुहरणाय

'अम्भोऽर्णस्तोयपानीयनीरक्षीराम्बुशंवरम् ।'

इत्यमर (१/९/४) वचनाज्जलाहरणाय सम्भूय सर्वाभिः सम्मील्य मन्दपवनां मन्दं मन्दं यत्र पवनो वहति तामनुकूलभूमिं यमुनां यमुनानदीं व्रजामः । यस्यास्तीरे

'धीरसमीरे यमुनातीरे वसति वने वनमाली ।'

इति गीतगोविन्दकारजयदेवोक्तवचनानुसारं लीलामयचरित्रः श्रीकृष्णचन्द्रभगवान् विद्यते, तत्र व्रजामः गच्छाम इति भावः ।

कपूरमञ्जरी कर्पूरकलिका इव गौराङ्गी । अत्र शीतलता व्यज्यते । अव्यक्तस्वरा गानशीला कलावती । आह्लादकारिणी चन्द्ररेखा । मुग्धानना प्रणयोन्मत्ता । कम्बुकण्ठी सौभाग्यसूचिका । सुमुखी सुन्दरी चेत्यत्र समृद्धिः,

'यस्यां मनश्चक्षुषोर्निर्बन्धस्तस्यामृद्धिः ।'

इति आपस्तम्ब-वात्स्यायनयोर्विवृतिः । एवं गूढार्थपदसकलमेतत् ।

अत्र छन्दो वसन्ततिलका । एतल्लक्षणं यथा –

'उक्ता वसन्ततिलका तभजा जगौ गः ।'

इति केदारभट्टो वृत्तरत्नाकरे (७९) । अत्र पृथक्पदत्वं माधुर्यं चकास्ति । अत्र 'क'कारावृत्तौ वृत्त्यनुप्रासः । परिकराङ्कुरः अलङ्कारः । यदुक्तं –

'साभिप्राये विशेष्ये तु भवेत्परिकराङ्कुरः ।'

इति कुवलयानन्दलक्षणात् (६३) । रीतिश्चात्रापि वैदर्भी । वृत्तिः पूर्ववत् ।

एतन्निशम्य वचनं मृगलोचनाया
दूरे विहाय गृहकर्म गृहीतकुम्भाः ।
दामोदराननविलोकनलोलचित्ता
गोप्यो जलाय चलिता ललिताङ्घ्रिपाताः ॥ ३ ॥

अत्र वात्सल्यध्वनिः । 'मुग्धानने' इत्यत्र लक्षणा । 'कम्बुकण्ठि' इत्यत्र उपमा । 'मन्दपवनामि'त्यत्र उद्दीपनविभावः । यः रतिमुद्दीपयति स उद्दीपनविभावः । यथाऽत्र मन्दपवनः । एवं यमुनाऽपि रतिमुद्दीपयति एकान्तरहःस्थानत्वात् । व्रजेशमधिकृत्य अत्र व्रजाम इति पदप्रयोगः ॥ २ ॥

मृगलोचनाया मृगः हरिणः तद्वच्चञ्चले लोचने

'लोचनं नयनं नेत्रमीक्षणं चक्षुरक्षिणी ।'

इत्यमर (२/६/९३)वचनान्नयने यस्यास्तस्या राधाया एवंप्रकारकमाह्वानमूलक-वचनं निशम्य श्रुत्वा ज्ञात्वा गोप्यो 'गुपु-रक्षणे' इति धातोः अचि घञि गोपः । स्त्रियाञ्च गोपी । ऋग्वेदे प्रथममण्डले रक्षकार्थे गोपशब्दः दृश्यते । यथा –

'राजन्तमध्वराणां गोपामृतस्य दीदिवम् । वर्द्धमानं स्वे दमे ॥' इति ।

यथा वा रघुवंशे – 'शालि-गोप्यो जगुर्यशः' इति । यः सर्वसमर्थः स एव रक्षकः, या च सर्वसमर्था सा एव गोपी गोपिका वा भवितुमर्हति । भगवान् जगद्रक्षकः । तस्य भक्तोऽपि जगद्रक्षकः । अतः स गोपपदेन उच्यते । शमदमयुक्तो गोपः । शमदमयुक्ता च गोपी । शमदमरहितो न कोऽपि सर्वसमर्थो भवितुमर्हति । सर्वसामर्थ्यास्याभावे जगद्रक्षकत्वमसम्भवम् । एवं प्रकारेण या जगद्रक्षिका भक्ता वा सा अपि गोपीपदेन व्यपदिश्यते । 'एकाकी न रमते बुधः' इति नयेन भगवान् गोपैः रक्षकैः गोपीभिश्च रक्षिकाभिश्च सह लीलां कृतवान् इति ज्ञायते । अत एव 'सोऽकामयत बहु स्यां प्रजायेय' इति श्रुतिवचनं सङ्गच्छते । भगवतः स्वरूपा एव गोपाः गोप्यश्च इति धर्तव्यम् अथवा स्वयं विचार्यम् । ताः गोप्यः –

'गोपे गोपालगोसंख्यगोधुगाभीरवल्लजाः ।'

इत्यमर(२/९/५७)वचनात् ।

'क्षत्रियाच्छूद्रकन्यायां समुत्पन्नस्तु यः सुतः ।

स गोपाल इति ख्यात ×× ×× ×× ॥'

इति पराशरस्मृति(११/२४)वचनाच्च गोपालानां स्त्रियो गोपालरमण्यो गृहकर्म

'न गृहं गृहमित्याहुर्गृहिणी गृहमुच्यते ।'

इति प्रजापतिस्मृति(श्लो.५५)वचनानाधारेण गृहिणीरूपेण यथाकालं स्वस्वगृहे यद्यदुचितं कर्म यथा साधारणतः --

'सदा प्रहृष्टया भाव्यं गृहकार्येषु दक्षया ।
सुसंस्कृतोपस्करया व्यये चामुक्तहस्तया ॥'

इति मनु(५/१५०)वचनानुसारं भर्त्तरि विरुद्धेऽपि सर्वदा प्रसन्नवदनया यत्करणीयं, विशेषतश्च ऋषियज्ञदेवयज्ञभूतयज्ञनृयज्ञपितृयज्ञानां सम्पादने स्वपत्यनुगामित्वं तद् दूरे विहाय नितरां परित्यज्य गृहीतकुम्भाः सत्यो दामोदरस्य दाम एव उदरे यस्य तस्य 'दमादिसाधनेनोदारोत्कृष्टा मति र्या तया गम्यत इति दामोदरः, 'दमाद्दामोदरो विभुः ।' इति महाभारते (उद्योगपर्वणि ७०/८) । यशोदया दामोदरे बद्ध इति वा दामोदरः –

'ददर्श चाल्पदन्तास्यं स्मितहासं च बालकम् ।
तयोर्मध्यगतं बद्धं दाम्ना गाढतयोदरे ॥
ततश्च दामोदरतां स ययौ दामबन्धनात् ।'

इति ब्रह्मपुराणे (७६/१३-१४) ।

'दामानि लोकनामानि तानि यस्योदरान्तरे ।
तेन दामोदरो देवः श्रीधरः श्रीसमाश्रितः ॥'

इति व्यासवचनाद्वा दामोदरः ।' इति श्रीविष्णुसहस्रनामशाङ्करभाष्यानुसारेण (श्लो.५३) श्रीकृष्णः । तस्य आननं –

'वक्त्रास्ये वदनं तुण्डमाननं लपनं मुखम् ।'

इत्यमर (२/६/८९) वचनान्मुखं तस्य विलोकनार्थं दर्शनार्थं लोलं

'चलनं कम्पनं कम्प्रं चलं लोलं चलाचलम् ।'

इत्यमर(३/१/७४)वचनाच्चञ्चलं चित्तं –

'चित्तं तु चेतो हृदयं स्वान्तं हृन्मानसं मनः ।'

इत्यमर(१/५/३१)वचनान्मनो यासां ता दामोदराननविलोकनलोलचित्ताः कामभावजागरणात्प्रसन्नवदनाः –

'स्मरणं कीर्त्तनं केलिः प्रेक्षणं गुह्यभाषणम् ।
सङ्कल्पोऽध्यवसायश्च क्रियानिष्पत्तिरेव च ॥
एतन्मैथुनमष्टाङ्गं प्रवदन्ति मनीषिणः ॥'

इति दक्षस्मृति(७/३१,३२)वचनानुसारेण मैथुनभावजर्जरिताः सत्यो ललितं

'सुकुमारतयाऽङ्गानां विन्यासो ललितं भवेत् ।'

इति मदनकेलितरङ्गिणी(३/१७)वचनात् लीलापूर्णम्, तथाभूतः अङ्घ्रिः –

'पादः पदङ्घ्रिश्चरणोऽस्त्रियाम् ।'

इत्यमर(२/६/७१)वचनाच्चरणः पतति यासां ता ललिताङ्घ्रिपाता गोपललना जलाय जलानयनार्थं चलिताः प्रस्थिताः ।

'क्रियर्थोपपदस्य च कर्मणि स्थानिनः ॥'

इति (अष्टाध्यायी-२/३/१४) अनेन सूत्रेण चतुर्थीविभक्तिः प्रयुक्ता । जलानयनच्छलेन श्रीकृष्णमुखदर्शनार्थिनीनां गोपाङ्गनानां गृहकर्मत्यागो निवृत्तिपरकः । वस्तुतः 'न कर्मणा न प्रजया धनेन त्यागेनैकेऽमृतत्वमानशुः' इति महानारायणोपनिषच्छ्रुतेः (१०/५),

'कर्मणा बध्यते जन्तुर्विद्यया तु प्रमुच्यते ।
अतः कर्म न कुर्वन्ति यतयः पारदर्शिनः ॥'

इति स्मृतेश्च संसारकर्मजातं परब्रह्मणि समर्प्य तन्निदिध्यासने नितरां सदा मनोनिवेशः कर्त्तव्यः । तदुक्तं वेदान्तकामधेनुदशश्लोक्याम् – 'उपासनीयं नितरां जनैः सदा' इति । तदुक्तञ्च श्रीमद्भागवते (१/२/१३) –

'अथ पुम्भिर्द्विजश्रेष्ठा वर्णाश्रमविभागशः ।
स्वनुष्ठितस्य धर्मस्य संसिद्धिर्हरितोषणम् ॥' इति ।

पुरुषोत्तमे प्रपन्नानां गोपीनां नान्यः कश्चित् अभिलाषो वर्त्तते । तदुक्तं श्रीमद्भागवते(३/२९/१३, ११/१४/१४) –

'सालोक्यसार्ष्टिसामीप्यं सारूप्यैकत्वमप्युत ।
दीयमानं न गृह्णन्ति विना मत्सेवनं जनाः ॥
न पारमेष्ठ्यं न महेन्द्रधिष्ण्यं न सार्वभौमं न रसाधिपत्यम् ।

सर्वा घटीः कटितटे सरसं दधाना
वामेतरां भुजलतामतिलोलयन्त्यः ।
शश्वन्मिथः प्रियकथास्मितसुन्दरास्या
गोपालवामनयना यमुनां प्रयाताः ॥ ४ ॥

न योगसिद्धीरपुनर्भवं वा मय्यर्पितात्मेच्छति मद्विनाऽन्यत् ॥' इति । अत एवोक्तमथर्ववेदीयमुण्डकोपनिषदि (२/२/८) –

'भिद्यते हृदयग्रन्थिश्छिद्यन्ते सर्वसंशयाः ।
क्षीयन्ते चास्य कर्माणि तस्मिन् दृष्टे परावरे ॥' इति ।

श्रीमद्भागवते तु 'दृष्ट एवात्मतीश्वरे' इति पाठः । अतो च्छन्दो नाम वसन्ततिलका । तल्लक्षणन्तु प्रागुक्तम् । अत्र गुणो माधुर्यम् । 'मृगलोचनाया' इत्यत्र उपमा । 'ल'कारानुप्रासः । रीतिः वृत्तिश्च पूर्ववत् । 'दामोदरानन' इत्यनेन औत्सुक्यध्वनिर्व्यज्यते ॥ ३ ॥

गपीनां यमुनागमनदृश्यमत्र उपस्थाप्यते – सर्वा घटीः –

'नाली घटी यामनाली दण्डढक्का यमरुका ।'

इति त्रिकाण्डशेष(१/६/४)वचनात् । 'कलसस्तु त्रिषु द्वयोः ।' इत्यमर-(२/९/३१-३२)वचनाच्च सर्वान् कलसान् कटितटे श्रोणिप्रान्ते सरसं दधाना धारयन्त्यो गोपालानां व्रजपुरवासिनां वामनयनाः –

'वामः कामे सव्ये पयोधरे ।'

इत्य हैम(२/३४०)वचनात् कामजर्जरिते नयने यासां ताः –

'अङ्गना भीरुः कामिनी वामलोचना ।'

इत्यमर(२/६/३)वचनाच्च गोपालरमण्यो वामेतरां दक्षिणां भुजलतां भुजरूपलतामतिलोलयन्त्यः शश्वत् पुनः पुनो मिथः परस्परं प्रियस्य श्रीकृष्णस्य कथायां वृत्तान्ते स्मितं प्रफुल्लितं सुन्दरमास्यं मुखमण्डलं वा यासां ता जाताः । ताः एवम्भूताः यमुनां यमुनानदीं प्रयाताश्चलिताः लीलासहचारिण्या यमुनया मिलिता इत्यर्थः । श्रूयते 'आत्मानमेव प्रियमुपासीत' इति । श्रीकृष्णाभिधेयस्य प्रियतमस्यास्य आत्मनः निमित्तं सर्वं प्रियं भवति । एतस्मिन् आत्मनि ज्ञाते सर्वं ज्ञातं भवति । तदुक्तं बृहदारण्यकोपनिषदि (४/५/६) – 'न वा अरे पत्युः

ततः काश्चित् –

अन्योन्यमाबद्धभुजा भुजेन
स्नातुं प्रयान्त्यस्तपनात्मजायाम् ।
मन्दस्खलच्चारुकुचाभिरामा
गायन्ति शश्वच्चरितं मुरारेः ॥ ५ ॥

कामाय पतिः प्रियो भवति ×× ×× ×× आत्मनस्तु कामाय सर्वं प्रियं भवति । आत्मा वा अरे द्रष्टव्यः श्रोतव्यो मन्तव्यो निदिध्यासितव्यो मैत्रेयात्मनि खल्वरे दृष्टे श्रुते मते विज्ञात इदं सर्वं विदितम् ।' इति । परमेश्वरस्य निरन्तरं भक्त्या तु अज्ञानविनाशपूर्वकं प्रवृत्तिकर्मक्षयो भवति । तदुक्तं श्रीमद्भागवते (१/२/६,७) – 'स वै पुंसां परो धर्मो यतो भक्तिरधोक्षजे ।
अहैतुक्यप्रतिहता ययाऽत्मा संप्रसीदति ॥
वासुदेवे भगवति भक्तियोगः प्रयोजितः ।
जनयत्याशु वैराग्यं ज्ञानं च यदहैतुकम् ॥' इति ।

जीवनस्य अनित्यत्वात् क्षणिकत्वाच्च शुभगतिलाभाय नूनम् आत्मन उपासना नितरां सदा कर्त्तव्या, 'श्वोभावा मत्यस्य यदन्तकैतत् सर्वेन्द्रियाणां जरयन्ति तेजः । अपि सर्वं जीवितमल्पमेव ।' इति कठश्रुतेः (१/१/६) । स्मितलक्षणं चोक्तं यथा भरते –

'ईषद्विकसितं गण्डं कटाक्षं सौष्ठवान्वितम् ।
अलक्षदशनं धीरमुत्तमानां स्मितं मतम् ॥' इति ।

अत्र छन्दो नाम वसन्ततिलका । अत्र 'ल'कारानुप्रासः । 'ट'कारानुप्रासश्च । अयं शृङ्गाररसविरोधी इति मत्वा द्वितीये तृतीये चतुर्थचरणे च परित्यक्तः । अनुप्रासलक्षणं यथा – 'वर्णसाम्यमनुप्रासः' इति काव्यप्रकाशे (९/१०४)। 'गोपालवामनयना' इत्यत्र लक्षणा । अत्र हर्षो व्यभिचारिभावः । तदुक्तं साहित्यदर्पणे (३/१७४) यथा –

'हर्षस्त्विष्टावाप्तेर्मनःप्रसादोऽश्रुगद्गदादिकरः ।' इति ॥४॥

ततः काश्चिद्रमण्यो भुजेन स्वबाहुनाऽन्योन्यं परस्परमाबद्धभुजा भुजेनाबद्ध्य तपनात्मजायां –

ततो यमुनां गत्वा –

उत्क्षिप्य चेलमधिजानु पयःप्रवाहे
शश्वद्विधूय तरसा पयसा प्रपूर्य ।

'कालिन्दी सूर्यतनया यमुना शमनस्वसा ।'

इत्यमर(१/१०/३२)वचनाद् यमुनानद्यां स्नातुं स्नाननिमित्तं प्रयान्त्यो गच्छन्त्यो मन्दं स्वल्पं वस्त्रस्खलनाच्चारुभिः रमणीयैः कुचैः स्तनैरभिरामा मनोहारिण्यो मुरारेर्मुरासुरविनाशकस्य –

'विष्णुर्नारायणः कृष्णो ... मुकुन्दो मुरमर्द्दनः ।'

इत्यमर(१/१/२१)वचनात् श्रीकृष्णस्य चरितमितिवृत्तं शश्वद्वारम्वारं गायन्ति । गोपाङ्गनाकृतेन भगवच्चरितगानेन ध्यानेन वा वस्तुतस्तासां पापनाशो जाताः, यतो हि उक्तं विष्णुपुराणे (६/८/२०) –

'यन्नामकीर्त्तनं भक्त्या विलापनमनुत्तमम् ।
मैत्रेयाशेषपापानां धातूनामिव पावकः ॥' इति ।

गरुडपुराणेऽपि (१/२३०/२८) –

'ध्यायेन्नारायणं देवं स्नानादिषु च कर्मसु ।
प्रायश्चित्तं हि सर्वस्य दुष्कृतस्येति वै श्रुतिः ।' इति ।

अत्र इन्द्रवज्रा नाम छन्दः । एतल्लक्षणं यथा –

'स्यादिन्द्रवज्रा यदि तौ जगौ गः ।'

इति केदाभट्टो वृत्तरत्नाकरे (३०) । अत्र छेकानुप्रासः 'भ'कार-'ज'कारयोः सकृदावृत्तेः । तल्लक्षणं यथा साहित्यदर्पणे (१०/४) –

'छेको व्यञ्जनसंघस्य सकृत् साम्यमनेकधा ।' इति ।

'कुचाभिरामा' इति उद्दीपनविभावः । योषिदलङ्काराः विंशतिः । एषु मुरारेर्गुणगान् अपि अस्ति । तच्च मोट्टायितरूपम् । तदुक्तं साहित्यदर्पणे (३/११९) –

'तद्भावभाविते चित्ते वल्लभस्य कथादिषु ।
मोट्टायितमिति प्राहुः कर्णकण्डूयनादिकम् ॥' इति ।

'तपन'पदेन मदनतापः प्रतीयते । 'आकल्परचनापि विच्छित्तिः कान्तिपोषकृत् ।' इति दशरूपके । अत्र तापध्वनिः, मुरारिं प्रति रतिभावश्च द्योत्यते ॥ ५ ॥

तदनन्तरं यमुनानदीजलं प्रविश्य अधिजानु जानु अधिकृत्य स्थितं

तस्माच्च किञ्चिदवकाशजले कराभ्यां
गोपाङ्गना भुजघटं घटयांबभूवुः ॥ ६ ॥

ततः कृष्णो दूरे निरीक्ष्य सस्मितः –

इहैव कन्दर्पकलानुकूले कदम्बमूले निभृतो भवामि ।
कूले दुकूलं विनिधाय नीरे गोपाङ्गना मज्जनमाचरन्ति ॥ ७ ॥

यत्पयस्तस्य प्रवाहे चेलं –

'वस्त्रमाच्छादनं वासश्चेलं वसनमशुकम् ।'

इत्यमर(२/६/११५)वचनात् स्वस्वपरिधानवसनमुत्क्षिप्य भुजघटं भुजे बाहौ सन्निहितं घटं कलसं तरसा 'रंहस्तरसा तु रयः स्यदः ।' इत्यमर(१/१/६४) वचनाद् वेगेन पयसा जलेन प्रपूर्य पूरयित्वा तस्मात् अवकाशजले तन्निहितजले विधूय च धौतं कृत्वा च गोपाङ्गना गोपानामङ्गना नार्यः कराभ्यां घटयांबभूवुर्घटं मार्जयामासुः । तदनन्तरं तान् कूले संस्थाप्य वसनञ्चापि जले आत्मानं निमज्जयामासुरितिभावः । वसन्ततिलका नाम छन्दः । तल्लक्षणं तु प्रागुक्तम् । 'ध'कार-'ट'कारयोः सकृदावृत्तौ छेकानुप्रासः । 'गोपाङ्गना'पदेन तासां रक्षकत्वं ध्वन्यते, 'गुपु'- रक्षणे इति धातुः ॥ ६॥

कृष्णो दूरात् गोपीनां शोभां निरीक्ष्य दृष्ट्वा आनन्दितस्सन् चिन्तयति – इहैव अत्रैव कन्दर्पस्य –

'मदनो मन्मथो मारः प्रद्युम्नो मीनकेतनः ।
कन्दर्पो दर्पकोऽनङ्गः कामः पञ्चशरः स्मरः ॥'

इत्यमर(१/१/२५)वचनात् कामस्य कलानिमित्तं सुरतक्रीडानिमित्तमनुकूले कदम्बवृक्षमूले निभृतो भवामि गोपनभावेन तिष्ठामि यतः कूले यमुनानदीकूले दुकूलं दुष्टं कूलति आवृणोति इति अङ्गाच्छादनवस्त्रं विनिधाय स्थापयित्वा नीरे यमुनाजलस्रोतसि गोपाङ्गना गोपरमण्यो मज्जनमवगाहनं स्नानमाचरन्ति । तासां रूपदर्शनमिष्यते कृष्णेनेति भावः । अभिसारानुकूलस्थानेषु नदीकूल-वनयोरन्तर्भाव इति पूर्वत्रोक्तम् । यद्यपि परदारदर्शनं पापं तथापि तेजीयसां कृते तन्न दोषायेति ज्ञाने अपरिमिततेजसि परब्रह्मणि भगवति श्रीकृष्णे न दोषः । तदुक्तं श्रीमद्भागवते (१०/३३/३०) यथा –

ततो राधां कूले दुकूलं निधाय मज्जन्तीं काचिदुच्चैरूचे –

मा मज्ज मा मज्ज जले मृगाक्षि ! गृहाण चेलं सहसा विबुध्य ।
आयाति सोऽयं व्रजसुन्दरीणां निचोलचौरः पुरतः किशोरः ॥ ८ ॥

ततो राधा ससम्भ्रमं – कृष्णं निरूप्यतामिति ।

कृष्णस्तत्रैव माययाअन्तर्दधे । ततस्तु –

'धर्मव्यतिक्रमो दृष्ट ईश्वराणां च साहसम् ।
तेजीयसां न दोषाय वह्नेः सर्वभुजो यथा ॥' इति ।

अत्र छन्दो नाम उपजातिः । एतल्लक्षणं यथा –

'अनन्तरोदीरितलक्ष्मभाजौ पादौ यदीयावुपजातयस्ताः ।'

इति वृत्तरत्नाकरे (३२) । अत्र 'क'कार-'ल'कारयोः सकृदावृत्तौ छेकानुप्रासः । कदम्बमूलस्य उद्दीपनविभावत्वम् । प्रसिद्धपदार्थकं कृष्णपदम् । इत आरभ्य मनोरमा चीरहरणलीला प्रस्तूयते ॥ ७ ॥

यमुनानदीकूले स्वदुकूलमाभरणवस्त्रं संस्थाप्य स्नानरतां राधां वीक्ष्य काचिद् गोपी उच्चैरुक्तवती – हे मृगाक्षि ! मृगवद्धरिणसदृशं चपलमक्षियुगलं नयनद्वयमस्ति यस्याः सैवम्भूता त्वं जले यमुनानदीजले मा मज्ज आत्मानं जलमज्जितं न कुरु । व्रजसुन्दरीणां गोपरमणीनां निचोलानां 'निचोलः प्रच्छदपटः' इत्यमर(२/६/११६)वचनादङ्गावरणवस्त्राणां चौरोऽपहरणकारी सोऽयं किशोरः कृष्णः पुरतः सम्मुखे आयाति । सः कृष्णो वस्त्राण्यपहरिष्यतीति विबुध्य सहसा शीघ्रं गृहाण नयेति शेषः । छन्दो नाम उपजातिः । लक्षणं च प्रागुक्तम् । अत्र 'म'कारस्य बहुवारमावृत्तौ वृत्त्यनुप्रासः । तथैव 'ज'कारस्यापि । 'किशोर'पदेन कामवासनारहितत्वं व्यज्यते । 'मा, मा' इति सम्भ्रमे ॥ ८ ॥

राधा सखीवचनं श्रुत्वा ससम्भ्रमं निरूप्यतामिति उक्तवती । किन्तु कृष्णस्तदा माययाऽन्तर्हितो जातः । मीयते अनया इति माया । परब्रह्म श्रीकृष्णो विश्वं माति यस्यां, मिमीते वा सा माया । एषा भगवतो बहिरङ्गाशक्तिरूपा । सा च सृष्टिस्थितिसंहारलक्षणा, गौरनाद्यन्तवती जनित्री भूतभाविनी सर्वकामदुघा विभोः' इति मन्त्रिकोपनिषच्छ्रुतेः ।

'मायां तु प्रकृतिं विद्यान्मायिनं तु महेश्वरम् ।'

सखीगणैस्तत्र निरूप्य यत्नात्
पुंसा विहीना विदिशो दिशोऽपि ।
आधाय कूले वनिता दुकूलं
पयःप्रवाहे सरसं ममज्जुः ॥ ९ ॥

इति श्वेताश्वतरश्रुतेश्च (४/१०) । परमात्मनो मायाशक्तिः स्वरूपतः अनिर्वचनीया भवति । एतस्याः कार्यद्वारा इयं निरूप्यते । मायाञ्च प्रज्ञां प्रतिभां वा इत्यपि वदन्ति । एषा हि सिद्धिविशेषा ।

'अणिमा लघिमा प्राप्तिः प्राकाम्यं महिमा तथा ।
ईशित्वञ्च वशित्वञ्च तथा कामावसायिता ॥'

इति अष्टधा । मायया अन्तर्दधे इत्यत्र अन्तर्धानशक्तिर्हि माया । शुक्लयजुर्वेदीयसुबालोपनिषदि, श्रीमद्भागवत एकादशस्कन्धे, विष्णुपुराणादौ च प्रपञ्चितमिदम् ।

तदनन्तरं सखीगणैः कर्पूरमञ्जर्य्यादिसङ्गिनीगणैस्तत्र यमुनानदीकूले यत्नाद् यत्नसहकारेण पुंसा येन केनचित् पुरुषेण विहीनाः शून्या नितरां जनशून्या विदिशः 'क्लिवाव्ययं त्वपदिशं दिशोर्मध्ये विदिक् स्त्रिया ।' इत्यमर-(१/३/५)वचनाद्दिशो मध्यगतमग्निवायुनैऋतैशान्यादिकोणचतुष्टयं, तथा च दिशः – 'प्राच्यपाचीप्रतीच्यस्ताः पूर्वदक्षिणपश्चिमाः ।
उत्तरा दिगुदीची स्या ×× ×× ×× ॥'

इत्यमर(१/३/१-२)वचनात् पूर्वपश्चिमोत्तरदक्षिणसंज्ञकदिक्चतुष्टयं च निरूप्य परिलक्ष्य वनितास्ता गोपरमण्यस्तत्र यमुनाकुले दुकूलं स्वस्वपरिधानवस्त्राणि आधाय शुष्कभूमौ संस्थाप्य पयःप्रवाहे जलस्रोतसि सरसमानन्दसहकारेण क्रीडापूर्वकं ममज्जुर्मज्जनं चक्रुरिति । 'जीवोल्पशक्तिरस्वतन्त्र' इति श्रुतेर्जीवः अज्ञः अनीशश्च । भोक्तृभावादत्र तस्य पुनर्भवता । इन्द्रियासक्तिकारणात् असारकर्मसु स निमग्नो भवति, यथाऽत्र जलक्रीडा । वस्त्रपरिधानपूर्वकमेव स्नानं विधीयते, 'न नग्नः स्नानमाचरेदि'ति मनूक्तेः (४/४५) । अत्र गोपीनां विवस्त्रस्नानप्रवृत्तिरज्ञानकारणाज्जाता इत्येतत् परिलक्ष्यते । तासामिदं गुप्तदुष्कर्म द्रष्टुं न कश्चिद् विद्यत इति तासां प्रत्ययः । किन्तु परमपुरुषः सदैव सर्वत्र

नीपशाखिविटपोपरि वामबाहुमूलमुपधाय शयालुः ।
गोपिकानिभृतवीक्षणकामः स्वापमाप कपटेन मुरारिः ॥ १० ॥

विराजते । स एव निर्गुणः चैतन्यघनः सततं शुभाशुभकर्मणां द्रष्टा । श्रूयते ऋग्वेदे (१/१६४/२०), अथर्ववेदे (९/१४), श्वेताश्वतरे (४/६) च –

'द्वा सुपर्णा सयुजा सखाया समानं वृक्षं परिषस्वजाते ।
तयोरन्यः पिप्पलं स्वाद्वत्त्यनश्नन्नन्यो अभिचाकशीति ॥' इति ।

स्मर्यते मनुना (८/८४-८६) –

'आत्मैव ह्यात्मनः साक्षी गतिरात्मा तथात्मनः ।
मन्यन्ते वै पापकृतो न कश्चित् पश्यतीति नः ।
तांस्तु देवाः प्रपश्यन्ति स्वस्यैवान्तरपूरुषः ॥
द्यौर्भूमिरापो हृदयं चन्द्रार्काग्नियमानिलाः ।
रात्रिः सन्ध्ये च धर्मश्च वृत्तज्ञाः सर्वदेहिनाम् ॥' इति ।

अत्र छन्दो नाम उपजातिः । 'द'कार-'श'कारयोः सकृदावृत्तौ छकानुप्रासः । 'सरस'पदेनाऽत्र वनितानां निभृतविहरणत्वं मुक्तभयत्वञ्च व्यज्यते ॥९॥

यमुनानदीजले स्नानरतगोपाङ्गनानां शोभादर्शनार्थमुपस्थितस्य कृष्णस्याचरणमत्र प्रतिपाद्यते नीपेति । नीपशाखिनः 'नीपो धारा कदम्बकः ।' इति त्रिकाडशेष(३९/२२)वचनात् कदम्बवृक्षस्य विटपोपरि

'विस्तारो विटपोऽस्त्रियाम् ।'

इत्यमरः(२/४/१४)वचनाच्छाखोपरि वामबाहुमूलं वामकक्षमुपधाय आरोप्य गोपिकानां गोपरमणीनां विशेषतो राधायाः सौन्दर्यं निभृतेन लुक्कायितभावेन वीक्षणकामो विशेषेण ईक्षणे दर्शने रूपयौवनदर्शने कामः कामना इच्छाऽस्ति यस्य सः शयालुः 'शीङ्'- स्वप्ने इति धातोः शीङश्च (वा.३/२/१५८) इति आलुच्-प्रत्यययोगेन शयालुः 'स्वप्नक् शयालुर्निद्रालुः ।' इत्यमर(३/१/३३) वचनात् निद्राभावापन्नो वस्तुतः कपटनिद्राशीलो भूत्वा मुरारिः श्रीकृष्णः स्वापं

'स्यान्निद्रा शयनं स्वापः स्वप्नः संवेश इत्यपि ।'

इत्यमर(१/७/३६)वचनाच्छयनमाप प्राप्तवान् आचरति स्म । कदम्बपादपे श्रीकृष्णस्य लीला प्रदर्श्यते महामहोपाध्यायैः सुधाकराचार्यैः –

बहुलजलविहारव्याकुलानां नीपित-
स्फुटकमलमधूनां मुग्धयोगाङ्गनानाम् ।
पुलिनभुवि विलोक्य स्मेरवक्त्रारविन्दो
वसनमथ मुकुन्दो हर्त्तुकामो बभूव ॥ ११ ॥

'कलिन्दकन्याततलम्बिशाखया कदम्बकिञ्जल्कसमद्युतिं प्रियाम् ।
समालम्बे स्वदुकूलसच्छविं य एष सोऽयं वसुदेवनन्दनः ॥' इति ।

श्रीकृष्णस्यैवमाचरणं मन्मथलीलाद्योतकम् । अत्र छन्दो नाम स्वागता । एतल्लक्षणं यथा वृत्तरत्नाकरे (४०) –

'स्वागतेति रनभाद्गुरुयुग्मम् ।' इति ।

'प'कारस्य असकृदावृत्तौ वृत्त्यनुप्रासः । 'गोपिकानिभृतवीक्षणकाम' इत्यत्र रतिरसः । 'मुरारि'पदेन उत्साहरसः ॥ १० ॥

बहुलमस्ति यज्जलं तत्र विहारनिमित्तं –

'विहारस्तु जिनालये । लीलायां भ्रमणे स्कन्धे ।'

इति हैम(३/६३८-६३९)वचनाल्लीलानिमित्तं क्रीडानिमित्तं व्याकुलानां व्यस्तानां नीपितं निःशेषभावेन पीतं मुखरूपकस्य (अत्रोपमेयलोपः) स्फुटस्य प्रस्फुटितस्य कमलस्य पद्मस्य मधु यासां तासां, मुग्ध एव मुग्धत्वं, तस्मिन् योगो यासां ताः अङ्गनाः तासां मुग्धयोगाङ्गनानां रमणीनां वसनं परिधानवस्त्रसकलं पुलिनभुवि 'तोयोत्थितं तत्पुलिनम् ।' इत्यमर(१/१०/९)वचनाद्यमुनानद्या वालुकामयतटप्रदेशे विलोक्य दृष्ट्वा स्मेरं दरहषितं स्मितहास्ययुक्तमरविन्दरूपकं 'पद्मं नलिनमरविन्दं महोत्पलम् ।' इत्यमर (१/१०/३९)वचनात् पद्मसदृशं मुखमस्ति यस्य स मुकुन्दो नन्दसुतः श्रीकृष्णः, परमार्थतः –

'मुकुमव्ययमानश्च निर्वाणं मोक्षवाचकम् ।
तद्ददाति च यो देवो मुकुन्दस्तेन कीर्त्तितः ॥
मुकुं भक्तिरसप्रेमवचनं वेदसम्मतम् ।
यस्तं ददाति भक्तेभ्यो मुकुन्दस्तेन कीर्त्तितः ॥'

इति ब्रह्मवैवर्त्तपुराणश्रीकृष्णजन्मखण्ड(१११/२७,२८)वचनानुसारं भगवान् श्रीकृष्णोऽथ हर्त्तुकामो वस्त्रहरणनिमित्तं कामनापरायणो बभूव जातः । अनीशो

लघुलघु नवनीपे नीपपुष्पावतंसः
सुरतसमरसिंहः स्मेरवक्त्रारविन्दः ।
चकितचकितमाशाः शश्वदुद्वीक्ष्यमाणो
व्रजयुवतिनिचोलं चोरयामास कृष्णः ॥ १२ ॥

जीवात्मा भोक्तृभावात् बद्धो भवति । तस्य अहङ्कारविनाशाय भगवद्विधानमेतत् वस्त्रहरणलीलारूपम् । जीवस्तु हरेरधीन इति कदाचिदपि न विस्मर्तव्यम् । यद्यपि परस्य स्त्रिया सह सम्पर्कः

'अधार्मिकं तस्करं च परस्यैव च योषितम् ।'

इति मनु(४/१३३)वचनानुरोधेन निन्दितकर्मरूपेण उक्तः, यदि च कृष्णस्य

'परस्त्रियं योऽभिवदेत्तीर्थेऽरण्ये वनेऽपि वा ।
नदीनां वाऽपि संभेदे स सङ्ग्रहणमाप्नुयात् ॥
उपचारक्रिया केलिः स्पर्शो भूषणवाससाम् ।
सह खट्वासनश्चैव सर्वं सङ्ग्रहणं स्मृतम् ॥

इति मनु(८/३५६-३५७)वचनात् कर्मेदं स्त्रीसङ्ग्रहणविवादरूपं तथाप्यत्र मुकुन्दपदव्यवहारादेषा भागवती लीलेति ज्ञातव्यम् । अत्र छन्दो मालिनी । एतल्लक्षणन्तु पूर्वत्र उक्तम् । 'ल'कारस्य असकृदावृत्तौ वृत्त्यनुप्रासः । 'स्मेरवक्त्रारविन्द' इत्यत्र रूपकमलङ्कारः । तल्लक्षणं यथा साहित्यदर्पणे (१०/४१) – 'रूपकं रूपितारोपो विषये निरपह्नवे ।' इति । 'मुकुन्द'पदं प्रसिद्धार्थकम् ॥ ११ ॥

लघुलधु 'अथ शीघ्रं त्वरितं लघु क्षिप्रमरं द्रुतम् ।' इत्यमर (१/१/६४)वचनादत्यन्तं शीघ्रं नवो नूतनः प्रफुल्लितस्तस्मिन् नीपे कदम्बवृक्षे स्थित्वा नीपपुष्पं कदम्बपुष्पमवतंसः –

'पुंस्युत्तंसावतंसौ द्वौ कर्णपुरे च शेखरे ।'

इत्यमर(३/३/२२७)वचनात् कर्णभूषणमाभरणमस्ति यस्य स नीपपुष्पावतंसः,
सुरतं – 'सुरतं त्वभिमानितम् ।
धर्षितं सम्प्रयोगो ना रतं चाब्रह्मचर्यकम् ।
उपसृष्टं त्रिभद्रं च क्रीडारत्नं महासुखम् ॥'

ततो दुकूलानि कूले नालोक्य राधा जगाद –

कूले कलिन्ददुहितुर्निहितं दुकूलं

नालोकितं सपदि तेन जनेन नीतम् ।

इति त्रिकाण्डशेष(२/३१)वचनानुसारं स्त्रीपुरुषयोः सङ्गमरूपरमणविशेषस्तद्रूप-समरो युद्धं तस्मिन् सिंहोऽत्यन्तं पराक्रमशाली दक्षो वा, स्मेरं दरहसितं तेन विकशितं वक्त्रारविन्दं मुखपद्मं यस्य सः स्मेरवक्त्रारविन्दः, चकितचकितं भीतभीतं शङ्कायुक्तेन आशाः –

'दिशस्तु ककुभः काष्ठा आशाश्च हरितश्च ताः ।'

इत्यमर(१/३/१)वचनात् दिक्सकलं पूर्वादिचतुर्दिशं वा शश्वद् वारम्वारम् उद्वीक्ष्यमाणोऽवलोकयन् कृष्णः कृष्णवर्णात्मकत्वात् कृष्णः, यथा महाभारते शान्तिपर्वणि (३४२/७९) –

'कृषामि पृथिवीं पार्थ भूत्वा कार्ष्णायसो हलः ।

कृष्णो वर्णश्च मे यस्मात्तस्मात् कृष्णोऽहमर्जुन ॥'इति ।

'कृषिर्भूवाचकः शब्दो णश्च निवृत्तिवाचकः ।

विष्णुस्तद्भावयोगाच्च कृष्णो भवति शाश्वतः ॥'

इति महाभारतीयोद्योगपर्वोक्त(७०/५)वचनानुसारं सच्चिदानन्दात्मकः कृष्णो भगवान्, स व्रजयुवतिनिचोलं व्रजो गोपपुरं तत्रत्या युवतिः, 'यूनस्तिः' इति (४/१/७७)सूत्रेणानुकूलह्रस्वप्रयोगेऽत्र 'तरुणी युवतिः समे ।' इत्यमर (२/६/८)वचनाद्रमणी, तासां निचोलमन्तर्वस्त्रमावरणवस्त्रं वा चोरयामास लज्जाम् अपहृतवान् । कृष्णः आकर्षकः कर्षकः इत्यर्थः । एतद्द्वारा ताः कृष्णसम्मुखमागच्छेयुरिति भावः । अत्र छन्दो मालिनी । लक्षणं पूर्वमुक्तम् । 'ल'कार-'घ'कारयोः सकृदावृत्तौ छेकानुप्रासः । एवं 'न'कार-'प'कारयोः । एवं च 'च'कार-'क'कार-'त'काराणाम् । 'सुरतसमरसिंह' इत्यत्र रूपकम् । 'स्मेरवक्त्रारविन्द' इत्यत्रापि रूपकम् ॥ १२ ॥

यमुनाकूले स्ववस्त्रं न दृष्ट्वा राधा कथितवती – कुल इति । कलिन्ददुहितुः – 'कलिन्दगिरिनन्दिनीतटसुरद्रुमालम्बिनी ।' इति रसगङ्गाधर (श्लो.१) वचनात् कलिन्दनायकस्य दुकूलं वस्त्रमधुना नालोकितं न

अपि च –

आगन्तुमत्र गुरुणा बहुधा निषिद्धा
हा हा तथापि यमुनां यदुपागताऽस्मि ।

दृष्टिगोचरीभूतं भवति । हे सङ्गिन्यः ! सपदि –

'स्रागझटित्यञ्जसाह्नायद्राङ्मङ्क्षुसपदि द्रुते ।'

इत्यमर(३/४/२)वचनात् तत्क्षणं तेन अपरिचितेन जनेन यस्योपस्थितिविषये आशङ्का आसीत् तेनैवावश्यं तद्वस्त्रं नीतमपहृतम् । हन्त अव्ययपदम् ।

'हन्त हर्षेऽनुकम्पायां वाक्यारम्भविषादयोः ।'

इति अमरकोषवचनात् (३/३/२४४) विषादार्थकम् । अद्य कृतापराधा कृतोऽपराधो यया साऽहम्, गुरुजननिषेधं न स्वीकृत्य यमुनामागता तत अपराधं कृतवती, वधूजनानां स्वातन्त्र्याभावात् । तदुक्तं मनुना (५/१४८,१४९) –

'बाल्ये पितुर्वशे तिष्ठेत् पाणिग्राहस्य यौवने ।
पुत्राणां भर्तरि प्रेते न भजेत् स्त्री स्वतन्त्रताम् ॥
पित्रा भर्त्रा सुतैर्वाऽपि नेच्छेद्विरहमात्मनः ।
एषां हि विरहेण स्त्री गर्ह्ये कुर्यादुभे कुले ॥' इति ।

एवमवस्थायां सहजेन साधारणेन शेषवशात् कोपवशादरुणे रक्तवर्णेऽक्षिणी यस्य तत् सहजरोषवशारुणाक्षं, श्वश्रोः 'पतितत्न्योः प्रसूः श्वश्रूः ।' इत्यमर (२/६/३१)वचनात् पतिमातुर्मुखं कथं केन प्रकारेण द्रक्ष्यामि । अद्य तत्सम्मुखं गन्तुं न प्रभविष्यामीति भावः । अत्र छन्दो नाम वसन्ततिलका । लक्षणन्तु पूर्वत्रोक्तम् । अत्र कोपस्य प्रशमनरूपः कोपशान्तिभावः । तदुक्तं –

'भावस्य शान्तिरुदयः सन्धिः सबलता तथा ।
काव्यस्य काञ्चनस्यैव कुङ्कूमं कान्तिसम्पदे ॥' इति॥ १३ ॥

अपि च यमुनानदीमागन्तुं यद्यपि श्वश्र्वादिगुरुजनैर्बहुधा बहुवारमहं निषिद्धा निवारिता तथाप्यत्रागता । गुरुजनहिंसाऽऽचरणान्मयाऽपराधः कृतोऽधुना यतो ह्युक्तं मनुना (४/१६२) –

'आचार्यं च प्रवक्तारं पितरं मातरं गुरुम् ।
न हिंस्याद् ब्राह्मणान् गाश्च सर्वांश्चैव तपस्विनः ॥'इति।

प्राप्तं मया तदनुरूपफलं, न जाने
किं वा फलान्तरमुपैमि गृहे गुरुभ्यः ॥ १४ ॥

तत उत्तीर्य पुरोऽवलोक्य कृष्णं प्रति –

मा धाव माधव ! विदूरमिदं दुकूल-
मादाय कूलनिहितं मिहिरात्मजायाः ।
ज्ञातोऽसि चञ्चलनिवृत्तिमुपैहि सद्यो
भद्रं भविष्यति न ते विदिते नृपेण ॥ १५ ॥

'प्रतिकूलाचरणेऽत्र हिंसाशब्दः ।' इति अत्र मन्वर्थमुक्तावलीटीकाकारः कुल्लूकभट्टः । कुकर्माचरणादनुरूपं फलमिदं कष्टं दुःखं वा सम्प्रति मया राधया प्राप्तम् । पुनः न जाने यत् गृहे गुरुभ्यः श्वश्र्वादिगुरुजनेभ्यः किं वाऽन्यत्फलं फलान्तरमुपैमि गच्छामि प्राप्नोमि गृहेऽधिकनिन्दाभर्त्सनादिकमवश्यं प्राप्स्यामीति भावः । 'हा' इति खेदव्यञ्जकमव्ययपदं,

'हा विषादे च शोके च कुत्सादुःखार्थयोरपि ।'

इति मेदिनीवचनात् । अत्र छन्दो नाम वसन्ततिलका । लक्षणं प्रोक्तम् ॥ १४ ॥

यमुनाजलप्रवाहात् उत्तीर्य उत्थाय राधा सम्मुखभागे विद्यमानं कृष्णं दृष्ट्वा कथयति – हे माधव ! मधुकुले जातत्वान्माधवः । मधु मकरन्दः अस्ति अस्मिन्निति माधवः अत्यन्तं रमणीयः अथवा मधुविद्यावबोध्यत्वात् माधवः अथवा विष्णुपक्षे माया लक्ष्म्याः धवः । हे श्रीकृष्ण ! मिहिरस्य सूर्यस्य आत्मजायाः कन्याया यमुनानद्याः कूले तटे निहितं स्थापितं दुकूलं परिधानवस्त्रमादाय गृहीत्वा विदूरं विशेषेण दूरमतिदूरं मा 'मास्म माऽलं च वारणे' इत्यमर (३/४/११२) वचनात् न धाव धावनं न कुरु । अस्मादेव गर्हितकार्याच्चञ्चलं शीघ्रं निवृत्तिमुपैहि प्राप्नुहि यतस्त्वं सद्यः अधुनैव ज्ञातः सूचितोऽसि यत् नृपेण कंसेन शासकेन नन्देन वा विदिते एतद्विषयज्ञाते सति ते तव कृष्णस्य भद्रं मङ्गलं न भविष्यति, अवश्यं त्वं दण्डितो भविष्यसि व्यवहारदर्शनेन । श्रीराधामाधवयोः इयं केलिः सदा जगदाह्लादकारिणी । तदुक्तं जयदेवेन गीतगोविन्दे – 'राधामाधवयोर्जयन्ति यमुनाकूले रहः केलयः ।' इति । समाजदृष्टया कृष्णकृतं गोपिकावसनचौर्यात्मकं कर्मेदं

कृष्णः श्रुत्वा –

नीपे विधाय वपुरुन्नतदक्षिणांशं
सव्यांशलम्बिमणिकुण्डलमानतभ्रूः ।
आलोलमङ्गुलिदलैर्मुरलीं मुरारि-
रापूरयन् व्रजवधूहृदयं जहार ॥ १६ ॥

स्मृत्याचारविरुद्धम् । एतस्य प्रतिकारार्थं प्रजापालकाय राज्ञे निवेदनीयम् । तदुक्तं याज्ञवल्क्येन (२/५) –

'स्मृत्याचारव्यपेतेन मार्गेणाधर्षितः परैः ।
आवेदयति चेद्राज्ञे व्यवहारपदं हि तत् ॥' इति ।

सोऽप्यभियोगो द्विविधः । तदाह नारदो (१/२७) यथा –

'द्व्यभियोगस्तु विज्ञेयः शङ्कातत्त्वाभियोगतः ।
शङ्का सतां तु संसर्गात् तत्त्वं होढाभिदर्शनात् ॥' इति ।

अत्र वस्त्रापहरणे तत्त्वाभियोगावकाशः । राजनिवेदनेऽत्र चौरो दण्डं प्राप्नुयात् । दण्डव्यवस्था मनुनोक्ता (८/३३४) –

'येन येन यथाङ्गेन स्तेनो नृषु विचेष्टते ।
तत्तदेव हरेत्तस्य प्रत्यादेशाय पार्थिवः ॥' इति ।

मा सद्यश्चेति अत्र अव्ययपदद्वयम् । मिहिरात्मजा यमुनाऽत्र कृष्णकर्मसाक्षिरूपा इति ज्ञायते । अत्र छन्दः वसन्ततिलका । लक्षणन्तु पूर्वत्र उक्तम् । 'मा धाव' 'माधव' इत्यत्र यमकम् अलङ्कारः, 'अर्थे सत्यर्थभिन्नानां सा पुनः श्रुतिः। यमकम्' इति काव्यप्रकाशोक्तेः (९/११७) इति ॥ १५ ॥

राधावचनं श्रुत्वा नीपे कदम्बवृक्षशाखोपरि उन्नतो दक्षिणांशो यस्य वपुषः 'गात्रं वपुः संहननं शरीरं वर्ष्म विग्रहः ।' इत्यमर(२/६/७०)वचनात् स्वशरीरस्य दक्षिणभागम् उपरि विधाय सव्यांशात् 'वामं शरीरं सव्यं स्यात् ।' इत्यमर(३/१/८४)वचनाच्छरीरवामभागालम्बितमान्दोलितं मणिखचितं कुण्डलं यस्य वपुषः तत् अधः कृत्वा आनता भ्रूर्यस्य स मुरारिः श्रीकृष्णः अङ्गुलिदलैरङ्गुलिसमूहेन मुरलीं वंशीमालोलं चञ्चलं शीघ्रमापूरयन् वायुपूरणेन वादयन् व्रजवधूनां गोपालरमणीनां हृदयं मनो जहारापहृतवान्। यः मुरारिः स

ततः –

मञ्जुहासपरिहासपेशलः कौतुकान्नवकदम्बशाखिनम् ।
आरुरोह सरसीरुहाननो मन्दमन्दगतिनन्दनन्दनः ॥ १७ ॥

आहूय गोपीरवधूय पाणिं
स्मेराननो नन्दसुतो जगाद ।
उत्थाय कूले नवनीपमूले
मत्तो दुकूलं नयतानुकूलम् ॥ १८ ॥

कथं हृदयं हरतीति विरोधः । अत एव तत्र सर्वशक्तिमत्त्वं व्यज्यते । अत्र छन्दो वसन्ततिलका । लक्षणन्तु पूर्वत्रोक्तम् ॥१६॥

ततस्तदनन्तरं मञ्जु –

'कान्तं मनोरमं रुच्यं मनोज्ञं मञ्जु मञ्जुलम् ।'

इत्यमर(३/१/५२)वचनान्मनोरमं तदन्वितहासपरिहासयोराचरणे पेशलः

'दक्षे तु चतुरपेशलपटवः सूत्थान उष्णश्च ।'

इत्यमर(२/१०/१९)वचनाद्दक्षः सरसि रोहति 'रुह-प्रादुर्भावे' इत्यतः प्रादुर्भवतीति पद्मं तदिव आननं यस्य सः नन्दनन्दनः श्रीकृश्णः मन्दं मन्दं गतिर्गमनं यस्मिन् कर्मणि तथा कृत्वा कौतुकात् कौतूहलवशतः आनन्दपूर्वकं वा नवकदम्बशाखिनं प्रफुल्लितकदम्बवृक्षमारुरोह आरोहणं चकार । अत्र छन्दो नाम रथोद्धता । लक्षणं यथा वृत्तरत्नाकरे (३/३९) – 'रानराविह रथोद्धता लगौ' इति । 'म'कार -'द'कारयोः, 'न'कार-'ज'कारयोश्च सकृदावृत्तौ छेकानुप्रासः । सरसीरुहानन इत्यत्र उपमा । नन्दनन्दनः जगदानन्दः इति अर्थान्तरगतिश्च ॥ १७ ॥

गोपाङ्गनावस्त्राण्यपहृत्य वृक्षारूढः स्मेरं दरहसितमाननं मुखं यस्य स नन्दसुतः श्रीकृष्णः पाणिं हस्तमवधूय हस्तान्दोलनेन गोपीर्जलस्थित-गोपरमणीराहूय तासामाकारणं कृत्वा जगाद कथितवान् – हे सुन्दर्यः ! कूले यमुनानदीकूले नवनीपमूले प्रफुल्लितकदम्बवृक्षस्य मूले मत्तो मत्समीपादनुकूलं स्वाभिमतं स्वकीयं वा दुकूलं वस्त्रं नयत गृहाण । अन्यव्यवहृतं वस्त्रं नान्येन व्यवहर्त्तव्यमिति कृष्णेन साधु सूचितम् । धर्मशास्त्रकारास्तथा वदन्ति । यथा

आकर्ण्य वाणीं वनितास्तदानीं
व्रीडावनम्रा यदुनन्दनस्य ।
परस्परं स्मेरमुखारविन्दं
विलोकयन्ति स्म तदा तरुण्यः ॥ १९ ॥

ततस्तत्र क्षणं विभाव्य कृष्णं समूचुः –

आगत्य कूले वसनं विदेहि
सर्वासु दासीषु दयां विधेहि ।
तीव्रप्रतापाय नृपाय यावद्-
भवच्चरित्रं न निवेदयामः ॥ २० ॥

मनुः (४/६६) –

'उपानहौ च वासश्च धृतमन्यैर्न धारयेत् ।
उपवीतमलङ्कारं स्रजं करकमेव च ॥' इति ।

भगवतः प्रेममत्तता अस्मिन् पद्ये व्यज्यते । स्मेरानन इत्यनेन हर्षता । अत्र छन्दो नाम इन्द्रवज्रा । लक्षणन्तु पूर्वत्रोक्तम् । 'न'कारावृत्तौ वृत्त्यनुप्रासः ॥१८॥

अनन्तरं यदुनन्दनस्य श्रीकृष्णस्य वाणीं वचनमाकर्ण्य श्रुत्वा वनिताः गोपाङ्गनास्तदानीं व्रीडावनम्राः 'मन्दाक्षं ह्रीस्त्रपा व्रीडा लज्जा ।' इत्यमर (१/७/२३)वचनाल्लज्जयावनीता जाताः । व्रीडालक्षणं यथा साहित्यदर्पणे (३/१७३) – 'धाष्टर्याभावो व्रीडा वदनानमनादिकृद्दुराचारात् ।' इति । ततः तरुण्यो गोपरमण्यस्तदा परस्परमन्योन्यं स्मेरमुखारविन्दमन्योन्यं विलोकयन्ति पश्यन्ति । अत्र छन्दो नाम उपजातिः । लक्षणन्तु पूर्वोत्रोक्तम् । व्रीडा इत्यत्र व्यभिचारिभावः । स्मेरमुखारविन्दमित्यत्र उपमा ॥ १९ ॥

कृष्णवचनेन लज्जान्विता गोपरमण्यः किञ्चित्क्षणं विचिन्त्य तं कथयन्ति – आगत्येति । हे कृष्ण ! तीव्रः भयङ्करः असह्यः प्रतापः –

'स प्रतापः प्रभावश्च यत्तेजः कोशदण्डजम् ।'

इत्यमर(२/८/२०)वचनात्प्रबलं तेजोऽस्ति यस्य स तीव्रप्रतापः राजा, राज्ञस्तेजोवृत्तमुक्तं यथा मनुना (७/४-६,११) –

'इन्द्रानिलयमार्काणामग्नेश्च वरुणस्य च ।

कृष्णः सदर्पस्ततः किम् –

दास्यो भवत्यो यदि मे युवत्य-
स्तदैत्य गृह्णीत निजांशुकानि ।
नोचेन्न दास्यो वसुधाधिनाथः
किं मे विधातुं क्षमते त्वदर्थम् ॥ २१ ॥

चन्द्रवित्तेशयोश्चैव मात्रा निर्हृत्य शाश्वतीः ॥
यस्मादेषां सुरेन्द्राणां मात्राभ्यो निर्मितो नृपः ।
तस्मादभिभवत्येष सर्वभूतानि तेजसा ॥
तपत्यादित्यवच्चैष चक्षूंषि च मनांसि च ।
न चैनं भुवि शक्नोति कश्चिदप्यभिवीक्षितुम् ॥
यस्य प्रसादे पद्मा श्रीर्विजयश्च पराक्रमे ।
मृत्युश्च वसति क्रोधे सर्वतेजोमयो हि सः ॥' इति ।

तस्मै नृपाय राज्ञे कंसाय शासकाय नन्दाय वा भवच्चरित्रं भवत आचरणं यथा असहायावस्थायां गोपनारीणां वस्त्राणि भवान् अपहरति, अस्मान् नग्नावस्थाया भवतः समीपं गन्तुं च प्रचोदयति, एतत्कर्मासमीचीनम् । अत एवैतत् सर्वं यावत्पर्यन्तं न निवेदयाम आवेदयाम तत्पूर्वं सर्वासु दासीषु गोपराजस्य पुत्रत्वाद्भवतो वयं सेवकास्तस्मादस्मासु दयां विधेहि । कूले आगत्य यमुनाजलप्रवाहसमीपमागत्य अस्माकीनं वसनं परिधानवस्त्रसकलं विदेहि दानं कुरु इति । अत्र छन्दो नाम उपजाति । लक्षणन्तु पूवत्रोक्तम् । 'व'कारानुप्रासः । याचन-तर्जनयोः सन्धिः ॥ २० ॥

गोपाङ्गनावचनं श्रुत्वा कृष्णः सदर्पः दर्पेण सह कथयति – हे युवत्यः ! यदि भवत्यो यूयं मे मम दास्यो भृत्याः किङ्कर्यस्तदा तर्हि एत्य 'इणि-गतौ' इति धातोः ल्यप्प्रत्ययः, अत्रागत्य निजांशुकानि स्वस्वपरिधानवस्त्राणि गृह्णीत नयत नोचेत् यदि भवत्यो न मम दास्यः । अधिकन्तु वसुधायाः –

'सर्वंसहा वसुमती वसुधोर्वी वसुन्धरा ।
गोत्रा नु पृथिवी पृथ्वी क्ष्मावनिर्मेदिनी मही ॥'

इत्यमर(२/१/३)वचनात्पृथिव्या अधिनाथ राजा कंसस्त्वदर्थं, समाहारेऽत्रैक-

ततस्तत्र क्षणं विचिन्त्य शिथिलीकृतलज्जास्तरुण्यः –

अधः समाच्छाद्य कराम्बुजाभ्यां
कुचौ कठोरौ पिहितौ विधाय ।
व्रीडानतास्तावदमन्दमन्द-
मुत्तस्थुरुच्चैर्यमुनाप्रवाहात् ॥ २२ ॥

ततो वृक्षादवरुह्य कृष्णस्ताः प्रति –

उन्मील्य पश्यत दृशः सरसास्तरुण्यो
वस्त्राणि गृह्णत करद्वितयं प्रसार्य ।

वचनप्रयोगः । अतो भवतीनामावेदनविचारेण मे मम किं दण्डं विधातुं क्षमते ? किमपि दण्डं दातुं स न शक्नोतीति भावः । अत्र छन्दो नाम इन्द्रवज्रा । लक्षणन्तु पूर्वत्रोक्तम् । 'व'कारानुप्रासः । भगवति सति न कोऽपि त्राता इति व्यज्यते॥ २१ ॥

कृष्णस्य कठोरवचनं श्रुत्वा क्षणं विचिन्त्य शिथिलीकृता लज्जा याभिस्ता व्रजयुवत्यः कथमपि लज्जां विहाय कराम्बुजाभ्यां पद्मसदृशहस्ताभ्याम् तत अधः स्वशरीरगोपनीयाधोदेशं योनिप्रदेशं वा समाच्छाद्यावरणं कृत्वा, कठोरौ अमर्दितत्वात् कठिनौ कुचौ 'स्तनौ कुचौ ।' इत्यमर(२/६/७७)वचनात् स्तनौ पिहितौ रुद्धौ यतः 'कुच - सङ्कोचे' इति धातोः 'इगुपधज्ञाप्रीकिरः कः' (अष्टाध्यायी. ३/१/१३५) इति सूत्रेण कः, कुचति सङ्कुच्यते वा कुचः इति तौ आच्छादितौ विधाय कृत्वा व्रीडया लज्जयाऽवनता अधोमुखिन्यः सत्यो यमुनानद्याः प्रवाहात् उपरिभागं तटप्रदेशं कदम्बवृक्षमूलं प्रति वाऽऽगन्तुममन्दमन्दं यथाशीघ्रमुत्तस्थुरुत्थानं चक्रुरिति । अत्र छन्दो नाम उपजातिः । लक्षणन्तु पूर्वोत्रोक्तम् । कराम्बुजाभ्यामित्यत्र रूपकमलङ्कारः । कुच इति उद्दीपनविभावः । व्रीडापदेन व्यभिचारिभावः । 'म'कार-'ज'कारयोश्च छेकानुप्रासः ।॥ २२ ॥

उलग्नावस्थाहेतोर्लज्जावशादधोमुखीभूय गोपिका यदा यमुनानदीप्रवाहादुपर्यागच्छन्ति तदा कृष्णः कदम्बवृक्षादवरुह्य ताः प्रति कथयति – हे सरसाः शृङ्गाररसाप्लुतास्तरुण्यो गोपयुवत्यः ! दृशः –

'लोचनं नयनं नेत्रमीक्षणं चक्षुरक्षिणी । दृग्दृष्टी च ।'

नोचेत्तरोरुपरि यामि कदाचनाहं
नायामि गच्छत पुनर्यमुनाजलेषु ॥ २३ ॥

ततः स्मित्वा वनिताः क्षणं विचिन्त्य –

उन्मील्य नेत्रयुगलं स्मितसुन्दरास्यं
सव्रीडितं मुररिपोर्मुखमीक्षमाणाः ।
तत्रैव पाणिकमलद्वितयं प्रसार्य
संप्रार्थयन्ति वसनं सरसास्तरुण्यः ॥ २४ ॥

इत्यमर(२/६/९३)वचनान्नयनान्युन्मील्योन्मोच्य करद्वयं हस्तद्वयं प्रसार्य स्वस्ववस्त्राणि गृह्णत स्वीकुरुत । नोचेदहं पुनः कदम्बतरोरुपरि यामि । कदाचन कदापि नायामि नागमिष्यामि, मत्तो वस्त्राणि न प्राप्स्यथ । लज्जानिवारणाय पुनर्वा यूयं यमुनाजलेषु यमुनाजलप्रवाहमध्यं गच्छत यात । औपश्लेषिकाधारेऽत्र सप्तमीविभक्तिः । जलाधिक्ये बहुवचनप्रयोगः । अत्र छन्दो नाम वसन्ततिलका । लक्षणन्तु पूर्वोत्रोक्तम् । 'सरसास्तरुण्य' इति प्रेयो गुणः । 'प'कारानुप्रासः । 'पश्यत दृश' इत्यत्र ज्ञानदृष्टेः महत्त्वं सूचितम् । ज्ञानादृते नास्ति मुक्तिः ।

नहि ज्ञानेन सदृशं पवित्रमिह विद्यते ।
अध्यात्मज्ञाननित्यत्वं तत्त्वज्ञानार्थदर्शनम् ।
एतज्जज्ञानमिति प्रोक्तमज्ञानं यदतोऽन्यथा ॥

इत्यादिस्मृतिभ्यः दृशः अर्थात् ज्ञानस्य महत्त्वं दर्शितम् । ज्ञानदृष्ट्या जगतः अवलोकनं कर्त्तव्यम् । ज्ञानदृष्ट्या नाम प्रेमदृष्ट्या । प्रेमदृष्ट्या नाम मित्रदृष्ट्या । यदाहुः – 'मित्रस्य चक्षुषा सर्वाणि भूतानि समीक्ष्यन्ताम् । मित्रस्य चक्षुषा सर्वणि भूतानि समीक्ष्ये । मित्रस्य चक्षुषा समीक्षामहे ॥' इति ॥ २३ ॥

कृष्णवचनेन दरहसितमुखा गोपरमण्यः क्षणं चिन्तयित्वा नेत्रयुगलमुन्मील्य उन्मोच्य स्मितेन हास्येन सुन्दरं रुचिरमास्यं मुखं यस्मिन् कर्मणि तत् पुनः सव्रीडितं व्रीडया लज्जया सह यथा स्यात् तथा विधाय मुरनामकस्यासुरस्य रिपोः 'रिपौ वैरिसपत्नारिद्विषद्द्वेषणदुर्हृदः ।' इत्यमर (२/८/१०)वचनाद्वैरिणो मुखमीक्षमाणाः पश्यन्त्यः रसेन शृङ्गाररसेन युक्ताः

कृष्णो विहस्य – मैवम्, पाणी प्रसार्य प्रार्थयतामिति ।

गोप्यस्तदाकर्ण्य –

वामोरुणाऽतिगुरुणा गतवस्त्रमन्य-
मूरुं पिधाय पुलकाञ्चितमुद्वहन्त्यः ।
पाणी प्रसार्य पुरतो यदुनाथ ! देहि
वासांसि सस्मितमिदं प्रमदाः समूचुः ॥ २५ ॥

सरसाः तरुण्यो व्रजाङ्गनास्तत्रैव पाणिः करः तद्रूपकं कमलं पद्मं तद्द्वितयं युगलं प्रसार्य वसनं स्वस्वपरिधानवस्त्रं सम्प्रार्थयन्ति अनुनयसहकारेण याचन्ते । अत्र छन्दो नाम वसन्ततिलका । करद्वितयं प्रसार्य इति प्रपत्तिः । पाणिकमलमित्यत्र रूपकम् । मुररिपुपदेन साहसरसः । अत एव युवतीनां कामासक्तानां मुखं सव्रीडितं जातम् । 'प'कारानुप्रासः शोभते । वसनप्रदानं नाम लज्जाप्रदानम्, यतो हि तन्वीनां भूषणं लज्जा एव भवति ॥ २४ ॥

करप्रसारणं कृत्वा वस्त्राणि प्रार्थनीयानीति आकर्ण्य श्रुत्वा गोप्यः अतिगुरुणा यौवनसन्नद्धत्वात् पृथुलेन विशालेन वामः सुन्दरो य ऊरुः जानोरुपरिभागः, तेन यौवनस्य लक्षणं प्रस्तौति अभिज्ञानशाकुन्तले (१/२२) किशोरकेलिटीकाकारो यथा –

'वदने कान्तिमत्त्वम्, नेत्रयोरनुरागः, कण्ठे कम्बुसाम्यं त्रिरेखावत्त्वं च, कुचयोरौन्नत्यम्, नाभौ निम्नत्वम्, नितम्बे मध्यनिम्नत्वं मांसलत्वं च, जघनजङ्घाजानुषु मांसलत्वम्, ऊर्वोर्विशालत्वं मृदुलत्वं शीतलत्वं च, पदयोर्मदालसत्वमित्यादि ।' इति । अतः तेन ऊरुणा गतं विगतं वस्त्रं यस्मात् गतवस्त्रं वस्त्रहीनमन्यमूरुं जानोरुपरिभागं पिधाय आच्छाद्य पुलकाञ्चितं रोमाञ्चयुतभावमुद्वहन्त्यः रोमञ्चिताः सत्यः प्रमदाः गोपरमण्यः कृष्णस्य पुरतः सम्मुखे पाणी हस्तद्वयं प्रसार्य विस्तार्य हे यदुनाथ यदुकुलस्य नाथ स्वामिन् ! अस्माकं वासांसि शरीराभरणवस्त्राणि देहि इति सस्मितं स्मितेन हास्येन सह यथा स्यात्तथा इदं समूचुः कथितवत्यः इति । अत्र छन्दो नाम वसन्ततिलका । 'व'कार-'प'कारयोः अनुप्रासः । पुलक इत्यत्र सात्त्विकभावः ॥ २५ ॥

गोपिकाऽऽचरणेन कृष्णो हसित्वा मैवमिति कथयति । अनन्तरमुपदिशति

कृष्णः पुनर्विहस्य – मैवम्,

दण्डायमानौ चरणौ विधाय नेत्रे मदीये नयने पिधाय ।
प्रसार्य पाणी रमणीसमूहा यूयं पुनः प्रार्थयतांशुकानि ॥ २६ ॥

अत्रेति विचिन्त्य –

ऋजुकृताङ्गाः कृतमन्दहासा व्रजाङ्गना विस्तृतपाणिपद्माः ।
पुरःप्रदेशे यदुनन्दनस्य लज्जां विहायांशुकमर्थयन्ति ॥ २७ ॥

हे रमणीसमूहाः ! यूयं स्वस्वचरणौ दण्डायमानौ विधाय दण्डायमानाः सत्यो मदीये नेत्रे मम नयनयुगले स्वस्वनयने पिधाय एकाग्रचित्तेन संस्थाप्य पाणी स्वस्वकरद्वयं प्रसार्य विस्तार्य पुनः अंशुकानि वस्त्राणि प्रार्थयत । समाहितात्मा आत्मनि परमात्मानं पश्यति इति भगवान् निर्दिदिश । स्थूलशरीरे लज्जां वासनां वा विहाय कृष्णगतप्राणा एव परां सिद्धिमवाप्नुयुरित्यनेन बोध्यते । वस्तुतः चित्तवृत्तिनिरोधेन सफलता अधिगम्यते । तदुक्तं पतञ्जलिना (१/२,३) – 'योगश्चित्तवृत्तिनिरोधः ॥ तदा द्रष्टुः स्वरूपेऽवस्थानम् ॥' इति । उक्तञ्च याज्ञवल्क्येन (१/५) –

'अयं तु परमो धर्मो यद्योगेनात्मदर्शनम् ॥' इति ।

अत्र छन्दो नाम उपजातिः । विधाय पिधाय इत्यत्र चारुत्वातिशयः । 'प'कारानुप्रासः॥ २६ ॥

अत्र इति विचिन्त्य कृष्णस्य वचनं विचार्य ऋजुकृतानि 'ऋजावजिह्मप्रगुणौ ।' इत्यमर(३/१/७२)वचनात् सरलीकृतानि अङ्गानि याभिस्ताः ऋजुकृताङ्गाः कृतं मन्दं हास्यं याभिस्ताः कृतमन्दहासाः विस्तृतौ पद्मरूपकौ पाणी यासां ताः विस्तृतपाणिपद्माः व्रजाङ्गनाः गोपरमण्यः यदुनन्दनस्य श्रीकृष्णस्य पुरःप्रदेशे सम्मुखे स्थित्वा उलग्नावस्थापन्नाः सत्योऽपि लज्जां विहाय परित्यज्य श्रीकृष्णनिर्देशानुसारं स्थूलशरीरवासनां परित्यज्य वा स्वास्वांशुकानि परिधानवस्त्राणि अर्थयन्ति विनयसहकारेण याचन्ते इति । अत्र छन्दो नाम उपजातिः । पाणिपद्मा इत्यत्र रूपकम् । 'व'कारानुप्रासः । अत्र लज्जा व्यभिचारिभावः ॥ २७ ॥

ततस्तासां गोपीनां गोपरमणीनां निभृता अपावृता या तनुः –

ततस्तु तासां –

गोपीनां निभृततनोरशेषशोभा-
मालोक्य स्मितवदनस्तथा परीतः ।
स्वेदान्तःपुलकयुजा कराम्बुजेन
प्रत्येकं वसनमिदं ददौ मुकुन्दः ॥ २८ ॥

ततः –

आलिङ्गनानि निविडानि च चुम्बनानि
तस्मादवाप्य यदुनन्दनतोऽंशुकानि ।

'गात्रं वपुः संहननं शरीरं वर्ष्म विग्रहः ।'

इत्यमर(२/६/७०)वचनाच्छरीरं तस्य आपादमस्तकमनावृत्तत्वादशेष-शोभामत्यन्तं मनोहररूपमालोक्य स्मितवदनो दरहसितमुखः तथा परीतः तथाऽऽनन्दयुक्तः सन् मुकुन्दः सामोदः दामोदरः स्वेदान्तःपुलकयुजा घर्मरोमाञ्चयुक्तेन कराम्बुजेन करपद्मेन प्रत्येकमेकमेकं कृत्वा इदं त्वदीयमिदं त्वदीयमिति गोपिकानां वसनं ददौ दत्तवान्, भगवतः सर्वज्ञत्वात् ; 'तान्यहं वेद सर्वाणि न त्वं वेत्थ परन्तपः ।' इत्यादि गीतोक्तप्रामाण्यात् । अत्र छन्दो नाम प्रहर्षिणी । एतल्लक्षणं यथा वृत्तरत्नाकरे (३/७१) – 'म्नौ ज्रौ गस्त्रिदशयतिः प्रहर्षिणीयम् ।' इति । कराम्बुजेन इत्यत्र रूपकम् । स्वेदान्तपुलकम् इत्यत्र व्यभिचारिभावः । स्मितवदन इत्यत्र हास्यभेदः । 'त'कारानुप्रासः ॥ २८ ॥

सहृदयानां स्वात्मस्थितिप्रकाशकार्यान्तरधर्मसम्भूताः विकाराः सात्त्विकाः कथ्यन्ते । अनुभावतो भिन्नाः प्रशस्ता एते सात्त्विका अष्टौ भवन्ति । तदुक्तं भरतनाट्यशास्त्रे (७/९५) –

'स्तम्भः स्वेदोऽथ रोमाञ्चः स्वरभेदोऽथ वेपथुः ।
वैवर्ण्यमश्रु प्रलय इत्यष्टौ सात्त्विका मताः ॥' इति ।

एतेषां स्वरूपाणि प्रतिपादितानि साहित्यदर्पणे (३/१४६) यथा –

'स्तम्भश्चेष्टाप्रतिघातो भयहर्षामयादिभिः ।
वपुर्जलोद्गमः स्वेदो रतिधर्मश्रमादिभिः ॥
हर्षाद्भुतभयादिभ्यो रोमाञ्चो रोमविक्रिया ।

साङ्केतिकं किमपि कुञ्जगृहं विधाय
सानन्दमिन्दुवदनाः स्वगृहाणि जग्मुः ॥ २९ ॥
श्रीः । इति वसनचौर्यकेलिवर्णनं समाप्तम् ॥ १ ॥

मदसम्मदपीडाद्यैर्वैस्वर्यं गद्गदं विदुः ॥
रागद्वेषश्रमादिभ्यः कम्पो गात्रस्य वेपथुः ।
विषादमदरोषाद्यैर्वर्णान्यत्वं विवर्णता ॥
अश्रु नेत्रोद्भवं वारि क्रोधदुःखप्रहर्षजम् ।
प्रलयः सुखदुःखाभ्यां चेष्टाज्ञाननिराकृतिः ॥' इति ।

गोपिकाभिर्मिलनात् श्रीकृष्णशरीरे स्वेदरोमाञ्चौ जातौ इत्येव तत्र कारणम् । विवस्त्रायाः नार्याः यौवनदर्शनं नोचितम् । तदुक्तं मनुना (४/४४,५३) –

'नाञ्जयन्तीं स्वके नेत्रे न चाभ्यक्तामनावृताम् ।
न पश्येत् प्रसवन्तीं च तेस्कामो द्विजोत्तमः ॥
नाग्निं मुखेनोपधमेन्नाग्नां नेक्षेत च स्त्रियम् ।' इत्यादि ।

उपभोगव्यतिरेकेणापि नग्नां स्त्रियं न पश्येत् । तदुक्तं याज्ञवल्क्येन (१/१३५) यथा – 'नेक्षेतार्कं न नग्नां स्त्रीं न च संसृष्टमैथुनाम् ।' इति ।

परमार्थतस्तु जीवपरमयोः सम्पर्के आचरणमिदं न दोषायेति । श्रीकृष्णात् अंशुकानि स्वस्ववस्त्राणि अवाप्य गोप्यः ततोऽपि निविडानि आलिङ्गनानि चुम्बनानि च अन्वभवन् ।

शृङ्गारस्य द्वौ भेदौ, सम्भोगो विप्रलम्भश्चेति । सम्भोगस्यापि पुरुषकर्त्तृका आलिङ्गनादिभेदाः षोडश । तदुक्तं मदनकेलितरङ्गिण्यां (७/१५-२१) –

'आलिङ्गनं तु प्रथमं द्वितीयं चुम्बनं तथा ॥
तृतीये प्रियसम्वादं नखघातं चतुर्थके ।
पञ्चमे दन्तघातं च षष्ठे कामप्रबोधनम् ॥
सप्तमे कामचलनं मुष्ट्या हृद्धतिरष्टमे ।
कुचाकर्षं तु नवमे पार्श्वयोर्योतनं तथा ॥' इत्यादि ।

आलिङ्गनप्रकाराश्चोक्ता मदनकेलितरङ्गिण्यां (५/५१) यथा –

'वृक्षारुढकसंज्ञकं प्रथमतस्तस्माल्लतावेष्टितं

सिद्धार्थं तदनन्तरं विरचयेच्चोरूपगूढं ततः ।
ज्ञातव्यं तिलतण्डुलं रसविदामालिङ्गनं योषितां
क्षीरनीरपुरःसरं निगदितं तस्मात्तु लालाटिकम् ॥' इति ।

एतेषामालिङ्गनानां लक्षणान्युक्तानि तत्रैव (५/५२-५८) यथा –

'दोर्भ्यां समाकृष्य तु कण्ठदेशं पादेन पादं निभृतं निबध्य ।
मध्येऽन्तरालं यदि भाति कामी महीरुहारूढकसंज्ञकं तत् ॥
गाढं समालिङ्ग्य पदं पदेन प्रसज्य कामी कुचदत्तवक्त्रः ।
आलिङ्गति प्रोल्लसताङ्गयष्टिं ज्ञेयं लतावेष्टितमेवमेतत् ॥
एकेन पादेन निबध्य पादमन्येन चाक्रम्य विदूरभागम् ।
आपीड्य दोर्भ्यामपि पृष्ठदेशं सिद्धार्थमालिङ्गनमेतदाहुः ॥
कान्तो मनोजव्यथिताङ्गयष्टेरापीडयेदूरुयुगं युवत्याः ।
ऊरूपघातेन कविप्रवीरैरुरूपगूढं तदिदं प्रदिष्टम् ॥
यद्बाहुवक्षोजघनेन गाढमन्योन्यसंसक्तशरीरयष्ट्योः ।
कान्तस्य दार्ढ्यं श्लथतामुपैति त्वालिङ्गनं तत्तिलतण्डुलाख्यम् ॥
गात्रोपरिष्टादथ तन्विमध्ये संनीयते यन्मिथुनं शरीरम् ।
कामाभिमानक्षतपूर्वलिङ्गमालिंङ्गनं क्षीरजलप्रदिष्टम् ॥
अन्योन्यसंसर्गमुखं च बाहुनेत्रं ललाटं हृदयं कपोलम् ।
आनन्दसन्दोहनिमीलिताक्षं लालाटिकं तत् प्रवदन्ति सन्तः ॥''इति

चुम्बनस्थानानि प्रतिपादितानि तत्रैव । तद्यथा (५/५९) –

'गण्डस्थली मस्तकदन्तवासो ग्रीवा कुचोरःस्थलचूचुकाक्षि ।
आलिङ्गनानन्तरमेव यूनोः स्थानं तु चुम्बस्य वदन्ति तज्ज्ञाः ॥'

अन्ये तु – 'मुखे स्तने ललाटे च कण्ठे च नेत्रयोरपि ।
गण्डे च कर्णयोश्चैव कक्षोरुभगमूर्ध्निषु ॥
चुम्बनस्थानमित्युक्तं विज्ञेयं कामुकैरिह ।' इति ।

चुम्बनाभिधानान्यपि तत्रैव (५/६०-६६) यथा –

'कपोलयुग्मं च नितम्बवत्याः कन्दर्परागात्तरुणप्रवीराः ।
चुम्बन्ति कामं तरलायताक्ष्यास्तच्चुम्बनं प्राहुरिदं समानम् ॥

कान्तोऽङ्गनाया वदने स्वकीयमाक्षिप्य वक्त्रं कुतुकेन यतः ।
नो चुम्बति क्रोधवशेन नारी तच्चुम्बनं त्वेकरसाभिधानम् ॥
पत्युर्मुखे स्ववदनं निवेश्य प्रेम्णा मनाक् पुनश्चुम्बति चारुवक्त्रम्।
तनूरुहं गाढतरं निपीय शमाख्यमेतत् स्फुरित वदन्ति ॥
कान्ताऽपि नेत्रं परिमील्य भर्त्तुः संमीलिताक्षी वदने स्वजिह्वाम् ।
निक्षिप्य च क्रीडति यत्र लोला ख्यातं रतिज्ञैरिदमूर्ज्जसंज्ञम् ॥
हस्ताङ्गुलीसंपुटकेन यत्र कान्तौष्ठमादाय कृतानुरागा ।
पुनःपुनश्चुम्बति यदन्तघातमृते तदाहुः प्रतिताभिधानम् ॥
कान्तामुखं वाऽधरसंपुटेन पीत्वा मृदु स्वादयति क्रमेण ।
नारी च तेनैव विधानयोगाज्ज्ञेयं मुनीन्द्रै रतिसंपुटाख्यम् ॥
ओष्ठेन कान्तौष्ठयुगं निपीय जिह्वां निधायाप्यथ तालुभागे ।
चुम्बोत्सवं नृत्यति यत्र नारी प्रोक्तं तदौष्ठ्यं मुनिभिः पुराणैः ॥'इति ।

प्रणयोन्मत्ता गोप्यो यदुनन्दनतः श्रीकृष्णात् स्वस्ववस्त्राणि प्राप्य निविडानि आलिङ्गनानि चुम्बनानि च समनुभूय कुञ्जगृहं तत्र साङ्केतिकं किमपि विधाय किञ्चित्सङ्केतं कृत्वा परिचयार्थं यत एता अत्रागत्य मिलिताः – एतत् अन्ये जानीयुरिति बोधनार्थम् एवं लतागृहं त्यक्त्वा आनन्देन सह स्वगृहाणि विश्रामनिकेतनानि प्रति जग्मुः गतवत्यः । अत्र छन्दो नाम वसन्ततिलका । इन्दुवदना इत्यत्र उपमा । आलिङ्गनानि चुम्बनानि चेति रतेः अनुभावाः । आलिङ्गनानि इत्यत्र माधुर्यम् । चुम्बनानि इत्यत्रापि । सानन्दमिन्दुवदना इत्यादौ चेति ज्ञातव्यम् ।

अङ्केऽस्मिन् आदौ मालिनी नाम छन्दो वर्णितम् । काव्यशास्त्र-नियमानुसारम् एतदतिरिक्तस्य कस्यचन छन्दसो व्यवहारो हि अन्ते कर्त्तव्य इति मनसि निधाय छन्दसः परिवर्तनं कृतं दृश्यते । अत्र माधुर्योपेतस्य वसन्ततिलकारूपस्य छन्दसो व्यवहारः कृतो भक्तकविना इति ।

इति दानखण्डनाटिकाया विश्वनाथस्वाईँ कृतायां सुधाव्याख्यायां प्रथमोऽङ्कः समाप्तः ॥ १ ॥

******

द्वितीयोऽङ्कः

ततो दिनान्तरे दधिविक्रयार्थं मथुरां व्रजन्तीनां गृहीतधुराणामग्रत एवोपसरन् –

राधानुरोधवशतो निजलीलया च
स्कन्धे निधाय दधिभारमपारमायः ।
कौतूहलेन कपटेन च मन्दमन्दं
कृष्णः कलिन्दतनयातटमाजगाम ॥ १ ॥

अथाऽत्र दानखण्डनाटिकाया द्वितीयोऽङ्कः प्रारभ्यते – **तत इति** । गोपवनितानां वस्त्रापहरणकल्यनन्तरं पुनरेकदा श्रीकृष्णोऽपरां केलिमारब्धवान् । मथुरा-गोपयोर्मध्ये यमुनानदी प्रवहति । पुराकाले गोपनगरीतो जनाः क्षीरादिविक्रयार्थं प्रतिदिनं यमुनानदीमतिक्रम्य मथुरानगरीं गच्छन्ति स्म । एकदा दधिविक्रयार्थं मथुरां व्रजन्तीनां गच्छन्तीनां गृहीतधुराणां धुरा भारा गृहीताः याभिस्तासां राधादिगोपवनितानामग्रतः सम्मुखे उपसरन् चलन् राधाया अनुरोधवशतः 'अनुरोधोऽनुवर्तनम्' इत्यमर(२/८/१२)वचनादाग्रहवशात् तथा च निजलीलया, लीला –

'अङ्गैर्वेशैरलङ्कारैः प्रेमिभिर्वचनैरपि ।
प्रीतिप्रयोजिते लीला प्रियस्यानुकृतं विदुः ॥'

इति मदनकेलितरङ्गिण्यां (३/१०, ११) रघुनाथदाशवचनात्,

'लीलां विदुः केलिविलासखेलाशृङ्गारभावप्रभवक्रियासु ।'

इति विश्वकोषवचनाच्च स्वाभीष्टशृङ्गारकेलिः, तत्प्रदर्शनेन दध्नो भारं स्कन्धे निधाय संस्थाप्य अपारमायोऽपाराऽपरिमिता माया अस्ति यस्य स – एका माया न विद्यते, बह्वीर्माया बहतीति यो नैकमायशब्दाभिधेयः, 'मम माया दुरत्यया' इति भगवद्गीता(७/१४)वचनात् यो मायाविनामपि मायाकारित्वात् महामाया इत्यभिधेयः सः मायाधरः इत्थं च –

ततो निखिलभारिणं पश्चादुद्वर्त्तनं कृष्णमालोक्य राधा जगाद –

आदाय भारमखिलाः किल राजधानी-
मेणीदृशः सरभसं तरसा प्रयाताः ।
मत्वा च ताः प्रथमतो यदुनन्दनोऽत्र
तक्रादिविक्रयणमङ्गलमाचरन्ति ॥ २ ॥

'स्वमायया स्वमात्मानं मोहयन् द्वैतमायया ।
गुणाहितं स्वमात्मानं लभते च स्वयं हरिः ॥'

इतिश्रीविष्णुसहस्रनामशाङ्करभाष्य (श्लो.१०) वचनानुसारमेवं यः साधयति स भगवान् श्रीकृष्णः कौतूहलेन –

'रम्यवस्तुसमालोके लोलता स्यात्कुतूहलम् ।'

इति मदनकेलितरङ्गिणी(३/२१)वचनात् कौतुकवशात् कपटेन –

'कपटोऽस्त्री व्याजदम्भोपधयश्छद्मकैतवे ।'

इत्यमर(१/७/३०)वचनात् छलेन मन्दं मन्दं धीरं धीरं कलिन्दस्य कलिन्दनामकपर्वतस्य या तनया तनोति विस्तारयति कुलं वंशं वेति तनयः 'आत्मजस्तनयः सूनुः सुतः पुत्रः ।' इत्यमर(२/६/३०)वचनात् पुत्रः, ततः 'अजाद्यतष्टाप् ।' इत्यष्टाध्यायी(४/१/४)वचनेन पुत्री तनया, तस्या यमुनानद्यास्तटं कूलप्रान्तमाजगम आगमनं चकार इति । अत्र छन्दो नाम वसन्ततिलका । 'ध'कारानुप्रासः । 'क'कारानुप्रासश्च । 'म'कार- 'द'कारयोः छेकानुप्रासः । दध्नः शुभावहत्वं 'दधिमधुरजतमि'ति माङ्गलिकवचनात् ॥१॥

तदनन्तरं निखिलभारिणं समस्तभारिणं पश्चात् उद्वर्त्तनं वर्त्तमानं कृष्णं दृष्ट्वा राधा जगाद कथितवती – आदायेति । अखिला निवृत्तं नास्ति वा खिलमंशविशेषो यासां ताः सकलाः एणीदृशः, एणी –

'गोकर्णपृषतैणर्श्यतेरोहिताश्चमरो मृगाः ।'

इत्यमर(२/५/१०)वचनात् मृगो हरिणः तस्मिन् 'पुंयोगादाख्यायाम् ।' इत्यष्टाध्यायी(४/१/४८)सूत्रेण ङीप्-कृते एणी तदिव दृशो नयनानि सर्वदा चपलनयनानि यासां ता मृगलोचना दधिभारमादाय गृहीत्वा सरभसमत्यन्तवेगेन तरसा 'तरो वेगे बलेऽपि च ।' इति त्रिकाण्डशेष(३/४४५)वचनात् वेगेन, अत्र

तत्किं विलम्ब्यसे, अपरश्च –

क्रीते जनेन सुलभेन विनीततक्रे
क्रेता पुनः सुभग एव भवेच्च भारिन् ! ।
तद्गच्छ वत्सलतया मथुरानगर्यां
तक्रादिविक्रयणमाशु यथाऽभ्युपैमि ॥ ३ ॥

कृष्णः क्षणं निःश्वस्य –

पादद्वन्द्वं न चलति चलापाङ्गि ! मे स्कन्धयुग्मं
भूयो भूयः सुदति ! महतीं वेदनामभ्युपैति ।

प्रथमतः सरभस-पदस्य क्रियाविशेषणत्वे व्यवहारः, तरसेति द्वितीयस्य व्यवहारेण अत्यधिकवेगेन इत्यवधेयम्, तेन ताः राजधानीं कंसराजस्य निवासनगरीं मथुरां प्रयाता गता सन्ति । ततस्ता गोपरमण्यो यदुनन्दनः अत्र अस्ति इति मत्वा मनसा संबुध्य चिन्तयित्वा प्रथमतः सर्वप्रथमं तक्रादेः –

'तक्रं ह्युदश्विन्मथितं पादाम्ब्वर्धाम्बु निर्जलम् ।'

इत्यमर(२/९/५३)वचनात् गोरसविकारादेर्विक्रयणे मङ्गलमाचरन्ति विक्रयारम्भं कुर्वन्तीत्यर्थः । तक्रादेः माङ्गलिकत्वं भगवता सूचितम् । इदानीं जना अपि यात्राऽवसरे माङ्गलिकार्थं दधि स्वीकुर्वन्ति । एणीदृशः इत्यत्र आलम्बनविभावः उक्तः । 'स'कारः वृत्त्यनुप्रासः । किल इति वाक्यालङ्कारः । अत्र छन्दो नाम वसन्ततिलका ॥ २ ॥

तत्किं किमर्थं विलम्ब्यसे विलम्बं करोषि इति कथयित्वा राधा पुनः वदति – क्रीत इति । हे भारिन् ! भारवाहक कृष्ण ! तत्र विनीततक्रे विशेषेण नीते तक्रे सुलभेन एकाधिकेन पर्याप्तपरिमाणेन वा जनेन क्रीते सति क्रयणविषये हे सुभग ! भवानेव क्रेता भवेत् । अतः तत् तस्मात्कारणात् वत्सलतया स्नेहशीलतया मथुरानगर्यां मथुरां त्वं गच्छ यथा तस्यां नगर्यामाशु शीघ्रं तक्रादिविक्रयणमभ्युपैमि अभ्युपगच्छामि इति । 'मथुरानगर्य्यामि'त्यत्र द्वितीयार्थे सप्तमीप्रयोगः । वसन्ततिलकं वृत्तम् । अत्र वात्सल्य रसः । 'त'कारस्य असकृदावृत्तौ वृत्त्यनुप्रासः ॥३॥

राधावचनेन कृष्णः क्षणं निःश्वस्य कथयति – हे चलापाङ्गि ! चलौ

शुष्यत्युच्चैस्तरणिकिरणश्रेणिभिस्तन्वि ! कण्ठ-
स्तद्विश्रामं रचय चपले ! मञ्जुकुञ्जोदरेऽस्मिन् ॥ ४॥

राधा – गच्छ, किमद्भुतम् ।

कृष्णः कतिचित् पदानि गत्वा –

सीदामि सुन्दरि ! पयोदधिभारखिन्न-
स्त्वं चापि पीवरपयोधरभारखिन्ना ।

चञ्चलौ चपलौ अपाङ्गौ –

'अपाङ्गस्त्वङ्गहीने स्यान्नेत्रान्ते तिलकेऽपि च ।'

इति मेदिनीवचनात् नेत्रप्रान्तभागौ स्तौ यस्याः सा त्वं, अनेन कटाक्षो गृह्यते । मे मदीयं पादद्वयं पदयुगलं न चलति, हे सुदति ! सुशोभनाः दन्ताः सन्ति यस्याः सा त्वं, तव स्कन्धयुग्मं भूयो भूयः पुनः पुनर्भारवहनवशान्महतीं वेदनामभ्युपैति पीडामनुभवति । हे तन्वि ! हे कृशाङ्गि ! उच्चैः प्रखरैः तरणिकिरणश्रेणिभिः –

'द्युमणिस्तरणिर्मित्रश्चित्रभानुर्विरोचनः ।'

इत्यमर(१/३/३०)वचनात्तरणिः सूर्यः, तस्य किरणश्रेणिभिः किरणसमूहैः मम कण्ठः शुष्यति तृषार्त्तोऽहमधुना जात इत्यर्थः । तत् तस्मात् हे चपले ! अस्मिन् मञ्जुकुञ्जोदरे रमणीये कुञ्जोदरे –

'निकुञ्जकुञ्जौ वा क्लीवे लतादिपिहितोदरे ॥'

इत्यमर(२/३/८)वचनाल्लतादिभिः पिहितस्थानेऽस्मिन् यमुनातटस्थमनोरम-लतागृहे विश्रामं रचय विरामावस्थां निर्व्यापारावस्थां मनोज्ञकेलिदशां वा सम्पादय। अनेन मथुरां गन्तुं श्रीकृष्णस्य अक्षमताच्छलेन श्रीराधया सह सुरतक्रीडाकरणार्थं समधिक आग्रहो व्यज्यते । अत्र छन्दो नाम मन्दाक्रान्ता। लक्षणं यथा वृत्तरत्नाकरे (३/९४) –

'मन्दाक्रान्ता जलधिषडगैर्म्भौ नतौ तादृगुरू चेत् ।' इति ।

चलापाङ्गि इत्यनेन अनुभाव उक्तः । तन्विपदेन आलम्बनविभावः । 'व'कारानुप्रासः । मञ्जुकुञ्ज-इत्यादौ माधुर्यम् । 'ण'कारानुप्रासः ॥ ४ ॥

'गच्छ किमद्भुतम्' इति राधायाः विरक्तिमूलकवचनेन कृष्णः किञ्चित् दूरं गत्वा कथयति – हे सुन्दरि ! पयोदधिभारेण खिन्नः श्रान्तोऽहं सीदामि

तन्मन्दमारुतमुखे क्षणमत्र कुञ्जे
विश्राममाचर सरोजदलायताक्षि ! ॥ ५ ॥

राधा सरोषम् –

यत्नात् कथञ्चन कियन्ति पदानि गत्वा
स्कन्धे जनार्दन ! परिश्रममातनोषि ।
जाने पुनः पुनरहं बहुधा तथापि
त्वां भारिणं कपटचारिणमादधामि ॥ ६ ॥

पीडामनुभवामि । त्वं राधाऽपि पीवरयोः 'पीवरः स्थूलकूर्मयोः ।' इति हैम (३/६१४)वचनात् पृथुलाकारयोः पयोधरयोः –

'पयोधरः कुचे मेघे कोशकारे कशेरुणि ।'

इति हैम (४/२७७)वचनात्कुचयोः स्तनयोर्भारवहनेन खिन्ना श्रान्ता पीडिताऽसि । तस्मात् हे सरोजदलायताक्षि ! सरसि जायत इति सरोजं पद्मम्, तत्पुष्पस्य दलवत् आयते विष्फारिते अक्षीणि यस्याः सा त्वं, मन्दं धीरं यो मारुतः – 'समीरमारुतमरुज्जगत्प्राणसमीरणाः ।' इत्यमर(१/१/६५) वचनाद्यत्पवनो वहति तन्मुखे कुञ्जे लतागृहे क्षणं क्षणमात्रं विश्राममाचर विश्रामं कुरु । वसन्ततिलकं वृत्तम् । सरोजदलायताक्षि इत्यत्र उपमा । पयोधरपदम् उद्दीपनविभावरूपम् । क्षिन्न-कुञ्ज-इत्यत्र माधुर्यम् । 'प'कारानुप्रासः ॥ ५ ॥

कृष्णवचनेन रुष्टा सती राधा कथयति – हे जनार्दन ! जननं जनः, भावे घञ् । जनो जन्म, तम् अर्दयति, 'अर्द - हिंसायामि'त्यतो हिनस्ति विनाशयति अथवा जनान् दुर्जनान् अर्दयति हिनस्ति अथवा पुरुषार्थमभ्युदयनिःश्रेयसलक्षणं जनैरर्द्यते 'अर्द-याचने' इत्यतो याच्यते अथवा जनान् दुर्जनान् अर्दयति 'अर्द-गतौ' इत्यतो नरकादीन् गमयति अथवा जनाः समुद्रस्थदैत्यभेदास्तेषामर्दनो विनाशकारीन् यस्त्वं हे श्रीकृष्ण ! कियन्ति पदानि केनचित्प्रकारेण गत्वा दधिभारवहनेन स्वस्कन्धे परिश्रममातनोषि अनुभवसि । इदं बहुधा बहुप्रकारेण पूर्वमहं जानेऽन्वभवम्, अधुनाऽपि इदं जानेऽहं यत्त्वं मनसि कपटभावमाधायैवं कथयसि । यद्यपि सर्वेषां भारं वहसि तथापि मद्भारवहनविषयेऽन्यः कश्चिद् भावस्ते मनसि विद्यते । अत एव त्वां भारिणमपि

कृष्णः – नाहं कपटी, किन्तु –

भारं नितम्बकुचयोरनिशं वहन्ती
तत्क्लाम्यसि त्वमबला कमलायताक्षि ! ।
तेनात्र कर्मणि मया विहितः प्रयासः
को वेद दुग्धदधिभारभरो गरीयान् ॥ ७ ॥

कपटचारिणं कपटं छलं तस्मिन् चरति यस्तमादधामि गृह्णामि । जानन्त्यपि निरुपाया न किमपि कर्त्तुं शक्नुयामहं यत उक्तमभियुक्तैः –

'अवश्यंभाविभावानां प्रतिकारो भवेद्यदि ।
तदा न दुःखैर्लिप्येरन्नलरामयुधिष्ठिराः ॥' इति ।

वसन्ततिलकं नाम वृत्तम् । जनार्दन इत्यत्र अर्थान्तरगतिः । जनान् अर्दयति मारयति इति जनार्दनः । अयं तु अर्थः सर्वदा न संगच्छते । अत एव जनान् दुर्जनान् इत्यर्थः । 'प'कारानुप्रासः । अत्र कपटपदेन भगवतः अर्थान्तरूपत्वं द्योत्यते । मायां समादाय स अनन्तरूपं धारयितुं सर्वथा समर्थः । तस्य क्लेशभारो नास्ति । अत एव कृष्णोऽयं न वसुदेवसुतः अपि तु वासुदेवः वसति सर्वेषु जनेषु अन्तःसाक्षिरूपेण, बहिःसाक्षिरूपेण अर्थात् सूर्यचन्द्रादिरूपेण इत वासुदेवः – 'आदित्यचन्द्रावनिलोऽनलश्च
द्यौर्भूमिरापो हृदयं यमश्च ।
अहश्च रात्रिश्च उभे च सन्ध्ये
धर्मो हि जानाति नरस्य वृत्तम् ॥' इत्यक्तेः ।

अत्र धर्मः भगवान् श्रीकृष्णः । जगद्भारवहनात् कृष्णोऽयं भारी । कपटाचरणात् कपटी । एवं बहुरूपी च अयम् ॥ ६ ॥

राधावचनेन 'नाहं कपटी' इति प्रतिवादं कुर्वन् श्रीकृष्णः कथयति – हे कमलायताक्षि ! कमलं विशेषतः प्रस्फुटितपद्मं तद्वदायते विष्फारिते वाऽक्षीणि यस्याः सा त्वं, नितम्बस्य कामुकैर्निभृतं तम्यते काङ्क्ष्यते यः 'पश्चान्नितम्बः स्त्रीकट्याः' इत्यमर(२/६/७४)वचनात् स्त्रीकटिप्रदेशस्याधोभागो यस्तस्य, कुचद्वयस्य स्तनद्वयस्य च भारमनिशं 'सततानारताश्रान्तसंततताविरतानिशम् ।' इत्यमर(१/१/६९)वचनात् सर्वदा त्वमबलाऽपि अनिशमिमं भारं वहन्ती

राधा – यद्यप्येवं तदा –

भारं जहीहि यदुनन्दन ! मन्दमन्द-
मागच्छ गच्छ परिरक्षितुमत्र वत्सान् ।
अन्यं धुरीणमिह धुर्वणताप्रवीणं
गृह्णामि येन सहसा मथुरां व्रजामि ॥ ८ ॥

वर्त्तसे । अबलेत्यत्रात्वेऽर्थे नञ व्यवहारः । गण्डस्योपरि स्फोट इवाधुना यदि इमं दधिभारं वहसि तर्हि श्रमाधिक्येन त्वं क्लाम्यसि क्लान्तिमनुभवसि । तेन मयाऽत्र दधिभारवहनकर्मणि प्रयासो यत्नो विहितः सम्पादितः न चेत् दुग्धदधिभारस्य भरो भार एव गरीयान् अधिक इति को वेदो ज्ञाता ? न तथा भार इति । अत्र छन्दो नाम वसन्ततिलका । कमलायताक्षि इत्यत्र उपमा । नितम्बकुचौ उद्दीपनविभावरूपौ । अवला इति आलम्बनविभावः । 'द'कारानुप्रासः । क्लाम्यसि इत्यत्र सात्त्विकभावः ॥ ७ ॥

श्रीकृष्णवचनेन स्वप्रतिक्रियां प्रकाशयति राधा – यद्यप्येवं तदेति । हे यदुनन्दन ! यदि त्वत्कृते भारोऽधिको भवति तदा तर्हि मन्दमन्दं धीरं त्वमागच्छ । इह तमेव भारं जहीहि परित्यज । वत्सान् गोबालकान् परिरक्षितुं परिपालयितुं चारयितुं वा गच्छ । कार्यसम्पादनार्थमहं धुर्वहने धुः भारः तद्वहनकर्मणि प्रवीणं

'प्रवीणे निपुणाभिज्ञविज्ञनिष्णातशिक्षिताः ।
वैज्ञानिकः कृतमुखः कृती कुशल इत्यपि ॥'

इत्यमर(३/२/४)वचनात् कुशलमन्यं धुरीणं धुरन्धरमग्रगामिनं गृह्णामि स्वीकरोमि येन यत्सहायेन सहसा शीघ्रं मथुरानगरीं व्रजामि गच्छामि । वसन्ततिलकं नाम वृत्तम् । 'ग'कार-'च'कार-'छ'काराणां वृत्त्यनुप्रासः । 'ण'कारानुप्रासः । 'म'कार-'न'कारयोः अनुप्रासश्च । यदुनन्दन इति सम्बोधनपदं वैदिकम् । हे अग्ने ! त्वं यदुगृहे तिष्ठति, तस्मात्त्वम् अस्मदीयगृहं प्रति आगच्छ इति ऋषिः अग्निं प्रार्थयते ऋग्वेदे प्रथममण्डले । यदुं नन्दयति इति यदुनन्दः । अत्रापि अर्थान्तरगति । जगतानन्द इति । नन्दन मन्द मन्द गच्छ गच्छ धुरिण धृवणताप्रवीण इत्यत्र माधुर्यम् ॥ ८ ॥

कृष्णो विहस्य – युक्तमेव,

अन्यो धुरीणो ध्रियतां प्रवीण-
स्त्वया न विश्राम्य यतः पदव्याम् ।
विश्राम्य विश्राम्य तले तरूणां
शक्नोमि गन्तुं मथुरानगर्याम् ॥ ९ ॥

राधा साक्षेपमात्मानं प्रति –

दोषो ममैव नितरां यदतो धुरीण-
मन्यं विहाय यदुनाथ ! भवान् गृहीतः ।
विश्राम्यतामिह तु नाम तले तरूणां
वेला गता हि दधिविक्रयणक्रियायाः ॥ १० ॥

कृष्णः हसित्वा राधावचनमङ्गीकृत्य कथयति – हे राधे ! यदि अन्यः कश्चित् प्रवीणो भारवाही मिलति तर्हि त्वया न विश्राम्य क्षणमात्रं विरामं न कृत्वा तेन भारो ध्रियतां नाम । किन्तु स प्रवीणश्चेद्धुरीणोऽग्रगामी भवेत् । तेन धुरीणेन पदव्याम् –

'अयनं वर्त्म मार्गाध्वपन्थानः पदवी सृतिः ।
सरणिः पद्धतिः पद्या वर्त्मन्येकपदीति च ॥'

इत्यमर(२/१/१५)वचनात् पथि त्वया न विश्राम्य अवश्यं गमिष्यते । अहं किन्तु मार्गे तरूणां 'वृक्षो महीरुहः शाखी विटपो पादपस्तरुः ।' इत्यमर (२/४/५)वचनात् वृक्षाणां तले अधःप्रदेशे छायायां विश्राम्य आवश्यकतानुसारं श्रान्तताऽपनोदनाय विरामं कृत्वा मथुरानगर्यां गन्तुं शक्नोमि समर्थो भवामि । अत्र छन्दो नाम इन्द्रवज्रा । 'ध'कार-'र'कारयोः छेकानुप्रासः । विश्राम्य इत्यत्र अपि बहूनां वर्णानां सकृदावृत्तौ छेकानुप्रासः । 'त'कारानुप्रासश्च । मथुरा मधुरानगरी । मधुरत्वञ्च भगवतः योगात्, अन्यथा भयङ्करी नगरी मधुनामकराक्षससंयोगात् । मथुरा इति द्रव्यवाची ॥ ९ ॥

राधा आत्मानम् अन्तर्यामित्वादाक्षिप्य कथयति – हे यदुनाथ ! मम नितरामवश्यमेषः दोषो दूषणमपराधो यत् अन्यं धुरीणं दक्षं भारवहनकारिणं विहाय परित्यज्य नानुसन्धाय न तावत् स्वीकृत्य वा भारवाहकत्वेन भवान्

भगवानेवं श्रुत्वा भारं निक्षिप्य क्षणं विरराम ।

राधा – विश्रान्तोऽसि, भारमादाय व्रज ।

कृष्णः – महान्तमेव भारं नाहमुद्वोढुं क्षमः,

अस्मात्कियन्ति नवनीतपयोदधीनि
भुक्तानि चेदिह भवन्ति मया त्वयाऽपि ।
भारो लघुस्तदनुनीत इव क्षणेन
पारं कलिन्ददुहितुः कमलायताक्षि ! ॥ ११ ॥

श्रीकृष्ण एव गृहीतः स्वीकृतः । पूर्वमिदं यदि मया ज्ञातं स्यात्तर्हि भवान् कदाचिदपि न गृहीतः स्यादिति भावः । यतो हि उक्तं भगवता मनुना (४/६७) –

'नाविनीतैर्व्रजेद्धुर्यैर्न च क्षुद्व्याधिपीडितैः ।' इति ।

इह अत्र तरूणां तले छायासुशीतलस्थाने विश्राम्यतां नाम विगतः श्रमो यथा भवेत्तथा कुरु । त्वया सहावस्थानार्थं मम अवसरो नास्ति हि यतो दधिविक्रयणक्रियायाः निमित्तं वेला –

'अब्ध्यम्बुविकृतौ वेला कालमर्यादयोरपि ।'

इत्यमर(३/३/१९८)वचनात् कालः समयो वाऽपगतो नष्टो भवतीति । अत्र वसन्ततिलकं नाम वृत्तम् । 'व'कारानुप्रासः । 'त'कारानुप्रासश्च । यदुनाथ इत्यत्र चाटूक्तिः ॥ १० ॥

भग इत्यनेन ऐश्वर्यादिषट्कं गृह्यते । तदुक्तं विष्णुपुराणे (६/५/७४) यथा –

'ऐश्वर्यस्य समग्रस्य धर्मस्य यशसः श्रियः ।
ज्ञानवैराग्ययोश्चैव षण्णां भग इतीरणा ॥' इति ।

ऐश्वर्यमस्यास्तीति भगवान् । अपि चोक्तं तत्रैव (६/५/७८) यथा –

'उत्पत्तिं प्रलयं चैव भूतानामागतिं गतिम् ।
वेत्ति विद्यामविद्यां च स वाच्यो भगवानिति ॥'

भगवानितिकथनेन श्रीकृष्ण एतत्सर्वगुणसम्पन्न इति कविना यथार्थमुपन्यस्तम् । राधावचनेन श्रीकृष्णः दधिभारं भूमौ संस्थाप्य विरामं चकार ।

राधायाः साक्षेपोक्तिश्रवणात् गुरुभारवहने स्वस्य असामर्थ्यं प्रकटयन्

राधा विचिन्त्य साक्षेपमात्मानं प्रति –

इह हि वहनदीना गोकुलेषु प्रवीणाः
कति कति न युवानः सन्ति ते ते धुरीणाः ।
तदपि कपटचारी गोपनारीविहारी
कथमिह वनमाली हन्त भारी गृहीतः ॥ १२ ॥

श्रीकृष्णः कथयति – हे कमलायताक्षि ! राधिके ! मया त्वयाऽपि च अस्मात् भारात् कियन्ति किञ्चित्परिमाणेन नवनीतपयोदधीनि क्षीरात् नवं यत् नीतमुद्धृतं भवति यद्वा 'लहुणी' इत्युत्कलभाषायां कथ्यते तदादीनि यद्यत्र भुक्तानि भवन्ति तर्हि अयं भारः लघुः स्वल्पो वा भवेत् । तदनु तदनन्तरं कलिन्ददुहितुः यमुनानद्याः पारमतिक्रमणं कृत्वा अपरतटं क्षणेन तत्क्षणमेव भारो नीतो भवेत् । तद्द्वारा मथुरापुरं शीघ्रं गन्तुं प्रभविष्याव इति भावः । अत्र [illegible] नाम कृतम् । कमलायताक्षि इत्यत्र उपमा । 'व'कारानुप्रासः । कलिन्ददुहितुः, कमलायताक्षि चेति प्रियतराख्यानम् । यदाह ऐतरेयारण्यके –'दुहिता कृपणं परम्' । इति ॥११॥

एवंभूतेन कृष्णवचनेन विचिन्त्य स्वात्मानमाक्षिपन्ती राधा कथयति – इह अस्मिन्नेवावसरे मध्यपथे वहने दुग्धदधिभारवहने दीना –

'निःस्वस्तु दुर्विधो दीनो दरिद्रो दुर्गतोऽपि सः ।'

इत्यमर(३/१/४९)वचनात् असमर्था अहमस्मि । गोकुलेषु गोव्रजेषु गोपपुरे वा कति प्रवीणाः धुरीणाः दक्षाः भारवाहिनः युवानः न सन्ति ? अनेके सन्ति इति भावः । हन्त विषाददायकमेतद्यत् तदपि तथापि कपटचारी छलनामयो गोपनारीविहारी गोपालरमणीभिः सह मन्मथलीलाकारी अथवा तासां वसनचरित्रादीनामपहरणकारी वनमाली –

'आजानुलम्बिनी माला सर्वर्तुकुसुमोज्ज्वला ।
मध्ये स्थूलकदम्बाढ्या वनमालेति कीर्तिता ॥'

इति वाचस्पत्यधृतवचनानुसारं विशिष्टमालां धारयन् अथवा 'भूततन्मात्ररूपां वैजयन्त्याख्यां वनमालां वहन् वनमाली ।' इति श्रीविष्णुसहस्रनामशाङ्करभाष्य (श्लोकः ७३) वचनानुसारं श्रीकृष्णः भारी भारवाहकरूपेण गृहीतो मया स्वीकृतोऽस्ति । कथमहं स्थितेष्वपि बहुषु भारवाहिषु वनमालिनं गृहीतवती ?

ततः कृष्णं प्रति – यथा रोचते तथा क्रियतां येन भारश्चलति ।
कृष्णस्तथा भारं गृहीत्वा दीर्घमुष्णञ्च निःश्वस्य पुनर्भूमौ च चिक्षेप ।
राधा – पणमधिकं प्रयच्छामि, यत्नाद्गृह्यताम् ।
कृष्णः – यद्येवं सुन्दरि ! तदाकर्ण्यताम् –

भारो महानेव पुनर्यदि स्यात् पणो मनोभूर्विहितोऽभिलाषः ।
तदा धुरीणोऽस्मि न वा प्रवीणमन्यं धुरीणं चपले ! गृहाण ॥ १३ ॥

तदप्यहं न जाने । अथवा तं दृष्ट्वा यतोऽहमात्मविस्मृता । अहं मथुरां यावत् दधिभारं नेतुं पारयामि इतिकृत्वा अन्याननपेक्ष्यागता किन्तु इह अर्धपथे एकाऽहमसमर्था जाता अथवा तदानीं न कश्चित् भारवाही मया दृष्टः इतिकृत्वा वनमाली भारवाहीत्वेन गृहीतः अथवा तं वनमालिनं दृष्ट्वा यतोऽहमात्मविस्मृता । अत्र वनमाली भारी इति विरोधो रोचते । 'र'कारानुप्रासः । 'कपटचारी गोपनारीविहारी' इत्यत्र माधुर्यम् । 'प्रवीणः धुरीणः' इति अन्त्यानुप्रासः । 'क'कार-'त'कारयोः छेकानुप्रासः । अत्र छन्दो नाम मालिनी ॥ १२ ॥

ततः प्रकाशं राधा कृष्णं रुच्यनुसारं भारवहनार्थं कथयति किन्तु कृष्णः भारं स्वीकृत्य पुनर्वारं भूमौ चिक्षेप । ततो राधा यथाकालं भारवहने अधिकपणदानार्थं कृष्णं कथयति । पणः कर्षपरिमितेन ताम्रेण निर्मितो मुद्राविशेषः । तदुक्तं मनुना (८/१३६) यथा –

'कार्षापणस्तु विज्ञेयस्ताम्रिकः कार्षिकः पणः ।' इति ।

राधावचनेन कृष्णः कथयति – हे चपले ! कामाधिक्यात् अस्थिराधिक्यात् वा भारः दधिदुग्धभारः महानेव । यदि पुनः मत्कृतभारवहने तव अभिलाषः विहितः स्यात्तदा पणः मनोभूः मनोनीतः स्यात् तदा च धुरीणोऽस्मि । न वा अन्यं प्रवीणं धुरीणं गृहाण । अन्यपक्षे – हे चपले ! भारो महानेव । यदि पुनः मनोभूः मनसिजः कन्दर्पः कामकेलिः वा अभिलाषः पणः विहितः स्यात्तदा अहं धुरीणः अस्मि, न वा नोचत् अन्यं प्रवीणं धुरीणं दक्षं भारवाहकं गृहाण स्वीकुरु इति । जीवः चित्ताधीनः सन् चञ्चलो भवति । चेत्ताधीनस्तु चिन्तादिभारमुक्तः । सर्वभारं वोढुं समर्थे सर्वज्ञे विभौ प्रभौ मयि कृष्णे यदि तव विश्वासो नास्ति तदा अन्यं भारवाहिनं भज । अतः अपदोषतयैव

राधा सलज्जस्मितं – कोऽयं व्यवहारधुरीणामियानभिलाषः ।

कृष्णः – सुन्दरि ! महागरीयान् भारस्तदन्यं गृहाण इति भारं तत्र निक्षिप्य सरोषमिव चलितः ।

राधा – मा गच्छ मा गच्छ,

क्षिप्रं भविष्यति मनस्तव पूर्णकामं
भारं भ्रमादपि न जातु तवाचरामि ।
भारं गृहाण यदुनन्दन ! मन्दमन्दं
त्वं गच्छ वत्सलतया मथुरानगर्याम् ॥ १४ ॥

कृष्णो विहस्य – तर्हि गृहीतपण एव गच्छामि ।

राधा क्षणं व्रीडावनम्रमुखीभूय निरुत्तरमेवानुमतिं दत्तवती । ततः तत्समीपम् आगत्य –

निर्गुणस्य गुणत्वमिति माघवचनं राधावचनमितिमन्तव्यम् । छन्दो नाम उपजातिः । 'ण'कारानुप्रासः । 'पणो मनोभूर्विहितोऽभिलाषः' इत्यत्र रूपकम्॥ १३ ॥

राधा व्यवहारधुरिणां नित्यं भारवहनकारिणाम् एतादृशः अभिलाषः असमीचीनः इति सलज्जस्मितं कथयति । कृष्णस्तु भारस्ते महान् गरीयान्, तत् ततः अन्यं भारिणं गृहाणेति राधामुक्त्वा भारं तत्र निक्षिप्य सरोषं चलितः ।

कृष्णस्य एवमाचरणेन अनन्योपाया सती राधा कृष्णं प्रति कथयति – हे यदुनन्दन ! मा गच्छ । मां भारं वा परित्यज्य अन्यत्र न गच्छ न चल । भगवत्सत्ताविहीनः कश्चिदपि स्थातुमसमर्थः इति भावः । अतः तव मनः क्षिप्रं शीघ्रं पूर्णकामं सन्तुष्टं भविष्यति अर्थात्त्वया यत् इप्सितं तस्य पुरणमवश्यं भविष्यति । भ्रमवशतोऽपि जातु कदाचित् तव भारं यस्मिंस्ते असन्तोषस्तन्न आचरामि । अत एव निःसन्देहं त्वं दधिदुग्धभारं गृहाण स्वीकुरु तथा च वत्सलतया स्नेहवशतः अनुरागवशतः सश्रद्धं भक्त्या वा मथुरानगर्यां मथुरानगरीं गच्छ इति । जीवस्य परमेश्वरांशत्वात् तदुपरि तस्य स्नेहः स्वाभाविकः । अत एव तत्सान्निध्यं जीवः सदैव याचते, यथा ऋग्वेदे (१/१/९)– 'स नः पितेव सूनवेऽग्ने सूपायनो भव । स च स्वानः स्वस्तये ॥' इति । 'म'कार-'न'कार-'भ'काराणामनुप्रासः । अत्र छन्दो नाम वसन्ततिलका ॥ १४ ॥

क्षणरभसमानसो मुरारि-
र्जनरहिताः परितो दिशो निरूप्य ।
समुचितपुलकावलिः प्रचण्ड-
चटुलदृशं सहसा चुचुम्ब गण्डे ॥ १५ ॥

ततः –

दृढमथ परिरभ्य कण्ठदेशे
पुलककलापयुजा भुजद्वयेन ।

राधावचनेन विहस्य कृष्णः तर्हि गृहीतपणः पणो गृहीतो येन तथा भूत्वा अहं भारं गृहीत्वा मथुरां गच्छामि इति कथयति ।

दधिभारवहनकार्यसम्पादनाय श्रीकृष्णस्य कामाभिलाषपणहेतोः राधा क्षणं व्रीडावनम्रमुखीभूय व्रीडा उक्ता यथा मदनकेलितरङ्गिण्यां (३/६४) –

'जृम्भाङ्गरङ्गनयनमीलनाङ्गावलोककृत् ।
धाष्टर्याभावो भवेद्व्रीडा वदनानमनादिकृत् ॥' इति ।

तथा भूत्वा निरुत्तरमेव कृष्णस्याभिलाषानुकूलामनुमतिं दत्तवती । श्रीकृष्णः राधामनुरागतरङ्गितां ज्ञातवान् । अनुरागेङ्गित उक्तो यथा मदनकेलितरङ्गिण्यां (३/२३) – 'दृष्ट्वा दर्शयति व्रीडां सम्मुखं नैव पश्यति ।' इति । राधायाः अनुरागं ज्ञात्वा तत्समीपमागत्य क्षणं तत्क्षणं रभसः औत्सुक्यं तच्च 'इष्टानवाप्तेरौत्सुक्यम्' इति साहित्यदर्पणे (३/१६६) । औत्सुक्यलक्षणमुक्तं यथा मदनकेलितरङ्गिण्याम् (३/९७) –

'इष्टे न वापिरौत्सुक्यं कालक्षेपसहिष्णुता ।
चित्ततापत्वरास्वेददीर्घनिःश्वसितादिकृत् ॥' इति ।

मानसे यस्य सः मुरारिः श्रीकृष्णः केलिनिमित्तं परितः जनरहिताः दिशो वर्त्तन्त इति निरूप्य अर्थात् निर्जनमिति मत्वा समुचितपुलकावलिः रोमाञ्चितः सन् प्रचण्डचटुलदृशं अतिचञ्चलनेत्रसहितं राधागण्डं स चुचुम्बः । 'चुचुम्ब गण्डे' इत्यनेन रतिः व्यज्यते । 'पुलकावलिः' इति सात्विकभावः । 'मुरारिः' इत्यत्र वीररसः । अत्र छन्दो नाम उपजातिः ॥ १५ ॥

ततः अनन्तरं पुलककलापयुजा रोमाञ्चयुक्तेन भुजद्वयेन करयुगलेन

विविधकलासु विलासखेला

मुरमथनेन सहैवमनुभावि ॥ १६ ॥

ततो विविधमन्मथक्रीडां तत्र कुञ्जे समनुभूय तक्रादिविक्रयणार्थं माधवो राधया सह मथुरां ययौ । ततस्तत्र राधासमीपे भारं निक्षिप्य शीघ्रं जरातुरां तरणिमादाय पारार्थं स्थितः । इति भारखण्डः समाप्तः ॥ २॥

राधायाः कण्ठदेशे दृढं परिरभ्य आलिङ्ग्य विविधकलासु नानाकामकलासु विलासखेला सुरतक्रीडा रतिलीला मुरमथनेन श्रीकृष्णेन राधया सह एव अनुभावि अनुभूता । कलाश्च चतुःषष्टिसंख्यकाः । तन्नामानि यथा – गीतं, वाद्यं, नृत्यम्, आलेख्यं, विशेषकच्छेद्यं, तण्डुलकुसुमवलिविकाराः, पुष्पास्तरणं, दशनवसनाङ्गरागः, मणिभूमिकाकर्म, शयनरचनम्, उदकवाद्यम्, उदकाघात, चित्राश्च योगाः, माल्यग्रन्थनविकल्पाः, शेखरकापीडयोजनम्, नेपथ्यप्रयोगाः, कर्णपत्रभङ्गाः, गन्धयुकृतिः, भूषणयोजनम्, ऐन्द्रजालाः, कौचुमाराश्च योगाः, हस्तलाघवम्, विचित्रशाकयूषभक्ष्यविकारक्रिया, पानकरसरागासवयोजनम्, सूचीवान्कर्माणि, सूत्रक्रीडा, वीणाडमरुकवाद्यानि, प्रहेलिका, प्रतिमाला, दुर्वाचकयोगाः, पुस्तकवाचनं, नाटकाख्यायिकादर्शनं, काव्यसमस्यापूरणं, पट्टिकावानवेत्रविकल्पाः, तक्षकर्माणि, तक्षणं, वास्तुविद्या, रूप्यपरीक्षा, धातुवादः, मणिरागाकरज्ञानं, वृक्षायुर्वेदयोगाः, मेषकुक्कुटलावकयुद्धविधिः, शूकसारिकाप्रलापनम्, उत्सादने संवाहने केशमर्दने च कौशलम्, अक्षरमुष्टिकाकथनम्, म्लेच्छितविकल्पाः, देशभाषाविज्ञानं, पुष्पशकटिका, निमित्तज्ञानं, यन्त्रमातृका, धारणमातृका, सम्पाठ्यं, मानसीकाव्यक्रिया, अभिधानकोशः, छन्दोज्ञानं, क्रियाकल्पः, छलितकयोगाः, वस्त्रगोपनानि, द्यूतविशेषः, आकर्षक्रीडा, बालक्रीडनकानि, वैनयिकीनां वैजयिकीनां, व्यायामिकीनां च विद्यानां ज्ञानञ्चेति । अत्र छन्दो नाम उपजाति ॥ १६ ॥

एवं तत्र कुञ्जे लतामण्डपे विविधसुरतक्रीडां समनुभूय मूर्त्तिमान् मधुरः श्रीकृष्णः तक्रभारं नीत्वा राधया सह मथुरां गतवान् तथा च तत्र राधासमीपे भारं संस्थाप्य श्रीकृष्णः जीर्णां नौकामादाय पारार्थं यमुनाकूले अवस्थितः ॥

इति दानखण्डनाटिकाया विश्वनाथस्वाई कृतायां सुधाव्याख्यायां समाप्तो द्वितीयोऽङ्कः ॥ २ ॥ *******

तृतीयोऽङ्कः

विक्रीय तक्रमचिरेण निवर्त्तमानां
राधां सुधाकरमुखीमभिवीक्ष्य दूरे ।
कूले निधाय तरणिं सहसा मुरारि-
र्धूलीगृहं तरणिजापुलिने तनोति ॥ १ ॥

अथात्र दानखण्डनाटिकायास्तृतीयोऽङ्कः समारभ्यते । मथुरानगरितः प्रत्यावर्त्तनं कुर्वन्त्या राधया सह श्रीकृष्णस्य पुनर्मिलनात्मकवर्णनं कविना समुपस्थाप्यते - विक्रीयेति ।

अचिरेण शीघ्रं तक्रं मथितं दधि मथुरानगर्यां विक्रीय निवर्त्तमानां गोपपुरं प्रत्यावर्त्तनं कुर्वन्तीं सुधाकरमुखीं सुष्ठु दधाति पुष्णाति सुखेन धीयते पीयते वा या सा सुधा 'पीयूषममृतं सुधा' इत्यमर(१/१/४८)वचनात् अमृतम्, तस्य आकरः यः सः सुधाकरः चन्द्रः, तद्वत् मुखं मुखमण्डलमस्ति यस्यास्तां राधां दूरे दूरात् अभिवीक्ष्य दृष्ट्वा मुरारिः श्रीकृष्णः सहसा तत्क्षणमेव तरणिं 'द्युमणौ तरणिः पुंसि कुमारीनौकयोः स्त्रियाम् ।' इति त्रिकाण्डशेष (३/१२९)वचनात् नौकां यमुनानदीकूले निधाय संस्थाप्य तरणिजा यमुना तस्याः नद्याः पुलिने बालुकाशय्यायां तटे वा धूलीगृहं धूलीभिर्निर्मितं यत् तत् तनोति प्रस्तौति धूलीखेलां करोति । धूलिगृहमित्यत्र केलिगृहमर्थः, यत्र पुष्पपरागो विच्छुरितो वर्त्तते । आश्चर्यमेतदत्र यत् एकदा गोपनिताभिः सह सुरतकेलिव्यापाररतः श्रीकृष्णः अधुना माणवकवत् धूलीक्रीडारत इति । अत्रायमाशयः – श्रीकृष्णस्य धूलीगृहनिर्माणं यद्यपि न समयोचितं तथापि राधिकां दृष्ट्वा क्रियते । पूर्वं राधाकृष्णयोः केलिः वर्णिता । अधुना 'अहं गृहस्थः, त्वं च गृहिणी' इति राधां सूचयितुं पुनर्गृहनिर्माणं श्रीकृष्णः करोति । गृहनिर्माणानन्तरं पुनस्तत्रावस्थानं, पुनरपि केलिरचनं भविष्यति इति व्यज्यते । किन्तु राधा तदनादृत्य स्वगृहगमनाय उत्सुका भवति – तत् अग्रे कथ्यते । 'सुधाकरमुखी' इत्यत्र उपमा ।

राधा सत्वरमागत्य कृष्णं प्रति –

क्षणं धूलिक्रीडां परिहर समारोह तरणिं
मुरारे ! चण्डांशुश्चरमगिरिचूडामणिरभूत् ।
पुरः प्राचीस्थानं बहुलजलसम्भारभरितं
स्फुरद्विद्युन्मालं किमु घनकुलं नाकलयसि ॥ २ ॥

कृष्णः – स्मित्वा राधां प्रति –

'व'कारानुप्रासः । 'त'कारानुप्रासः । 'ध'कारानुप्रासश्च । अत्र छन्दो नाम वसन्ततिलका ॥ १ ॥

धूलीक्रीडारतस्य श्रीकृष्णस्य सम्मुखे सत्वरं शीघ्रमुपस्थिता सती राधा कथयति – हे मुरारे ! क्षणं धूलीक्रीडां परिहर परित्यज, तरणिं नौकां समारोह । मम पारं शीघ्रं विधेहीत्यर्थः यतो हि चण्डांशुः चण्डाः अतिकोपनाः अत्यन्तं प्रखराः अंशवः किरणाः सन्ति यस्य स सूर्यदेवः चरमगिरेः –

'अस्ताद्रिश्चरमाचलः ।' इति त्रिकाण्डशेष(२/३/३)

वचनात् पश्चिमदिग्भागस्थस्य अस्तपर्वतस्य चूडामणिः शिखरमणिरभूत् अस्तंगतप्रायः । अत्र रात्रिमुखं वर्णितम् । पुरः सम्मुखे प्राचीस्थानं –

'प्राच्यपाचीप्रतीच्यस्ताः पूर्वदक्षिणपश्चिमाः ।'

इत्यमरः(१/३/१)वचनात् पूर्वदिग्भागः बहुलजलसम्भारेण मेघखण्डैः भरितः पूरितः । तत्र च स्फुरद्विद्युन्मालं वर्त्तते वारम्वारं विद्युत् स्फुरति प्रकाशिता भवति । एतेन त्वं किमु घनकुलम् –

'अभ्रं मेघो वारिवाहः स्तनयित्नुर्बलाहकः ॥
धाराधरो जलधरस्तडिद्वान् वारिदोऽम्बुभृत् ।
घन-जीमूत-मुदिर-जलमुग्धमयोनयः ॥'

इत्यमर(१/३/६,७)वचनात् मेघकुलं मेघायोजनं न आकलयसि ? न तर्कयसि ? मेघो वर्षितुमुद्यतो भवतीति भावः । अत्र छन्दो नाम शिखरिणी । एतल्लक्षणं यथा वृत्तरत्नाकरे (३/९०) –

'रसै रुद्रैश्छिन्ना यमनसलभा गः शिखरिणी ॥' इति ॥२॥

राधायाः व्याकुलतां परिलक्ष्य स्मितवदनः कृष्णः कथयति – हे

सरिदतिदुस्तरपारा गर्जति धाराधरः शिरसि ।
अस्तं गत इति तरणिः प्रचण्डवातावलिस्तरुणि ! ॥ ३ ॥

ततो राधा –

एष चुम्बति रविर्वरुणाशां श्लिष्यति प्रतिघनं तडिदेषा ।
आतरं नय पयोधरहारं कर्णधार ! सहसा कुरु पारम् ॥ ४ ॥

कृष्णः –

पश्य दिक्षु चरितं तडिद्व्रतं पारकर्मविधिरेव दुष्करः ।
अद्य तिष्ठ गृहिणो गृहोदरे प्रातरेव तरणं प्रयास्यसि ॥ ५ ॥

तरुणि राधिके ! एषा सरित् नदी यमुना अधुना अतिदुस्तरपारा पारनिमित्तमत्यन्तं कष्टसाध्या, धाराधरः मेघः शिरसि उपरि गर्जति, प्रचण्डवाताबलिः प्रचण्डघूर्णिवातः वहति, तरणिः सूर्यः अस्तंगतप्रायः, अधुना अवसरेऽस्मिन् मया पारयितुं न शक्यत इति भावः। 'त'कारानुप्रासः । छन्दः – आर्या ॥३ ॥

कृष्णवचनात् भयं प्राप्य राधा कथयति – हे कर्णधार ! कर्णः नौकायाः कर्णः प्रान्तभागः मङ्ग-इत्युत्कलभाषायाम्, तं धरति यः स हे नाविक ! एषः रविः सूर्यदेवः वरुणाशाम् –

'इन्द्रो वह्निः पितृपतिर्नैऋतो वरुणो मरुत् ।
कुवेर इशः पतयः पूर्वादीनां दिशां क्रमात् ॥'

इत्यमर(१/३/२-३)वचनात् पश्चिमदिग्भागं चुम्बति स्पृशति तत्र अस्तंगतप्रायः । एषा तडित् विद्युत् प्रतिघनं प्रतिमेघखण्डं श्लिष्यति आलिङ्गति प्रकाशमाना प्रबला जायते । एतादृश्यामवस्थायां पयोधरहारं पयोधरः दुग्धदुध्यादिकुम्भः तत्परिवहनार्थं हारितं यद्धनम् आतरं तरपण्यं च नय । यदि तेनापि असन्तुष्टस्तर्हि मम पयोधरयोः कुचयोः उपरि सुशोभितो यो हारः तमपि नय, किन्तु यथाशीघ्रं मम पारं यमुनानदीपारं कुरु । अत्र राधा कामाकुला प्रतिभाति । कामशान्त्यर्थमनुकूलसमयश्च । अत्र छन्दो नाम स्वागता, 'स्वागतेति रनभाद् गुरुयुग्मम्' इति लक्षणलक्षितात् ॥ ४ ॥

राधिकां स्वसमीपात् शीघ्रं त्यक्तुमनिच्छुकः कृष्णः कथयति – हे राधिके ! दिक्षु सर्वेषु दिग्भागेषु तडिद्व्रतं विद्युत्प्रकाशान्वितं चरितम् आचरणं

राधा – ममैवाद्य पारोऽवश्यं विधेयः ।

कृष्णः –

प्रसरति झञ्झापवनश्चुम्बति चरमाचलं तपनः ।
पश्य विषीदति तीरे रज्जुनिबद्धा जरातुरा तरणिः ॥ ६ ॥

अद्य तावदेकगृहिणो गृहे तिष्ठ, प्रातर्यास्यसि ।

राधा –

किं वाऽऽतरं न वितरामितरां मुरारे !
हे कर्णधार ! यदिदं परुषं ब्रवीषि ।

पश्य । अवसरेऽस्मिन् नौकासाहाय्येन एषः सुगभीरयमुनानदीपारकर्मविधिः दुष्करः कर्त्तुं दुःखप्रदः । पारकर्म अधुना असम्भवमिति भावः । अतः कस्यचन गृहिणः गृहमस्ति यस्य स गृही, गृहपदमत्र –

'न गृहं गृहमित्याहुर्गृहिणी गृहमुच्यते ।'

इति प्रजापतिस्मृतिवचनात् दारार्थबोधकम्, तस्य सदारस्य गृहे अद्य त्वं तिष्ठ त्वयाऽवस्थातव्यम् । प्रातः श्वः प्रभाते तरणं यमुनानदीपारं गमिष्यसि । अत्र छन्दो नाम रथोद्धता । 'प'कारानुप्रासः । 'ग'कार-'ह'कारयोः छेकानुप्रासः ॥५॥

अवश्यं यमुनापारार्थं राधावचनमाकर्ण्य कृष्णः कथयति – हे राधिके ! झंझापवनः 'प्रकम्पनो महावातो झंझावातः सवृष्टिकः ।' इत्यमर (१/१/६६)वचनात् वर्षणमुखरः पवनः सर्वासु दिक्षु प्रसरति प्रवहति । तपनः सूर्यदेवः चरमाचलं चुम्बति पश्चिमदिशि अस्तंगतप्रायः । यमुनानदीतीरे रज्जुनिबद्धा रज्जुबन्धनप्राप्ता जरातुरा जीर्णा बहुदिनात् पूर्वं निर्मितत्वात् वा विनाशोन्मुखिनी तरणिः नौका विषीदति मलिना वर्त्तत इति त्वं पश्य । अनया नौकया नदीपारः अविधेयः इति भावः । अत्र प्रकृतिं चित्रयति चित्रकविः । 'जरातुरा तरणिरि'त्यत्र अर्थान्तरशब्दशक्तिः द्रष्टव्या । छन्दः-आर्या ॥६॥

श्रीकृष्णस्य अनौत्सुक्यभावमवगम्य राधा कथयति – हे मुरारे ! मुरासुरविनाशकारिन् कर्णधार ! नौचालक ! किमहम् आतरं तरमूल्यं नदीपारनिमित्तं भाटकं वा न वितरामितरां यथायथं न ददामि यत् यस्मात्कारणात् त्वमिदं परुषं निष्ठुरवचनं ब्रवीषि उच्चारयसि । परं किन्तु त्वं किं न जानासि

एकां निशामपि परं कुलकामिनीना-
मन्याश्रये स्थितिरियं परिवाद एव ॥ ७ ॥

कृष्णः स्मित्वा – दूषणं वर्त्तते । अद्य यद्यवश्यं पारो विधेयस्तदैवं विधीयताम् ।

राधा – किं तत् कथय ।

कृष्णः –

कालिन्दीयं बहुललहरीलम्बितव्योमदेशा
वेशाटोपं चकितहरिणीलोचने ! मुञ्च मुञ्च ।
एतैरेव स्तनगिरिगुरुश्रोणिभारं न जाने
जीर्णा तन्वी मम तरिरियं कामवस्थामुपैति ॥ ८ ॥

यत् कुलकामिनीनां कुलस्त्रीणाम् एकां निशां रात्रिमपि अन्याश्रये अन्यगृहस्थस्य असम्पर्कितस्य वा गृहे स्थितिः रात्रियापनं न वैधम् । यद्यपि –

'विनाश्रयं न वर्त्तन्ते कविता-वनिता-लताः ।'

इति अभियुक्तवचनमस्ति, तत्र वैधाश्रयः उपदिष्टः । स्त्रीणां वैधाश्रयः पूर्वत्र स्पष्टीकृतः । अतः तदूव्यतिरिक्ताश्रये परगृहे स्थितिः परिवादः –

'अवर्णाक्षेपनिर्वादपरीवादापवादवत् ।
उपक्रोशो जुगुप्सा च कुत्सा निन्दा च गर्हणे ॥'

इत्यमर(१/६/१३)वचनान्निन्दाकारणम् । नारीणां दूषणमेतत् । तदुक्तं मनुना (९/१३) – 'पानं दुर्जनसंसर्गः पत्या च विरहोटनम् ।
स्वप्नोऽन्यगेहवासश्च नारीसंदूषणानि षट् ॥' इति ।

अत्र 'कर्णधार'पदं सार्थकं प्रतिभाति, यतो हि संसारसागरपारकरणार्थं कृष्णैव समर्थः । कृष्णस्य समर्थत्वं 'मुरारे' इति पदप्रयोगेऽपि दृश्यते । 'त'कारानुप्रासः । अत्र छन्दो नाम वसन्ततिलका ॥ ७ ॥

अपवादोत्पत्तिनिराकरणार्थं राधायाः निवेदनं श्रुत्वा कृष्णः कथयति – हे चकितहरिणीलोचने ! चञ्चलमृगनयने ! इयं कालिन्दी यमुनानदी अधुना बहुललहरी बहुला लहरी यस्याः सा तथा सती लम्बितव्योमदेशा लम्बिता व्योमदेशम् आकाशं यावत् या सा तथैव वर्त्तते । तस्याः अपरं कूलं न दृश्यते

राधा कृष्णं प्रति –

गव्यभार-कुचभार-कञ्चुकैर्नौरियं यदि भराकुला भवेत् ।
तत्क्षणं तदपि वारिणि च स्वयं क्षेपणीयमिदमेवमन्यथा ॥ ९ ॥

कृष्णः – भवतु तावत् । नौकामधिरुह्य कियद्दूरं गत्वा तरणिं तरलीचक्रे ।

राधा सभयं कृष्णं प्रति –

इति भावः । एतैः पुनस्तव गिरिसदृशस्य स्तनद्वयस्य तथा च श्रोण्याः कटिदेशस्य भारं वहन्ती इयं मम जीर्णा तन्वी क्षीणा कृशा तरिः नौका काम् अवस्थाम् उपैति प्राप्स्यति इति अहं न जाने । भारेण नौका जलनिमग्ना भवेदितिभावः । अत एव हे सुन्दरि ! त्वं वेशाटोपं वेशाडम्बरं मुञ्च परित्यज आवश्यकातिरिक्तानि भूषणानि परित्यज । एतेन राधायाः भूषणमोहं नाशयितुं भगवतः श्रीकृष्णस्य चेष्टा सूच्यते । 'चकितहरिणीलोचने' इत्यत्र रूपकम् । 'स्तनगिरिगुरुश्रोणिभारमि'त्यत्रापि । तन्वीति आलम्बनविभावः । रूपकञ्च उद्दीपयति चित्तं किमपि आस्वादयितुम् । अत्र छन्दो नाम मन्दाक्रान्ता । एतल्लक्षणं यथा वृत्तरत्नाकरे (३/९४) –

'मन्दाक्रान्ता जलधिषडगैर्म्भौ नतौ ताद्गुरू चेत् ।'इति ॥ ८ ॥

तदनन्तरं राधा कथयति – हे कृष्ण ! मम गव्यभार-स्तनभारवस्त्रभारैश्च इयं नौः नौका यदि भराकुला भाराक्रान्ता भवेत् तर्हि तत्क्षणं त्वद्वचनश्रवणात् परं यथाशीघ्रं वा स्वयं स्वेनैव यमुनाजले क्षेपणीयम् । अन्यथा अन्येन प्रकारेण त्वं कथयति यत् अहमात्मानमेव नदीजले निक्षिपामि । कथमेतत् गम्यते ? यतः गव्यभारवस्त्रभारौ क्षेपणीयौ स्याताम् किन्तु स्तनभारं कथं क्षिपामि । यदि स्वयमेव आत्मनः क्षेपणेन तत् सम्भवपरं स्यात् तर्हि नौकापारस्य आवश्यकता का वाऽस्ति ? यमुनाजलस्य वर्णः कृष्णः । तस्मिन् जले निमग्ना चेत् यथा आत्मना सत्ताहीना स्यात् तथैव अन्तःकरणे कृष्णरूपातिशये निमज्जनेन कृष्णैकत्वं गमिष्यतीति भावः । 'भ'कार-'र'कारयोश्च अनुप्रासः । अत्र छन्दो नाम उपजातिः ॥ ९ ॥

राधावचनेन कृष्णः यमुनाजले नौकां कियद्दूरं नीत्वा भ्रामयति । ततः

तरतरणिसुताया मध्यमं तद्गभीरं
तरलतरतरङ्गालिङ्गितव्योमगण्डम् ।
तरलतरणिमारुह्याशुभीरूर्यदेषा
तव पुनरिदमस्या जीवनं यौवनञ्च ॥ १० ॥

कृष्णः स्मित्वा – नापराधो भवत्याः,

मुग्धे ! पश्य भवत्याः स्तनघटनीतः पवनः ।
तरणिं तरणिं तरणितनूजावर्त्तिः शश्वद्विवर्त्तयति ॥ ११ ॥

राधा सलज्जं कृष्णं प्रति –

भयातुरा सती राधा कथयति – हे कृष्ण ! तरसा शीघ्रं प्रवहति या तरणिसुता यमुनानदी तस्याः मध्यमं शय्यायाः मध्यभागं गभीरं घनजलपूर्णं वर्त्तते । इयञ्च यमुना तरलतरतरङ्गैः चञ्चलतरङ्गैः व्योमगण्डम् आकाशमालिङ्गति । तेन तरला चञ्चला या तरणिः नौका ताम् आरुह्य यत् यथाऽहम् आशुभीरूः शीघ्रं भयालुः भवामि तथा तव अस्याः मादृश्याः इदं जीवनं यौवनं तरलतरं भवति शीघ्रं नाशं गमिष्यति इति आशङ्क्यते । 'त'कारानुप्रासः सातिशयं शोभते । 'तरङ्गालिङ्गित'- इत्यत्र माधुर्यम् । जीवनं यौवनञ्च इत्यत्र श्रुत्यनुप्रासः । लक्षणं यथा साहित्यदर्पणे (१०/५) –

'उच्चार्यत्वाद्यदेकत्र स्थाने तालुरदादिके ।
सादृश्यं व्यञ्जनस्यैव श्रुत्यनुप्रास उच्यते ॥' इति ।

अत्र छन्दो नाम मालिनी ॥ १० ॥

राधावचनेन प्रफुल्लितवदनः कृष्णः कथयति – हे राधे अत्र भवत्याः अपराधः न वर्त्तते अर्थात् तन्न आचरितम् । कृष्णस्य अत्र चाटूक्तिः सूच्यते । एतदनन्तरं पुनः सः कथयति – हे मुग्धे ! मुग्धालक्षणं साहित्यदर्पणे यथा (३/७१) – 'तत्र प्रथमावतीर्णयौवनमदनविकारा रतौ वामा ।
कथिता मृदुश्च माने समधिकलज्जावती मुग्धा ॥' इति ।

अतः हे सुन्दरि ! सा त्वं पश्य यत् भवत्याः स्तनघटद्वयनीतः स्तनोपरि वहति यः पवनः तेन नौका व्यावर्त्यते घूर्णमाना भवति । तरणिं सूर्यमपि व्यावर्तयति यतः तरणितनुजायाः उपरिवर्तते इति तथाभूतः शीतलः पवनः सूर्यस्य

केलिपातमपहाय सहासं तनोषि परिहासविलासम् ।
घूर्णते तरिरियं जलपूर्णा कर्णधार ! किमयं व्यवहारः ॥ १२ ॥

अपि च –

पानीयसेचनविधौ मम नैव पाणी
विश्राम्यतस्तदपि ते परिहासवाणी ।
जीवामि चेत्पुनरहं न तदा कदापि
कृष्ण ! त्वदीयतरणौ चरणौ ददामि ॥ १३ ॥

उष्णकिरणमपि व्यावर्तयति परिवर्तयति शीतलयति । एतेन उद्दीपनसृजनात् तत्रैव मध्येयामुनं राधाकृष्णयोः केलिरभूत् । 'तरणिं तरणिम्' इत्यत्र अनुप्रासः। 'स्तनघटनीतपवनः' इत्यत्र रूपकम् । अत्र छन्दः आर्या । तदुक्तम् –

'यस्याः पादे प्रथमे द्वादशमात्रास्तथा तृतीयेऽपि ।
अष्टादश द्वितीये चतुर्दशे पञ्चदश सा आर्या ॥' इति ॥ ११ ॥

राधा लज्जया सह नौकाचालकं कृष्णं कथयति – हे कर्णधार ! **नौवाहक !** केलिपातं नौकाचारणदण्डं अपहाय परित्यज्य सहासं परिहासस्य **विलासं तनोषि** विस्तारयसि परिहससि । रतिविलासखेलां अधुना न स्वीकुर्याः । **यतो** हि विलासो हि दुःखकारणमस्ति । सम्प्रति जलपूर्णा छिद्रमाध्यमेन **आगतेन** जलेन पूर्णा प्लाविता इयं तरिः नौका जलावर्तपतिता सती घूर्णते **घूर्णायमाना** भवति । कदाचित् जलनिमग्ना भवेदिति भावः । अत एव किं **किमर्थमयं व्यवहारः** 'विवादो व्यवहारः स्यात् ।' इत्यमर(१/६/९)वचनात् **विवादः** मया सह तवेति शेषः । नैतत् साधु कर्मेति भावः । कर्णधारे सति **तरिघूर्णनं** न शोभत इति वैचित्र्यं वहति पद्यमिदम् । 'त'कारानुप्रासः । **'ल'कारानुप्रासश्च** । अत्र छन्दो नाम स्वागता ॥ १२ ॥

पुनश्च राधा कथयति – हे कृष्ण ! पानीयं जलं तस्य सेचनविधौ **नौकायाः बहिः** प्रक्षेपणकर्मणि मम पाणी करद्वयं न विश्राम्यति । तथापि तव **परिहासवचनं** वर्त्तते । एतद्विपत्तितः यदि अहं जीवामि तर्हि त्वदीयतरणौ तव **नौकायां** कदापि मम चरणौ न ददामि तव नौकां कदाचिदपि न आरोहामि इति

कृष्णः स्मित्वा –

पूर्वं मयोक्तमखिलं जरती तरिर्मे
तन्वी च काञ्चनघटद्वितयं दधाति ।
तत्रापि वाति विषमानिलमण्डलीयं
किं तत्र सुन्दरि ! करिष्यति कर्णधारः ॥ १४ ॥

राधा –

एतावतीं तव तरीं जरतीं मुरारे !
जानामि चेत्तदिह किं पदमर्पयामि ।
एषा तवाभिलषितं परिपूरयामि
हे कर्णधार ! कुरु पारमपारकीर्त्ते ! ॥ १५ ॥

भावः । अत्र 'प'कारानुप्रासः । पाणी, वाणी, तरणौ, चरणौ च पदानि मुदं वहन्ति । अत्र छन्दो नाम वसन्ततिलका ॥ १३ ॥

कृष्णः स्मितपूर्वकं राधां कथयति – हे सुन्दरि ! मम तरिः नौका जरती जीर्णा इति पूर्वं प्रथमतः मया अखिलं समस्तम् उक्तम् । इयं च मम तरिः तन्वी क्षुद्रा कृशा वा । सा पुनः काञ्चनघटद्वितयं सुवर्णनिर्मितकलसद्वयं क्षीरसंवहनार्थं दधाति धारयति । एतेन राधायाः स्तनद्वयं व्यज्यते । तत्रापि इयं विषमानिलमण्डली घूर्णिवातसमूहो वा वाति प्रवहति । एतादृश्यामवस्थायां कर्णधारः नाविकः अयं किं करिष्यति ? प्रकृतिविधानं कर्णधारोऽपि वारयितुं न समर्थ इत्यत्र प्रतीयते । 'जरती तरिः' इत्यत्र शब्दशक्तिः भिन्ना भवति । 'प'कारानुप्रासः । अत्र छन्दो नाम वसन्ततिलका । तल्लक्षणं यथा –

'उक्ता वसन्ततिलका तभजा जगौ गः । इति ॥ १४ ॥

ततो राधा कथयति – हे मुरारे ! तव तरिं नौकाम् एतावतीम् एतादृशीं जरतीं जीर्णां जानामि चेत् यदि अहं तर्हि किं पदमर्पयामि अत्र किम् आगता भवेयम् । एषा किंकर्त्तव्यविमूढा सती अहं तव अभिलषितं मनस्कामं परिपूरयामि साधितवती । वर्त्तमानोऽपि सार्वकालिकं बोधयति । हे कर्णधार ! हे अपारकीर्त्ते ! अपारा अपरिमिता कीर्त्तिः यस्य तत्सम्बद्धौ, मम पारं विधेहि नदीपारम् अथवा मुक्तिं विधेहि । 'मुरारे' इति प्रसिद्धार्थकं पदम् । 'अपारकीर्त्ते' इत्यनेन

कृष्णः स्मित्वा – सोऽहं यत्नादेव वाहयामि । सुन्दरि ! छिद्राण्याच्छादय हृदयाञ्चलेन ।

राधा तथा कृत्वा कृष्णं प्रति –

गुरुच्छिद्रोच्छेदे कुचयुगनिचोलं क्षयमभूत्
तथाप्यन्तश्छिद्रान्निविडतरमुत्तिष्ठति पयः ।
इदानीं प्राणान् वा जघनवसनं वा मम हरे !
किमाहर्तुं वाञ्छां वहति बहुवल्का तव तरिः ॥ १६ ॥

कृष्ण स्मित्वा – जीर्णा तरिरिति पूर्वमुक्तम् । इदानीं कः प्रतिकारो दैवमेव शरणम् ।

कृष्णस्य जगद्वन्दनीयत्वं व्यज्यते । 'प'कार-'र'कारयोः छेकानुप्रासः । 'प'कारानुप्रासश्च । छन्दः – वसन्ततिलका ॥१५॥

स्मितपूर्वं कृष्णः कथयति – अहं यत्नपूर्वकं नौकां वाहयामि । हे सुन्दरि ! छिद्राणि 'छिद्रं निर्व्यथनं रोकं रन्ध्रं श्वभ्रं वपा सुषिः ।' इत्यमर (१/८/२)वचनात् रन्ध्राणि नौकायां जलप्रवेशच्छिद्राणि हृदयाञ्चलेन हृदयस्य अञ्चलं हृदयाञ्चलं तेन वक्षोगतवस्त्रेण आच्छादय । अथवा हृदयमेव अञ्चलमितिविग्रहात् तव मनसि यानि छिद्राणि विकाराः तान् स्वमनसा परिमार्जय । अत्र उद्देश्यं यत् नवद्वारविशिष्टं शरीरम्, कस्यचन द्वारस्य आच्छादनमस्ति, कस्यचन नास्ति । येषाम् आच्छादनं नास्ति तदर्थं वस्त्रस्य आवश्यकता वर्त्तते यतः तानि द्वाराणि आशु विकारग्रस्तानि भवन्ति । किन्तु अन्तश्छिद्रस्य आवारकं नास्ति । अत एव 'मन एव मनुष्याणां कारणं बन्धमोक्षयोः ।' इति विचार्य विकारभावं परित्यज । अथवा विपदि लज्जा न कार्येति ।

राधा तथा कृत्वा कृष्णं कथयति – हे कृष्ण ! नौकायां जलप्रवेशनिवारणाय गुरुच्छिद्राणां बृहदाकारच्छिद्राणाम् उच्छेदे पिधानकरणार्थं मम कुचयुगस्य स्तनद्वयोपरिस्थं निचोलं वसनं क्षयम् अभूत् समाप्तं जातम् । तथापि अन्तश्छिद्रात् लघुच्छिद्रात् निविडतरं प्रवलतरभावेन पयः जलम् उत्तिष्ठति नौकामध्ये प्रविशति । अथवा अन्तर्गतच्छिद्राणि वस्त्रेण वारयितुं न शक्यते ।

राधा स्वगतम् –

> **इह तरणिसुतायाः कूलमत्यन्तदूरं**
> **विघटिततरुमूलो मारुतो नानुकूलः ।**
> **तरिरियमतिजीर्णा चञ्चलः कर्णधारः**
> **शिव शिव मम कोऽयं कर्मणो दुर्विपाकः ॥ १७ ॥**

ततः तान्यपि छिद्राणि बहिःशरीरमपि आक्रामन्ति । अतः हे हरे ! इदानीं मम प्राणान् जघनवसनम् अधःपरिधानवस्त्रं वा किम् आहर्तुं तव बहुवल्का बहुकाष्ठखण्डसंयुक्ता तरिः नौका वाञ्छाम् अभिलाषं वहति ? एतन्न समीचीनमिति भावः । 'कुचयुगनिचोलं, जगघनवसनहरणञ्च शृङ्गारपरम् । 'छ'कार-'द'कारयोः अनुप्रासः । अत्र छन्दो नाम शिखरिणी ॥१६ ॥

कृष्णः स्वनौकां जीर्णां सूचयन् राधां दैवस्य भाग्यस्य शरणं गन्तुं कथयति । प्राणिनामभ्युदयविनिपातयोर्दैवाधीनत्वम् । यत्र पुरुषकारस्य पराजयः तत्र दैवम् आश्रियते । सम्पूर्णं पुरुषकारं विहाय दैवाश्रयणमनुचितम् । विचार्यते एतत् याज्ञवल्क्येन (१/३४९-३५१) यथा –

> 'दैवे पुरुषकारे च कर्मसिद्धिर्व्यवस्थिता ।
> तत्र दैवमभिव्यक्तं पौरुषं पौर्वदेहिकम् ॥
> केचिद्दैवात् स्वभावाच्च कालात् पुरुषकारतः ।
> संयोगात् केचिदिच्छन्ति फलं कुशलबुद्धयः ॥
> यथा ह्येकेन चक्रेण रथस्य न गतिर्भवेत् ।
> एवं पुरुषकारेण विना दैवं न सिद्ध्यति ॥' इति ।

राधा सभयं स्वगतं कथयति – इह अत्र तरणिसुतायाः यमुनायाः कूलमत्यन्तं दूरे वर्त्तते । अत्र अपरा विषमावस्था यथा – तरुः उत्पाटितो वर्त्तते । पवनः विपरीतः वर्त्तते । नौकाऽपि बहुजीर्णा अस्ति । तस्याः चालकः अपि अतिचञ्चलो वर्त्तते । इत्थं मम कर्मणः विपरीतपरिणामः अस्तीति अहं जाने । शिव शिव इति दुःखेन राधा कथयति अथवा सा शिवस्मरणं करोति अथवा मङ्गलार्थं चिन्तयति । अत्र 'त'कारानुप्रासः । विषमालङ्कारश्च । अत्र छन्दो नाम मालिनी ॥१७॥

अपि च –

कीर्णा दिशो जलधरैस्तरणिः सुजीर्णा
दामोदरोऽतितरुणो नवकर्णधारः ।
एषा कलिन्ददुहिता लहरीगभीरा
हा हा तथापि तरणौ पदमर्पयामि ॥ १८ ॥

पुनः प्रकाशम् –

वाचा तवैव यदुनन्दन ! गव्यभारो
हारोऽपि वारिणि मया सहसा विकीर्णः ।
दूरीकृतं च कुचयोरनयोर्दुकूलं
कूलं कलिन्ददुहितुर्न तथाप्यदूरम् ॥ १९ ॥

अपि च राधा स्वगतं कथयति – दिशः सर्वे दिग्भागाः जलधरैः मेघैः कीर्णाः व्याप्ताः आच्छादिताः वर्त्तन्ते । इयं च नौका सुजीर्णा । दामोदरः पुष्पमालाशोभितः श्रीकृष्णः अधुना अतितरुणः यौवनोद्दीप्तः नवकर्णधारः नूतनः नाविकः वर्त्तते । एषा कलिन्ददुहिता यमुनानदी अधुना लहरीगभीरा लहरीयुक्ता गभीरा च । एतत् जानन्त्यपि अहं तरणौ तव नौकायां पदमर्पयामि स्थापयामि नौकारोहणं करोमि । हा विषादसूचकमव्ययपदम् । 'दामादरोऽतितरुणो नवकर्णधार' इति विषमविषयपद्यमिदम् । अत्र छन्दो नाम वसन्ततिका । लक्षणन्तु पूवत्रोक्तम् ॥ १८ ॥

राधा पुनः प्रकाशं कृष्णं कथयति – हे यदुनन्दन ! भाराक्रान्ता इयं क्षीणा जीर्णा नौका जलमग्ना भवेत्, तस्मात् सर्वं वस्तुजातं नदीगर्भे निक्षिपेति तव वाचा मम गव्यभारः क्षीरभारः अपि च हारः कण्ठालङ्कारः इति सकलः पदार्थः मया सहसा तत्क्षणं वारिणि यमुनानदीजले विकीर्णः निक्षिप्तः । ततः कुचयुगलाच्छादितं दुकूलं वस्त्रं भारः न भवतु इति धिया तदपि मया दूरीकृतं यमुनानदीजले प्रक्षिप्तम् । तथापि कलिन्ददुहितुः यमुनानद्याः कूलं तटं न अदूरं दूरे वर्त्तते । नौका तावत् न चलति इति भावः । कुचयोः दकूलम् उद्दीपनम् । 'यदुनन्दन' इति स्नेहवचनम् । 'र'कारानुप्रासः । अत्र छन्दो नाम वसन्ततिलका ॥ १९ ॥

पुनः स्वगतम् –

> पयःपूरैः पूर्णा तदनु घनपूर्णा च पवनै-
> गर्भीरे कालिन्दीपयसि तरिरेषा प्रविशति ।
> परं हित्वाऽरित्रं परमतरलो नन्दतनयो
> नटन् भूयोभूयस्तदपि करतालं घटयति ॥ २० ॥

अपरश्च –

> प्रयत्नादावर्त्ते नयति तरिमत्यन्तजरती-
> मरित्रं तत्रैव त्यजति तरलो नन्दतनयः ।
> परं भानोर्बिम्बं चरमगिरिचूडामुपगतं
> न जाने राधायाः शिव शिव विधिः किं घटयति ॥ २१ ॥

राधा पुनः स्वगतं कथयति – एषा तरिः नौका जीर्णा इति कारणात् पयःपूरैः पूर्णा जलेन पूर्णा सम्प्रति जाता । तदनु तदनन्तरम् इयं दिक् घनैः मेघैः पूर्णा जाता । सर्वासु दिक्षु मेघमाला विस्तारिता इति भावः । अधुना एषा तरिः पवनैः गभीरे कालिन्दीपयसि यमुनानदीजले प्रविशति प्रविष्टा । परम् अत्र परमतरलः अतिचपलः भूत्वा नन्दतनयः श्रीकृष्णः नौकायाः अरित्रम् 'अरित्रं केनिपातकः ।' इत्यमर(१/१०/१३)वचनात् नौकाचालनकाष्ठं हित्वा परित्यज्य नटन् नृत्यन् भूयोभूयः वारम्वारं तदपि करतालं घटयति नौकाचालनं न कृत्वा सकरतालं नृत्यति । 'प'कार-'त'कारयोः अनुप्रासः । 'भ'कार-'य'कारयोः छेकानुप्रासः । 'नन्दतनयः' इति स्नेहभरशब्दः । 'कालिन्दीपयसि' इत्यत्र पयसः पावनत्वम् । कालिन्द्याः पौराणिकत्वञ्च । अत्र छन्दो नाम शिखरिणी । लक्षणन्तु प्रोक्तम् ॥ २० ॥

राधा पुनश्च स्वगतं कथयति – अयं तरलः अतिचपलः नन्दतनयः श्रीकृष्णः प्रयत्नात् यत्नसहकारेण आवर्ते यमुनानदीजलभ्रमे अत्यन्तं जरतीं जीर्णां तरिं नौकां नयति वाहयति । आवर्त्ते नौकामज्जनभयहेतौ यत्र अरित्रेण सावधानं नौकाचालनं कर्तव्यं तत्रैव अयं श्रीकृष्णः अरित्रं त्यजति । परम् अन्यत्र भानोः सूर्यस्य बिम्बं किरणः चरमगिरेः अस्ताचलस्य चूडां शिखरभागम् उपगतम् । सूर्यः अस्तंगतप्रायः इति भावः । एतादृश्याम् अवस्थायां राधायाः कृते विधिः

पुनर्निःश्वस्य –

दूरे बन्धुजनो मनागपि दयाशीलो न पीताम्बरः
स्निग्धैरम्बरलम्बिभिर्जलधरैः पीताः समस्ता दिशः ।
एषा जीर्णतरा तरिस्तरणिजा पूर्णा तरङ्गोत्करै-
र्नो जानेऽद्य ममापि चिराय भविता हा हा गतिः कीदृशी ॥२२॥

अपि च –

विधाता किं घटयति इति अहं जाने । दुर्घटनं घटयति इति भावः । राधा शिवस्मरणं करोति । निशागमनं राधायाः सौभाग्यवितानं करिष्यति इत्यत्र प्रतीयते । 'त'कारानुप्रासः । छन्दः - शिखरिणी ॥ २१ ॥

राधा पुनः निःश्वस्य कथयति – सम्प्रति मम बन्धुजनः वंशान् ध्यायति इति बन्धुः स एव जनः पत्यादिपरिवारसदस्यसकलः दूरे यमुनानद्याः अपरपार्श्वे वर्त्तते । तेषाम् अभावे अधुना अहं दीना अरक्षिता सती उभयोः पतिपितृकुलयोः सन्तापकारणं भवामि इत्याशयः । एतादृश्याम् अवस्थायां पीताम्बरः पीतः अम्बरः यस्य सः श्रीकृष्णः । हारिद्रवर्णः मङ्गलकार्ये व्यवह्रियते, जगन्मङ्गलत्वात् श्रीकृष्णस्य तद्वर्णविशिष्टवस्त्रम् । तथाभूतः श्रीकृष्णः मनाक् क्वचिदपि न दयाशीलः भवति । सुरक्षितदशायां शीघ्रं मम गृहप्रत्यावर्त्तननिमित्तं नौकाचालनं न विदधाति । अधुना अम्बरात् आकाशत् लम्बिभिः स्निग्धैः जलधरैः मेघैः समस्ताः दिशः पीताः कवलिताः व्याप्ताः जाताः । एषा तरिः नौका जीर्णतरा । यमुनानदी तरङ्गोत्करैः बहुलतरङ्गैः पूर्णा जाता । सर्वत्र भीतिः परिलक्ष्यते । अत्र अद्य अचिराय मम गतिः कीदृशी भविता अहं न जाने । हा हा गतिः इत्यत्र आवेगः वर्णितः । 'पीताम्बरः' इति प्रसिद्धं पदं प्रसादरूपम् । 'जलधरैः दिशः पीताः' इत्यत्र पीतपदस्य अर्थान्तरगतिः यतो हि निर्जीवैः जलधरैः दिक्पानं न सम्भवति । चैतनैः तु जलपानं मधुपानं सम्भवति । 'तरङ्ग'मित्यत्र माधुर्यम् । 'त'कारानुप्रासः । अत्र छन्दो नाम शार्दूलविक्रीडितम् । एतस्य लक्षणं यथा वृत्तरत्नाकरे (३/९९) –

'सूर्याश्वैर्मसजस्तताः सगुरवः शार्दूलविक्रीडितम् । इति ॥ २२ ॥

भूयो भूयो वहति मरुतां मण्डली चण्डवगी
जीर्णामेनां तरणिमभितो निर्भरं घूर्णयन्ती ।
हारः पण्यं त्वयि विनिहितं नन्दसूनो ! मयैतत्
क्षिप्रं क्षिप्रं सुभग ! भवता क्षिप्यतां केलिपातः ॥ २३ ॥

कृष्णः स्मित्वा – एषोऽहं वाहयामि,

त्वरितमरुणपुत्रीपारमत्री विधेहि
प्रतिमुहुरिति काकुव्याकुलैस्तद्वचोभिः ।

अपि च हे सुभग ! हे सुपुरुष ! सम्प्रति मरुतां पवनानां चण्डवेगी मण्डली भयङ्करवेगशालिनी वातमण्डली भूयो भूयः वहति । सा च पवनमण्डली एनां जीर्णां तरणिं नौकाम् अभितः इतस्ततः निर्भरं भारशून्यद्रव्यमिव घूर्णयन्ती । हे नन्दसूनो ! नदीपारनिमित्तं मम हारः कण्ठालङ्कारः, अनेन सर्वे अलङ्काराः गृह्यन्ते, तान् पण्यं विक्रयार्थं दुग्धादि च त्वयि विनिहितं त्वद्वचनेन नद्यां निक्षिप्तम् । तस्मात् विलम्बं न कृत्वा भवता क्षिप्रं शीघ्रं केलिपातः केनिपातः अरित्रं क्षिप्यताम्, शीघ्रं नौकाचालनं कुरु इत्यर्थः । 'हारः पण्यम्' इत्यत्र परिणामः । 'मण्डली चण्डवेगी' इत्यत्र 'ण'कार-'ड'कारयोः अनुप्रासः । 'क्षिप्रं क्षिप्रं क्षिप्यताम्' इत्यत्र समता । 'जीर्णामेनां तरणिमभितो निर्भरं घूर्णयन्ती' इत्यत्र 'ण'कारानुप्रासः । अत्र छन्दो नाम मन्दाक्रान्ता ॥ २३ ॥

कृष्णः कथयति – एषोऽहमिति । हे तरुणि ! त्वरितं शीघ्रम् अरुणपुत्री अरुणस्य वाहकस्य अश्वस्य पुत्रः अस्यामस्तीति अरुणपुत्री इयं यमुना तस्याः पारमैत्रीं पारेण मम मैत्रीं विधेहि अथवा तत्पारेण मां संयोजय अथवा अरुणपुत्र्याः पारं विधेहि, मया मैत्रीमपि च विधेहि – एवं प्रकारेण प्रतिमुहुः मुहुर्मुहुः काकुव्याकुलैः – 'काकुः स्त्रियां विकारो यः शोकभीत्यादिभिर्ध्वनेः ॥' इत्यमर(१/६/१२)वचनात् शोकभयमिश्रितैः वचनैः जलनिविडे यमुनागर्भे निपातात् स्रोतसः प्राबल्यात् क्षुण्णमथवा पूर्वप्रकारकवचनैः लडयोः सावर्ण्यात् जडत्वात् विचारबुद्धिशून्यत्वात् निविडनिपातनात् हेतोः क्षुण्णं बाधितम् अरित्रं यदेव तरुण्याः राधिकायाः अपि च तरण्याः नौकायाः मित्रं तत् खण्डखण्डीबभूव खण्डशः विभग्नं जातम् । 'काकुव्याकुलैरि'त्यत्र शब्दविशेषः काकुपदेन धर्तव्यः ।

जलनिविडनिपातक्षुण्णमारादरित्रं
तरुणि ! तरणिमित्रं खण्डखण्डीबभूव ॥ २४ ॥

राधा श्रुत्वा सकाकुः –

गभीरे कालिन्दीपयसि तरणौ नग्नवपुषि
स्फुरत्तुङ्गोत्तुङ्गे त्वमपि किमु जीविष्यसि हरे ! ।
अतस्तूर्णं पूर्णा मलविधुमुखी नागर ! कर-
द्वये कृत्वाऽरित्रं तरणीपुत्रीं भगवतीम् ॥ २५ ॥

यत्र काकुपदप्रयोगः तत्र आर्थीव्यञ्जना भवति । तदुक्तं काव्यप्रकाशे – 'वक्तृबोद्धव्यकाकूनाम्' इति । 'तथाभूतं दृष्ट्वा' इति तूदाहरणम् । अत्र मयि न योग्यः इति खेदः । 'कुरूषु तु योग्य' इति काक्वा प्रकाश्यते । काक्वाक्षिप्तं तु गुणीभूतं व्यङ्ग्यं भवति, यथा – 'मथ्नामि कौरवशतं समरे न कोपात् ।' इत्यादि । यथा वा –

'गुरुजनपरतन्त्रतया बत दूरतरं देशमुद्यतो गन्तुम् ।
आकुलितकोकिलललिते नैष्यति सखि सुरभिसमयेऽसौ ॥'

इति अलङ्कारसर्वस्वे (७८) रुय्यकः । 'भिन्नकण्ठध्वनिर्धीरैः काकुरित्यभिधीयते'। 'काकुः' वक्रोक्तिमूलापि दृश्यते, यथा –

'काले कोकिलवाचाले सहकारमनोहरे ।
कृतागसः परित्यागात् तस्य चेतो न दूयते ॥' इति ।

अत्र निषेधार्थप्रयुक्तो नञ् काक्वा विध्यर्थे घटितः । अर्थात् चेतो न दूयते इत्यत्र दूयत एव । छेकानुप्रासः । अत्र छन्दो नाम मालिनी ॥ २४ ॥

कृष्णवचनेन भीता सती राधा कथयति – हे हरे ! स्फुरोत्तुङ्गोत्तुङ्गे प्रवृद्धजलराशौ पुनश्च आवरणविहीने गभीरे कालिन्दीपयसि स्थितायां तरणौ नौकायां त्वमपि किं जीविष्यसि ? यदि त्वं जीविष्यसि तर्हि अहमपि जीविष्यामि । अतः हे नागर ! तूर्णं शीघ्रतया करद्वयम् अरित्रं कृत्वा भगवतीं तरणीपुत्रीं यमुनानदीं तर इति शेषः । 'स्फुरत्तुङ्गोत्तुङ्गे' इत्यत्र माधुर्यम् । 'तरणिपुत्रीं भगवतीम्' इत्यत्र चाटूक्तिः । 'मलविधुमुखी' इत्यत्र राधायाः विवर्णता वर्णिता । विवर्णता च सात्त्विकभावः । 'ण'कारानुप्रासः । अत्र छन्दो नाम शिखरिणी ॥ २५ ॥

कृष्णः स्मित्वा –

यदि भवति निमग्ना नौरियं वारिपूर्णा
शृणु सखि ! तदुपायं निर्गतोपायमुच्चैः ।
भवदुरसिजकुम्भद्वन्द्वमालम्ब्य यत्नात्
तरुणि ! तरणपुत्रीं सन्तरिष्यामि सत्यम् ॥ २६ ॥

राधा –

अस्तं गच्छति सद्यस्तरणिसुतायामियं च तरतरणिः ।
जीवनयौवनमुभयोस्तदपि तवायं सुपरिहासः ॥ २७ ॥

कृष्णः स्मित्वा – सुन्दरि ! प्रतिकारश्चिन्त्यताम् ।

राधा – प्रतिकारो भवानेव ।

स्मितवदनः कृष्णः कथयति – हे सखि ! राधे ! इयं नौः नौका वारिपूर्णा जलपूर्णा सती यदि निमग्ना यमुनाजलनिमग्ना भविष्यति तर्हि ततः उच्चैः उन्नतं निर्गतोपायं शृणु । सः उपायः यथा – भवत्याः उरसिजं वक्षोजं स्तनं तद्रूपकं कुम्भद्वन्द्वं कलसद्वयम् आलम्ब्य तयोः आश्रयं कृत्वा हे तरुणि ! हे सुन्दरि ! यत्नात् यत्नपूर्वकं तरणिपुत्रीं यमुनानदीं सन्तरिष्यामि इति सत्यम् । त्वामालिङ्ग्य अहमपि यमुनापारं गमिष्यामि इति भावः । 'उरसिजकुचकुम्भद्वन्द्वम्' इत्यत्र उपमा । 'त'कारानुप्रासः । कुचयोः उद्दीपनत्वञ्च । अत्र छन्दो नाम मालिनी ॥२६॥

राधा कथयति – तरणिसुतायां यमुनानद्याम् इयं तरणिः नौका उभयोः आवयोः जीवनं यौवनं च सर्वमेतत् सद्यः तत्क्षणम् अस्तं नाशं गच्छति । हे कृष्ण ! एतन्मनसि न चिन्तयित्वा अयं ते परिहासः । अस्मिन् विपत्काले परिहससि किमु ? 'जीवनं यौवनञ्च' इत्यत्र श्रुत्यनुप्रासः । 'सद्यस्तरणिः' इत्यत्र प्रयोगवैचित्र्यम् । अत्र छन्दो नाम आर्या ॥ २७ ॥

स्मितवदनः कृष्णः एव प्रतिकारचिन्तनार्थं राधां कथयति । राधा तु अनन्योपाया सती प्रतिकारः परमपुरुष एव सततं भवतीति निवेदयति । वस्तुतः 'पुरुषान्न परं किञ्चित् सा काष्ठा सा परा गतिः ।' इति श्रूयते कठोपनिषदि । अतः एतदर्थं यदा राधया उक्तं तदा श्रीकृष्णः ताम् अहं न यौवनपण्यः यौवनेन

कृष्णः – नाहं यौवनपण्यः ।

राधा स्मित्वा – कुरु पारं यमुनाया वारम्वारं वेपते हृदयम् ।

कृष्णः स्मित्वा –

तरुणि ! तरणिपुत्रीमध्यमालम्ब्य नीतं
पुलिनमतिमनोज्ञं पश्य पश्यान्तरस्थम् ।
अतिनिविडनिकुञ्जे मञ्जुगुञ्जद्विरेफे
तरलपवनचेष्टे तत्र विश्राम इष्टः ॥ २८ ॥

राधा विलोक्य हर्षं सूचयन्ती – अये जीवनमायातम्, तत्त्वरितं वाहय ।

कृष्णः स्मित्वा –

नाहं पणयोग्य इति कथयति । राधा स्मितं कृत्वा स्वहृदयवेपनं कम्पनं च अर्थात् उद्दीपनं सूचयित्वा शीघ्रं यमुनापारार्थं श्रीकृष्णं कथयति । सस्मितः साकाङ्क्षदामोदरो नन्दनन्दनो मुनिजनमानसहंसो यदुकुलनलिनदिनेशः श्रीकृष्णः उत्तरयति – तरुणीति ।

हे तरुणि ! तरणिपुत्र्याः यमुनायाः मध्यं मध्यभागम् आलम्ब्य मया **अतिमनोज्ञम्** अत्यन्तं मनोरमं पुलिनं तटभागं नीतं प्राप्तम्, अन्तरस्थं तटभागं **त्वं पश्य** । तत्र अतिनिविडनिकुञ्जे कानने मञ्जुभावेन मधुरेण यत्र द्विरेफः

'मधुव्रतो मधुकरो मधुलिण्मधुपालिनः ।
द्विरेफपुष्पलिड्भृङ्गषट्पदभ्रमरालयः ॥'

इत्यमर(२/५/२९)वचनात् भ्रमरः गुञ्जनं करोति तत्र तरलपवनचेष्टे **सुशीतलपवनप्रवाहे** विश्रामः विरामः इष्टः मम अभिलषितः भवति । तत्र **सुरतकेलिनिमित्तं** श्रीकृष्णस्य इच्छा व्यज्यते । 'कुञ्जे मञ्जुगुञ्जे' इत्यत्र माधुर्यम् । **'द्विरेफे'** इत्यत्र लक्षणा । 'पश्य पश्यान्तरस्थम्' इत्यत्र अर्थान्तरगतिः । तरणिपुत्री **अरुणपुत्री** वा इति स्नेहभरवचनम् । अत्र छन्दो नाम मालिनी ॥ २८ ॥

राधा तद्विलोक्य **हर्षोत्फुल्लिता** जाता सती अधुना जीवनम् आयातम् **आनन्दानुकूलम्**, आत्मरक्षणोपायः उपस्थितः, तस्मात् शीघ्रं नौकां चालनाय **सूचयति** । **ततः** सस्मितः श्रीकृष्णः राधां कथयति – हे सुन्दरि ! सूर्यतनयायाः **यमुनानद्याः तरकर्मपण्यं** पारकर्मपणरूपेण अत्र यदि मयि त्वं कामकेलिं सुरतकेलिम्

अङ्गीकरोषि मयि सुन्दरि ! कामकेलिं
यद्यत्र सूर्यतनयातरकर्मपण्यम् ।
एषोऽहमिन्दुवदने ! धृतकेलिपात-
स्त्वां तारयामि यमुनां रभसाऽम्बुजाक्षि ! ॥ २९ ॥
श्रुत्वा तदीयवचनं क्षणनम्रवक्त्रा
राधा विचिन्त्य मनसा निजगाद कृष्णम् ।
पारं विधेहि सहसा तपनात्मजायाः
शीघ्रं तवाभिलषितं परिपूरयामि ॥ ३० ॥
तस्या निपीय वचनं सरसीरुहाक्ष्याः
पीयूषपूर्णमिव कर्णघटद्वयेन ।
पारं विधाय सहसा करकेलिपातं
धृत्वा जगाम पुलिनं तपनात्मजायाः ॥ ३१ ॥

अङ्गीकरोषि तर्हि हे इन्दुवदने ! चन्द्रमुखि ! अम्बुजाक्षि ! कमलनयने ! धृतकेलिपातः धृतकेनिपातः श्रीकृष्णः एषः अहं रभसा शीघ्रं त्वां राधां यमुनां तारयामि यमुनापारं प्रापयामि । 'इन्दुवदने' इत्यत्र उपमा । 'अम्बुजाक्षी' इत्यत्र अपि उपमा । 'सूर्यतनयातरकर्मपण्यम्' इत्यत्र परिणामः । अत्र छन्दो नाम वसन्ततिलका ॥ २९ ॥

तदीयवचनं श्रीकृष्णवचनं यमुनानदीपारार्थं पणरूपां कामकेलिं श्रुत्वा क्षणं नम्रवक्त्रा लज्जाऽनुरागवशात् अधोमुखी सती राधा मनसा विचिन्त्य निजगाद कथितवती – हे श्रीकृष्ण ! त्वं शीघ्रं सहसा यमुनानद्याः पारं विधेहि कुरु । अहमपि तव अभिलषितम् इप्सितां कामकेलिं परिपूरयामि । अत्र भविष्यार्थे वर्त्तमानप्रयोगः । अत्र छन्दो नाम वसन्ततिलका ॥ ३० ॥

सरसीरुहाक्ष्याः कमलनयनायाः तस्याः राधायाः पीयूषपूर्णम् अमृतपूर्णं वचनं कर्णरूपघटद्वयेन निपीय कर्णे कृत्वा श्रुत्वा श्रीकृष्णः करेण केलिपातं धृत्वा सहसा नदीपारं विधाय यमुनायाः पुलिनं तटप्रदेशं राधया सह जगाम । 'सरसीरुहाक्ष्या' इत्यत्र उपमा । 'वचनं पीयूषपूर्णमिव' इत्यत्रापि उपमा । 'कर्णघटद्वयेन' इत्यत्र रूपकम् । अत्र छन्दो नाम वसन्ततिलका ॥ ३१ ॥

ततस्तत्र गत्वा – सुन्दरि ! पश्य समाना इयं स्थली,

मल्लीपरागपटलीपटवासपूरै-

रापूरयन्निविडमञ्जुलकाननानि ।

चञ्चत्कलिन्दतनयाजलबिन्दुरन्ध्र-

मायाति चन्द्रमुखि ! चन्दनगन्धवाहः ॥ ३२॥

ततस्तस्याः कुचयोः स्पर्शं निरूप्य –

मृदुलं निखिलशरीरं सुन्दरि ! विधिना निर्मितं यत्नात् ।

एतन्मनसिजशिल्पं यत्ते कठिनं पयोधरद्वितयम् ॥ ३३ ॥

ततो रोमावलिं विलोक्य विहस्य च –

अन्योन्यपीडामवलोक्य गाढां

वक्षोजयोः सुन्दरिसीमवादे ।

मध्ये दधौ नूतनरोमराजी-

व्याजेन सेतुं किल मीनकेतुः ॥ ३४ ॥

यमुनापुलिनं गत्वा कृष्णः राधां कथयति – हे सुन्दरि ! इयं समाना साध्वी उपयुक्ता स्थली प्राकृतिकी भूमिः । हे चन्द्रमुखि मल्यादिपुष्पवासैः काननप्रदेशानापूरयन् यमुनानद्याः जलबिन्दुरन्ध्रेण सह चन्दनगन्धवाह पवनः वहति । अत्र श्लेषः । 'चन्द्रमुखी' इत्यत्र उपमा । 'मञ्जु' इत्यत्र माधुर्यम् । चन्दनगन्धवाह इति रसोद्दीपनकारी । अत्र छन्दो नाम वसन्ततिलका ॥३२॥

श्रीकृष्णः राधायाः स्तनयुगलस्य स्पर्शं कृत्वा कथयति – मृदुलमिति । अत्र पयोधरद्वितयं मनसिजशिल्पत्वेन कल्पितम् उद्दीपनविभावसामग्री-परिपूरणार्थम् । अत्र छन्दो नाम आर्या ॥ ३३ ॥

लीलावपुः श्रितकमलाकुचमण्डलः धृतकुण्डलः कलितललित-वनमालः मुनिजनमानसहंसः यदुकुलनलिनदिनेशः मुरमर्दनः कालीयविषधरगञ्जनः श्रीकृष्णः श्रीराधाशरीरे रोमाञ्चं विलोक्य हर्षोत्फुल्लितः सन् रतिक्रीडाभिमुखी भवति । 'नूतनरोमराजिव्याजेन सेतुम्' इत्यत्र अपह्नुतिरलङ्कारः । 'मीनकेतुः' इति प्रसिद्धार्थ पदम् । कुचयोः सौन्दर्यं मीनकेतुः एव जानाति । अत्र छन्दो नाम इन्द्रवज्रा ॥ ३४ ॥

ततो विविधमन्मथक्रीडां तत्रानुभूय वेगेन राधां यमुनापारं निधाय तत्र गत्वा राधामालिङ्ग्य – सुन्दरि ! नाहं विस्मरणीयः ।

राधा – जीवनमहौषधिर्भवानिति । किमु जीवो विस्मरणीय इत्युक्त्वा जगाम ।

श्रीः । इति पारखण्डकेलिवर्णनं समाप्तम् ॥ ३ ॥

ततः उद्दिपनात् स्वशरीरे स्वशक्त्या च विविधक्रीडामाध्यमेन रममाणः श्रीसर्वेश्वरः जागतिकदृशा श्रीराधां यमुनापारं नीत्वा तत्र तामालिङ्ग्य कथयति – हे सुन्दरि ! अहं कदाचिदपि त्वया न विस्मरणीयः । जीवमुद्दिश्य एतदनुशासनम् । उक्तञ्च –'स्मर्त्तव्यः सततं विष्णुः, सोऽन्वेष्टव्यः, स विजिज्ञासितव्यः' इति । जीवस्य जीवनं परमेश्वरसान्निध्यप्राप्तिपरायणं सततं भवितव्यम् । श्रूयते बृहदारण्यके – 'तदेव पदनीयमस्य सर्वस्य यदयमात्मा' इति । एतस्मात् संसारतापक्लिष्टजीवनस्य कृते श्रीसर्वेश्वरो भगवान् नितरां सदा उपास्यः । एतत् अनुशास्ति आद्याचार्यवर्यः श्रीनिम्बार्कचरणः –

'उपासनीयं नितरां जनैः सदा प्रहाणयेऽज्ञानतमोऽनुवृत्तेः ।' इति ।

कदाचित् एतदुपासनायां हेला न कर्त्तव्या । निरन्तरं यदि परमेश्वरपुरुषोत्तमस्य उपसना क्रियते तर्हि भगवद्भावापत्तिरेव । तदुक्तं श्रीनिम्बार्काचार्येण –

'कृपाऽस्य दैन्यादियुजि प्रजायते यया भवेत् प्रेमविशेषलक्षणा ।
भक्तिर्ह्यनन्याऽधिपतेर्महात्मनः सा चोत्तमा साधनरूपिकापरा ॥'इति ।

श्रीराधा कथयति – 'जीवनमहौषधिर्भवानि'ति । अत्र श्रीकृष्णस्य रक्षकत्वं वर्णितम् । यथा औषधसेवनेन जनो रक्षितो भवति तथैव श्रीकृष्णस्य समाश्रयणेन जीवनम् । यथा भगवतः महत्त्वं तथा जीवस्यापि । भगवता जीवस्मरणं कर्त्तव्यं, जीवेन च भगवतः स्मरणमपि कर्त्तव्यम् । यदुक्तम् ऋग्वेदे (१/१९) –

'स नः पितेव सूनवेऽग्ने सूपायनो भव । स च स्वानः स्वस्तये ॥' इति ।

एतदभिलक्ष्य राधा 'किमु जीवो विस्मरणीयः' इति उक्तवती । इयमुक्तिः संसाररङ्गमण्डपेऽस्मिन् अभिनयकारिणां जीवानाम् उद्बोधनाय प्रतिभाति ।

इति दानखण्डनाटिकाया विश्वनाथस्वामि कृतायां सुधाव्याख्यायां समाप्तो तृतीयोऽङ्कः ॥ ३ ॥

******

चतुर्थोऽङ्कः

ततो दिनान्तरे पुनरपि व्रजाङ्गना भारमादाय गव्यं विक्रेतुं मथुरां व्रजन्तीरालोक्य कृष्णो जगाद –

तत्र क्षणं विरम सुन्दरि ! नीपमूले
कूले कलिन्ददुहितुः सह गोपिकाभिः ।
अद्य त्वं किमिति न श्रुतमस्ति भारे
कूले कलिन्ददुहितुः करमाचकार ॥ १ ॥

राधा – एतेन भवतः किमायातम् ।

कृष्णः – तदाकर्ण्य तां प्रति –

अथात्र दानखण्डनाटिकायाः चतुर्थोऽङ्कः प्रस्तूयते । ततः तदनन्तरं पुनरन्यस्मिन् दिने दधिविक्रयार्थं मथुरानगरीं गच्छन्तीः प्रव्रजन्तीः व्रजसुन्दरीः आलोक्य दृष्ट्वा श्रीकृष्णः जगाद कथितवान् – तत्र क्षणमिति । हे सुन्दरि ! कलिन्ददुहितुः यमुनायाः कूले तटे नीपमूले कदम्बतले तत्र किञ्चित्कालपर्यन्तं गोपिकाभिः सह विरम विश्रम । अद्य अधुना त्वं त्वया भारे भारविषये अर्थात् गव्यादिरूपे किं न श्रुतमस्ति यत् यमुनायाः कूले पुलिने करं राजस्वरूपम् आचकार कृतवान् कंस इति शेषः । कलिन्ददुहिता सूर्यपुत्री यमुना जगत्कल्याणकारिणी । यथा सूर्योदये सति जगज्जीवाः मुदिताः कर्मशीलाः धर्मार्थकाममोक्षपराश्च भवन्ति तथैव तत्पुत्री अपि जगन्मङ्गलमयी जलजीवनदात्री यस्याः जलपानेन निमज्जनेन संसर्गेण च पातकं दूरीभवति । यदुक्तम् ऋग्वेदे (१/२३/२२) – 'इदमापः प्रवहत यत्किञ्चिद् दुरितं मयि । यद्वाहमभिदुद्रोह यद्वा शप उतानृतम् ॥' इति । एवं महिमान्विता यमुना अत्र छन्दो नाम वसन्ततिलका । 'ल'कारानुप्रासः । 'त'कारानुप्रासश्च । नीपमूले विश्रामः खेदविश्रामार्थम् । कलिन्ददुहिता शीतलजलेन कामाग्निप्रशमिका इति सूच्यते । गोपिकापदेन रक्षिका न तु गोपस्य स्त्री । कलिन्ददुहितुः इत्यत्र स्नेहरसः ॥१॥

कंसेन भूमिपतिना महतः प्रयत्ना-
न्नित्यात्र कर्मणि करग्रहणे नियुक्तः ।
तेन स्वयं शिरसि मे निहितं विचित्रं
नेत्रं विलोकय विलोलमृगायताक्षि ! ॥ २ ॥

राधा संचिन्त्य क्षणं विमृश्य – करयोग्यवस्तु नास्ति, का शङ्का, विचार्यतां तावत् ।

कृष्णः स्मित्वा –

किं वस्तु वक्षसि निधाय गुरुप्रयत्ना-
च्चेलाञ्चलेन नयसे चपलायताक्षि ! ।
एतद्विचारय करार्हमिदं मदीयं
किं वा न वा भवति तत् प्रविलोकयामि ॥ ३ ॥

राधा सरोषम् –

जातो भवान् विधिवशाच्च करग्रहीता
तत्रापि ते पतति नैव पदं धरायाम् ।

एतेन भवतः किमायातं जातमिति राधाप्रश्ने कृष्णः कथयति – कंसेनेति । हे विलोलमृगायताक्षि ! राधे ! करग्रहणे राजस्वसंग्रहणाय कंसराजेनाहं नियुक्तः । तेन एतस्मात् कारणात् मम शिरसि विचित्रं विशिष्टं नेत्रं 'स्याज्जटांशुकयोर्नेत्रमि'त्यमर(३/३/१८०)वचनात् वस्त्रं निहितमस्ति । एतत् विलोकय । अतस्त्वं करं देहीति भावः । अत्र छन्दो नाम वसन्ततिलका । 'कंस' इति संक्षेपगुणः अक्षरसंहतिश्च इति मतभेदेन वर्णयन्ति । 'विलोलमृगायताक्षि' इत्यत्र उपमा । राधायाः चाञ्चल्यं चित्तमाकर्षयति । 'त'कारानुप्रासः । 'न'कारानुप्रासश्च ॥ २ ॥

राधा विचारपूर्वकं कथयति यत् तत्पार्श्वे करयोग्यं वस्तु नास्ति । ततः स्मितवदनः कृष्णः कथयति – किं वस्त्विति । अत्र वस्तुपदेन पयोधरबोधो जायते । चेलाञ्चलेन वस्त्राञ्चलेन तद्गूढं वस्तु आवृतमस्ति । 'चपलायताक्षि' इत्यत्र राधायाः चापल्यं द्योत्यते । वस्तुनि करस्यारोपात् परिणामः । 'न'कारानुप्रासः । 'च'कारानुप्रासश्च । अत्र छन्दो नाम वसन्ततिलका ॥३॥

एतत्पुनः प्रमितमप्रमितं न जाने

तत्रेदृशी स्फुरति कृष्ण ! कथं कुवाणी ॥ ४ ॥

कृष्णः स्मित्वा – प्रमितमेवैतत्, कथं कुवाणी स्फुरति, प्रत्यक्षमेवानुभविष्यामि –

मुग्धाक्षि ! कञ्चुकमिदं परिहृत्य दूरे

वक्षस्थवस्तु विदितं भवती विधत्ताम् ।

नो वा महीपतिकरग्रहणे नियुक्तो

देहे तव स्वयमहं करमर्पयामि ॥ ५ ॥

राधा सरोषं कटाक्षं कृष्णं पश्यन्ती जगाद –

राधाशरीरे करयोग्यवस्तु प्रविलोकयितुं श्रीकृष्णस्य मनोभावं ज्ञात्वा राधा सरोषं कथयति – जातो भवानिति । हे कृष्ण ! भाग्यवशात् भवान् राजस्वगृहीतृरूपेण जातः, तथापि ते पदं धरायां न पतति । भवति मदमत्तता । एतत् प्रमितमप्रमितं न्यूनं वा । तव ईदृशी कुवाणी कठोरवचनं कथं स्फुरति निर्गच्छति । एतन्न शोभते । वस्तुतो वाणी ब्रह्मस्वरूपा । तस्या दुरुपयोगः प्रतिकूलायैव । अत एव उक्तं मनुना (२/१५९, १६१) –

'अहिंसयैव भूतानां कार्यं श्रेयोऽनुशासनम् ।

वाक् चैव मधुरा श्लक्ष्णा प्रयोज्या धर्ममिच्छता ॥

नारुन्तुदः स्यादार्त्तोऽपि न परद्रोहकर्मधीः ।

ययास्योद्विजते वाचा नालोक्यां तामुदीरयेत् ॥' इति ।

प्रमितमप्रमितमिति छेकानुप्रासः । विरोधाभासश्च । 'प'कारानुप्रासश्च । अत्र छन्दो नाम वसन्ततिलका ॥ ४ ॥

प्रत्यक्षमेवानुभविष्यामीतिवचनपूर्वकं प्रफुल्लितः कृष्णः कथयति – **मुग्धाक्षीति** । हे राधे ! भवती इदं कञ्चुकमावरणवस्त्रं दूरे परिहृत्य वक्षस्थलमावृतं **वस्तु** विदितमनावृतं विधत्तां कुरु । अन्यथा चेत् करग्रहणार्थं स्वयमहं तव देहे **करमर्पयामि** हस्तं दधामि निक्षिपामि अर्थात् हस्तेन तव शरीरं संस्पृशामि । अत्र **छन्दो नाम वसन्ततिलका** । 'वक्षस्थवस्तु' इत्यनेन पयोधरस्य रमणीयत्वम् उद्दीपकत्वञ्च । 'प'कारानुप्रासः । 'त'कारानुप्रासः । 'द'कारानुप्रासश्च ॥ ५ ॥

रे नन्दनन्दन ! कुचेष्टगजान्तसिंहः
सिंहासने किमु न तिष्ठति कंसराजः ।
तस्याधिकारमधिगत्य कुलाङ्गनानां
देहे समर्पयितुमिच्छसि हन्त हस्तम् ॥ ६ ॥

कृष्णः सरोषम् – अयि ! कथमिच्छया एष दीयते करः, नो वा स्वयं विचार्याङ्गीकुरु ।

राधा सरोषं कृष्णं प्रति – कस्य स्कन्धे मस्तकद्वयं परस्त्रीदेहे हस्तं निक्षिपति –

पतिर्ममाप्यस्ति दुरन्तकारी
छिद्रानुसारी नृपतिश्च कालः ।
इतीव विज्ञाय मदीयदेहे
स्वयं करं दास्यसि नन्दसूनो ! ॥ ७ ॥

कृष्णः – तत्किं राज्ञा वयमत्र नियुक्ताः । तत्कार्यमेव क्रियते ।

कटाक्षं रक्तवर्णमपाङ्गं सरोषं कलुषितं तक्ताभं पश्यन्ती राधा कृष्णं जगाद उवाच – रे नन्दनन्दन इति । हे श्रीकृष्ण ! दुष्टानामविनीतानां दमनकारी कंसराजः सिंहासने तिष्ठति अर्थात् अधुना शासनं करोति । तस्याधिकारं कठोरशासनमधिगत्य ज्ञात्वा त्वं कुलस्त्रीणां शरीरसंस्पशार्थमिच्छसि । अनुचितमेतदित्यर्थः । 'कुचेष्टगजान्तसिंह' इत्यत्र रूपकम् । 'नन्दनन्दन'-कंसराज' इत्यत्र च अक्षरसंहतिः । 'कुलाङ्गनानाम्' इत्यत्र माधुर्यम् । अत्र छन्दो नाम वसन्ततिलका ॥ ६ ॥

कंसराजस्य आदेशानुसारमेतदेव कर्म क्रियत इति कृष्णेन उक्ते राधा परस्त्रीदेहस्पर्शकारणात् मस्तकच्छेदपर्यन्तं दण्डं सूचयन्ती कृष्णं कथयति – पतिर्ममेति । मम पतिः नृपतिश्च छिद्रानुसारी चारचक्षुः दुष्टानामन्तकारी विनाशकारी कालः विद्यते । एतज्ज्ञात्वा त्वं मम देहस्पर्शं न कुरु इत्यर्थः । 'नन्दसूनो' इत्यत्र स्नेहः । 'दुरन्तकारी छिद्रानुसारी' इत्यत्र भगवतः पापमोचकत्वं शत्रुनाशकत्वञ्च व्यज्यते । 'प'कारानुप्रासः । अत्र छन्दो नाम उपेन्द्रवज्रा ॥७॥

रत्नमस्त्येव । रत्नादिषु भारेषु करग्रहः । तथा हि –

वक्षोजौ तव शातकुम्भकलशौ केशोच्चयश्चामरं
माणिक्यं दशनच्छटामरकतश्रेणी च रोमावली ।
अन्यद्वा निभृतं यदस्ति परमं चेलाञ्चलेनावृतं
विज्ञाय व्यवहर्त्तुमिच्छसि न चेज्ज्ञात्वा न मे दास्यसि ॥ ८ ॥
राधे ! त्वदीयहृदि काञ्चनकुम्भयुग्मं
लावण्यरत्नपरिपूर्णमिदं विभाति ।

राधावचनं श्रुत्वा कृष्णः कथयति – तत् किं राज्ञेत्यादि । किं किमर्थम् । रत्नादिपरिपूर्णेषु भारेषु करः अर्थात् राजस्वं शास्त्रानुसारेण संगृह्यते । राधासन्निधौ कीदृशो रत्नभारो विद्यते तदत्र संसूच्यते कृष्णेन – वक्षजावितिपदद्वयेन । श्रीकृष्णाय कररूपेण दातव्यं वस्तु यथा – पयोधरः, केशोच्चयः, दन्तावली, रोमावली च । सातकुम्भं सुवर्णम् । मौक्तिकहारयष्टिः मौक्तिकहारपङ्क्तिः । रत्नं सुखसाधनम् । 'जातौ जातौ यदुत्कृष्टं तद्रत्नमित्यभिधीयते ।' तथा हि शारीरादिकं सुखसाधनं रत्नमिति । रत्नं रमणीयं रमतेऽत्र रत्नमिति अभियुक्तोक्तिः । 'अस्तेय प्रतिष्ठायां सर्वरत्नोपस्थानम्' इति पातञ्जलदर्शने। स्मृतं च मनुना 'तनुलोमकेशदशनां मृद्वङ्गीम्' इत्यादिना । राधायाः शरीरमित्थम् अमूल्यं रत्नमयम् । एतत्तु कृष्णायैव । तदर्थमेतत् कदाचिदपि न गुप्तमिति भावः । 'कुम्भकलसौ' इत्यत्र रूपकम् । 'केशोच्चय' इत्यत्रापि रूपकम् । 'माणिक्यदशनच्छटा' इत्यत्र रूपकम् । 'मरकतश्रेणी रोमावली' इत्यत्रापि रूपकम् । चेलाञ्चलेन आवृतं वस्तु अपूर्वं प्रतिभाति । 'लावण्यरत्न' इत्यत्र लावण्यमेव रत्नं रूपकम् । लावण्यमर्थान्तरगतिं भजते । लवणस्य भावः लावण्यमित्यत्र न संगच्छते । अत एव लावण्यपदं कान्तिविशेषे परिणमति । लावण्यलक्षणं यथा –

'मुक्ताफलेषु यच्छायायास्तरलत्वमिवान्तरा ।
संलक्ष्यते यदङ्गेषु तल्लावण्यमिहोच्यते ॥' इति ।

लावण्यं तत्त्वान्तरमान्तर्धर्म इति आनन्दवर्धनः । कायसम्पदिति पतञ्जलिः । 'काञ्चनकुम्भयुग्मम्' इति रूपकम् । 'मौक्तिकहारयष्टिः' इत्यत्रापि रूपकम् ।

तस्योपरि स्फुरति मौक्तिकहारयष्टि-
र्नालोकसे किमिति रत्नमयं शरीरम् ॥ ९ ॥

राधा – भवतु तावत्, रत्नादीनां कीदृक्करस्तत्कथ्यताम् ।

कृष्णः – श्रूयतामेतत् –

आमोटनं स्तनसुवर्णघटद्वयस्य
संदंशनं दशनमौक्तिकविभ्रमस्य ।
आकर्षणं कुटिलकुन्तलचामरस्य
पानं कठोरवदने ! न तथाऽधरस्य ॥ १० ॥

राधा श्रुत्वा – तावदत्र करो न देयः, राजधानीं व्रजाम इति ।

सखीनां कोलाहलो महानभूत् ।

इति बहुविधदर्पोद्योगमाकर्ण्य तस्या
हृदि विनिहितहस्तव्याकुलेनाङ्गनायाः ।

'रत्नमयं शरीरम्' इत्यत्रापि रूपकम् । अत्र रूपकेन राधायाः शारीरिकं सौन्दर्यं लोकविमोहनकरमिति व्यज्यते । 'वक्षोजावि'ति पद्ये छन्दः शार्दूलविक्रीडितम्। 'राधे त्वदीये'ति पद्ये छन्दश्च वसन्ततिलका ॥ ८, ९ ॥

कृष्णवचने राधा कथञ्चित् स्वसम्मतिं सूचयित्वा करग्रहणरीतिं पृच्छति – 'भवतु तावदि'ति वचनेन । ततो भवखण्डनः श्रीकृष्णः तया सह माधुर्यलीलासम्पादनार्थं सूचयति – 'आमोटनमि'त्यादिना । स्तनसुवर्णघटद्वयस्य आमोटनं, दशनमौक्तिकविभ्रमस्य संदंशनम् अर्थात् कर्तनं, कुटिलकुन्तलचामरस्य आकर्षणं (कर्षणं), अधरस्य पानं चुम्बनं च एतत् सर्वं कररूपेण दातव्यं वस्तु । अत्र सम्भोगशृङ्गारस्य अवस्थाविशेषः वर्णितः । आमोटनादिकं रतिकार्यमनुभावः । तदुक्तं चन्द्रालोकराकागमटीकायाम् –

'स्मितं गीतं कटाक्षश्च भुजक्षेपश्च हुंकृतिः ।
तनुमोटनजृम्भादि चानुभावः प्रकीर्त्यते ॥' इति ।

अत्र छन्दो नाम वसन्ततिलका ॥ १० ॥

कृष्णवचने यदा राधा एतत् करं दातुं न प्रवृत्ता राजधानीं गन्तुमुद्यता तदा सखीनां मध्ये महान् कोलाहलः हर्षादिध्वनिः अभूत् ।

सपदि कुचदुकूलं दूरमुत्क्षिप्य नीतं
निरुपममथ मुक्तादाम दामोदरेण ॥ ११ ॥

ततस्तु तस्यास्तावदेतदुद्वीक्ष्य गोपाङ्गनाः कृतकोलाहला हस्ततालं कृत्वा साक्षिणं चक्रुः ।

कृष्णः सप्रणयं राधां प्रति –

दत्वा ममाभिलषितं मथुरानगर्यां
स्वच्छन्दमिन्दुमुखि ! सुन्दरि ! गच्छ गच्छ ।
नोचेदिहैव समयं गमयाद्य मुग्धे !
त्वं मुञ्च दुग्धदधिविक्रयणक्रियाञ्च ॥ १२ ॥

राधा क्षणं विचिन्त्य – का गतिः ? सखीमुखं वीक्ष्यमाणा लज्जते । ततः सख्यः बलात्क्रियते का गतिरित्यूचुः । अस्याभिलषितमकृत्वा

राधायाः गमनरूपं कठोरवचनं श्रुत्वा दामोदरः श्रीकृष्णः हृदि वर्तमानं कुचदुकूलं दूरं कृतवान् अर्थात् कुचकलसमनावृतवान् । विनिहितहस्तव्याकुलेन विनिहितस्य हस्तस्य अतिशयचाञ्चल्येन इत्यर्थः । मुक्तादाम मुक्तामाला । निरुपमम् अनुपमम् उपमारहितम् अद्वितीयम् अतुलनीयं वा बोध्यते। अत्र छन्दो नाम मालिनी ॥ ११ ॥

ततस्तु तस्याः तावदेतत् उद्वीक्ष्य उत्पश्य दृष्ट्वा गोपाङ्गनाः लीलासङ्गिन्यः कृतकोलाहलाः कृतध्वनयः हस्ततालं हस्तध्वनिं कृत्वा तमेव च प्रमाणत्वेन साक्षिणं चक्रुः अङ्गीचक्रुः इत्यर्थः । एतादृशः कोलाहलः आकाशे विलीनः । श्रीकृष्णः आकाशरूप इति हेतोः एतत् कोलाहलं जानीयादिति गोपाङ्गनानां हृदयम् ।

ततः श्रीकृष्णः राधां प्रीतिपूर्वकं कथयति – दत्वेति । अत्रैव अवस्थानमस्तु इति एकः विकल्पः । अथवा स्वच्छन्दं गमनमस्तु इति अपरः विकल्पः । 'इन्दुमुखी' इत्यत्र रूपकम् । 'मुग्धे' इत्यत्र अर्थान्तरगतिः । सुन्दरी हृदयविदारी । 'द'कारानुप्रासश्च । अत्र छन्दो नाम वसन्ततिलका ॥ १२ ॥

एवं श्रीकृष्णवचनं श्रुत्वा सखीमुखं वीक्ष्यमाणा राधा लज्जते । लज्जा अत्र व्यभिचारिभावः । बलात् क्रियते (कृष्णेन) का गतिः इत्यादि सखीभिः

मथुरां व्रजामः किम् ?

कृष्णः स्मित्वा – इहैवादूरे कुञ्जभूमिस्तत्र गम्यताम् –

एषा वल्ली कुसुमहसिता चूतमालिङ्ग्य गाढं
धत्ते रम्यं मुकुलपुलकं प्रेमगर्वं सनाथम् ।
पायं पायं मधु मधुकरी मालतीमल्लिकानां
भ्रामं भ्रामं ललितललितं चुम्बति प्राणनाथम् ॥ १३ ॥

ततो राधा –

उत्तरं दत्तम् । अन्तरङ्गा-तटस्था-बहिरङ्गानां शक्तीनां नियन्त्रणे परब्रह्मणो ह्यधिकारो निर्विवादः । स यस्य कृते यदा यथा च इच्छति तथा संघटते , 'एष एव साधु कर्म कारयति यमेतेभ्यो लोकेभ्य ऊर्ध्वं निनीषते एष एवासाधु कर्म कारयति यमेतेभ्यो लोकेभ्योऽधो निनीषत' इति कौषीतकीब्राह्मणश्रुतेः । भगवतः इच्छा नितरां सदा प्रबला, 'बलीयसी केवलमीश्वरेच्छा' इति स्मृतेः । अतः तं विना जीवः स्वकीय कर्म सम्पादने अनर्हः । तदाचरणेन तु दुःखमेव । तदुक्तं –

'समाने वृक्षे पुरुषो निमग्नो अनीशया शोचति मुह्यमानः ।
जुष्टं यदा पश्यत्यन्यमीशं तदा महिमानमिति वीतशोकः ॥'

इति । जीवः परमेश्वरशरणापन्नः सन् एव सकलं कर्मजातं सम्पादयेत् । तेन तत्कृते सर्वदा मङ्गलम्,

'महान्तं विभुमात्मानं मत्वा धीरो न शोचति ।'

इति कठश्रुतेः । निर्गुणस्य परमेश्वरस्य उपासनानिमित्तं जीवः सर्वथा प्रवृत्तः न भवति । अत एव सगुणब्रह्मोपासना आचार्यैः उपदिश्यते । सगुणब्रह्म हि जीवेन साकं सर्वथा सर्वदा उपास्यरूपेण विराजते । अत एव सः सर्वैश्वर्यसुखप्रदः । तस्यैव हरेः अधीनता जीवेन अवश्यं स्वीकर्त्तव्या । यद्यपि सः चित्स्वरूपः तथापि स अज्ञः अल्पशक्तिः । परमेश्वरस्तु सर्वज्ञः सर्वशक्तिः । तत्त्वतः सर्वकारणकारणं श्रीकृष्णं विहाय नान्या गतिः उपायः विद्यते । तदुक्तम् आद्याचार्यवर्येण श्रीमिम्बार्कमहामुनीन्द्रेण वेदान्तकामधेनुदशश्लोक्याम् –

'नान्या गतिः कृष्णपदारविन्दात् संदृश्यते' इति ।

श्रीकृष्णस्य अभिलाषः कुञ्जे पूरणीयः । अतः हे राधे त्वं तत्र

अन्योन्यबाहुपरिशीलितकण्ठदेशं
कान्तेन सा स्मरकथास्मितसुन्दरास्यम् ।
लीलाभ्रमन्मधुरगुञ्जितभृङ्गपुष्पं
कुञ्जं जगाम तरसा हरिणायताक्षी ॥ १४ ॥

अभिलाषपूरणार्थं गच्छ इत्यर्थकं मधुरवचनम् । कुञ्जश्च वैशिष्ट्यपूर्णमस्तीति विज्ञापयितुं श्रीकृष्णः कथयति – एषा वल्लीति । अत्र रसाभासः । रसभरितं पद्यमिदं सहृदयैः विचारणीयम् । अनुप्रासच्छटाऽपि चकास्ति । अत्र छन्दो नाम मन्दाक्रान्ता ॥ १३ ॥

एवं हि यमुनाकूले श्रीराधामाधवयोः रहः केलयः जयन्ति । नटवरनागरः श्रीकृष्णः श्रीराधाप्रेम्णा ह्लादितो विद्यते । तदुक्तं गीतगोविन्दकारेण (३/१) –

'कंसारिरपि संसारवासनाबन्धशृङ्खलाम् ।
राधामाधाय हृदये तत्याज व्रजसुन्दरीः ॥' इति ।

श्रीकृष्णवचनेन पुलकिता राधा आचरति – अन्योन्यबाह्विति । रसभरितं पद्यमिदं चकास्ति । अत्र छन्दो नाम वसन्ततिलका ।

'फुल्लं वसन्ततिलकं तिलकं वनाल्या
लीलापरं पिककुलं कलमत्र रौति ।
वात्येष पुष्पसुरभिर्मलयाद्रिवातो
यातो हरिः स मथुरां विधिना हताः स्म ॥'

इति छन्दोविधानशास्त्रे अत्र मधुमाधवीति नाम्ना प्रसिद्धा वसन्ततिलका सहृदयहृदयान् रञ्जयति । प्रेमोद्गारे रसोद्गारे रसोद्वाहे च इयं प्रमुखा इति हेतोः कवयः अस्यां संसक्ताः भवन्ति । इयं सिंहोन्नता उद्धर्षिणी मधुमाधवी इति नामान्तरं भजते ॥ १४ ॥

कुञ्जं गत्वा सुरतमनुभूय अनन्तरं श्रीराधा मथुरां गतवती । मथुरानगरी मधुरानगरी इति वा भवितुमर्हति । साहित्यिकैः मधुरा वृत्तिः स्वीकृता । सा तु स्थानेऽस्मिन् समुत्पन्ना इति विज्ञायते । मूर्तिमान् मधुरः सर्वैश्वर्यसुखप्रदाता श्रीकृष्णस्तत्र विराजत इति मथुरानगरीमहिमा । तस्मात् आनन्दकन्दनन्दनन्दनात् हि भूतानि जायन्ते, आनन्देन च जीवन्ति । स एव वसुदाता । तद्दानं हि अमृतम्

तत्र गत्वा सखीभिः सह सुरतमनुभूय राधा मथुरां गतवती ।

श्रीः । इति दानकेलिवर्णनम् ।

श्रीः । इति श्रीगोपालभट्टप्रणीता दानखण्डनाटिका समाप्ता ।

श्रीराधाकृष्णार्पणमस्तु ॥

अमूल्यम् । एतदधिगन्तुं दानखण्डम् इत्यभिधेया नाटिका आचार्यचरणेन श्रीगो पालभट्टेन विरचितेति ॐ श्रीराधासर्वेश्वरः शरणम् ।

इति दानखण्डनाटिकाया विश्वनाथस्वाईं कृतायां सुधाव्याख्यायां समाप्तः चतुर्थोऽङ्कः ॥ ४ ॥

सुधाव्याख्याकृद्विवृत्तिः

भरद्वाजकुलोत्पन्नान् आर्यकुलमण्डनान् ।
प्रणमामि गुरुश्रेष्ठान् श्रीकुलमणिसंज्ञकान् ॥
काश्यपकुलसम्भूतो घनः सदाशयः ।
यदुनाथ इति श्रीमान् विवेकवान् तदात्मजः ॥
वर्णकर्मरतो नित्यं विप्रवैष्णवपूजकः ।
श्रद्धाशीलो मृदुर्दान्तो न परद्रोहकर्मधीः ॥
सर्वेऽप्यमी दिवं प्राप्ताः पुण्यकर्मपरायणाः ।
आशीर्वादप्रदानेन कृतार्थयन्तु मां सदा ॥
यदुनाथात्मजः सोऽहं विश्वनाथोऽल्पचेतनः ।
गुरुकृपावशाद्यत्तु प्राप्तं तत् प्रत्यपादयम् ॥
द्वैताद्वैतपरा रम्या या दानखण्डनाटिका ।
कृता तस्याः सुधा-व्याख्या न्नाथप्रसादतः ॥
गोपालभट्ट ! निम्बार्क ! 'श्री जी' पाद ! जगद्गुरो ! ।
दिशन्तु मे सुधामार्गं वृन्दावनप ायण ! ॥

****